Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Stock Verification-2024

Stock Verification-2024

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

26662

1928.

THE

HAMBÁ SANSKRIT SERIES,

A

OF RARE & EXTRAORDINARY SANSKRIT WORKS

NOS. 365

661.48 XXI(2)
26662

# गादाधरी

दाधरभट्टाचार्यचक्रवर्त्तिविरचिता ।
ोगङ्गेशोपाध्यायविरचिततत्त्वचिन्तामण्या
ृतार्किकशिरोमणिविरचितदीधित्या च गर्भिता ।

THE

GÁDÁDHARÍ

MMENTARY ON DÍDHITI THE COMMENTARY
OF TATTVA CHINTÁMANI.

By

Bhattâchârya Chakravartin.(With Texts).

Nyâyâchârya Vâmâcharaṇa Bhattâchârya,

*essor, Govt. Sanskrit College, Benares;*

Nyâyopâdhyâya Ḍhuṇḍhirāja Śāstrī,

ofessor, D. A. V. Veda Vidyâlaya,

BENARES.

FASCICULUS XXI-२१

*ISHED & SOLD BY THE SECRETARY,*
AMBA SANSKRIT SERIES OFFICE,
*ress, North of Gopal Mandir, Benares.*

*Benares.*

1927

661.48 XXI(2)
26662

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ओ३म्
पुस्तक संख्या ..... ५३(ब)(२०)
पञ्जिका संख्या ..... २५५५२
६६१
४८XXI
(३)

पुस्तक पर सर्व प्रकार की निशानियां लगाना वर्जित है। कोई सज्जन पन्द्रह दिन से अधिक देर तक पुस्तक अपने पास नहीं रख सकते। अधिक देर तक रखने के लिये पुनः आज्ञा प्राप्त करनी चाहिये।

श्रीः

आनन्दवनविद्योतिसुमनोभिः सुसंस्कृता।
सुवर्णाऽङ्कितभव्याभशतपत्रपरिष्कृता ॥ १ ॥
चौखम्बा-संस्कृतग्रन्थमाला मञ्जुलदर्शना।
रसिकालिकुलं कुर्यादमन्दाऽऽमोदमोहितम् ॥ २ ॥
स्तबकः—३६५

*Printed by Jai Krishna Das Gupta*
*at the Vidya Vilas Press, Benares.*

Agents:

1 Luzac & co, Booksellers,
LONDON.

2 Otto Harrassowitz, Leipzig:
GERMANY.

3 The Oriental Book-supplying Agency,
POONA.

*Registered according to Act XXV. of 1867. (All Rights Reserved.)*

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुस्तकालय
गुरुकुल काँगड़ी विश्वविद्यालय, हरिद्वार
वर्ग संख्या ६६१ आगत संख्या २६६६२
४ XXI(2)
पुस्तक विवरण की तिथि नीचे अंकित है। इस तिथि सहित ३० वें दिन यह पुस्तक पुस्तकालय में वापस आ जानी चाहिए अन्यथा ५० पैसे प्रतिदिन के हिसाब से विलम्ब दण्ड लगेगा।

Registered according to Act XXV. of 1867. (All Rights Reserved.)

CHOWKHAMBA SANSKRIT SERIES OFFICE.
*Vidya Vilas Press, North of Gopal Mandir, Benares.*

1927

661.48 XXI(2)
26662

Digitized by Arya Samaj Foundation Chennai and eGangotri

Agents:

1 Luzac & co, Booksellers,
LONDON.

2 Otto Harrassowitz, Leipzig:
GERMANY.

3 The Oriental Book-supplying Agency,
POONA.

CC-0. In Public Domain. Panini Kanya Maha Vidyalaya Collection. Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चौखम्बा—संस्कृत—ग्रन्थमाला

( ग्रन्थ संख्या ४२ )

नम्बर्स १८६-१८७-२०१-२१७-२५९-२६०-२६३-२६४-
२७७-२७८-२८४-२९२-३०१-३१९-३३७-३३९-
३४३-३४६-३४९-३६२-३६५ ।

# गादाधरी

## श्रीगदाधरभट्टाचार्यचक्रवर्त्तिविरचिता ।

## श्रीगङ्गेशोपाध्यायविरचिततत्त्वचिन्तामण्या श्रीरघुनाथतार्किकशिरोमणिविरचितदीधित्या च गर्भिता ।

१-४खण्डान्तं म० म० पं० विन्ध्येश्वरीप्रसाद द्विवेदिना, म०म०पं० वामाचरण-भट्टाचार्येण च; ५-११ खण्डान्तं म० म० पं० विन्ध्येश्वरीप्रसादद्विवेदिना, म० म० वामाचरणभट्टाचार्येण न्यायाचार्य श्रीरामशास्त्रिणा च; १२-१४ खण्डान्तं म०म० पं० वामाचरणभट्टाचार्येण, न्यायाचार्य श्रीरामशा-स्त्रिणा च; १५-२१ खण्डान्तं म०म० प० वामाचरणभट्टाचार्येण, न्यायोपाध्याय पं० ढुण्डिराजशास्त्रिणा च संशोधितम् ।

प्रकाशकः-

जयकृष्णदास—हरिदासगुप्तः—

चौखम्बासंस्कृतसीरीज आफिस, विद्याविलास प्रेस,
गोपालमंदिर के उत्तरफाटक, बनारस सिटी ।

१९८३

Digitized by Arya Samaj Foundation Chennai and eGangotri

हमारे यहां हर तरहकी छपाई व जिल्दसाजीका कार्य भी होता है।
हर तरह के संस्कृत ग्रन्थ तथा भाषा पुस्तकों के मिलने का पता—

**जयकृष्णदास—हरिदास गुप्तः,**

चौखम्बासंस्कृतसीरीज आफिस,
विद्याविलास प्रेस, गोपालमन्दिर लेन,
बनारस सिटी।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

# अनुमानगादाधरी

## उपोद्घातः ।

### (१) न्यायशास्त्रस्य माहात्म्यम् ।

अथेयं प्रकाश्यते मुद्रयित्वा नव्यन्यायशास्त्रचूडामणि-मणिग्रन्थ-व्याख्यानरूपायाः शिरोमणिरित्यपरसंज्ञया प्रथितायाः दीधितेष्टीका गादाधरी । एतस्याः खलु निर्माता तर्ककर्कशप्रज्ञाप्रतिभाप्रभाप्रभाव-विहितानेकनिबन्धो वङ्गदेशीयविद्वन्मण्डलाभ्यर्हितपादपीठस्तार्किक-कुलनिकरकैरवकलाकरो बुधकुलकलापकमनीयावनितलस्फुरन्मनी-षाविकाशित आगम इव सदा लोकहितपरायणः पुरन्दरोद्यानमिव विमत्सरः विदुरोऽपि धृतराष्ट्रपक्षपातः कुलाचारनिरतोपि कौलाचा-रविरतः कारुण्यकेदारङ्काारुण्यकुङ्कुमस्य क्षीरसागरो विवेकरत्नविस-रस्याप्रतिमप्रतिभाप्रसारविनिर्जितप्रतिपक्षाचार्यवर्यो श्रीजीवाचार्यतः प्राप्तजन्मा द्विजवरो नव्यनैयायिकानामग्रणीर्गदाधरभट्टाचार्यः । नव्य-न्यायशास्त्रस्यातिगहनस्य बीजभूतं षोडपदार्थतत्त्वविवेकदृष्टिसिद्धौ-षधायमानं न्यायदर्शनमप्रातरूपस्वरूपसंसारान्धकूपप्रतिघातविक-लीकृतानसुभृतः समुद्दिधीर्षुणा करुणावरुणालयेन भगवता महर्षिणा गोतमेन व्यरचि । तच्च—

अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः ।
पुराणं धर्मशास्त्रं च विद्या ह्येताश्चतुर्दश ॥

इत्यादिनोक्तचतुर्दशविद्यासु न्यायविस्तरपदेन संगृहीतं न्यायवार्ति-कभूमिकायां म० म० पं० विन्ध्येश्वरीप्रसादद्विवेदिभिः श्रुतिस्मृत्यादि-प्रमाणप्रदर्शनपूर्वकं यथा प्रशंसितं, परमतदूषणोद्धारेण चास्य यथा बौ-द्धादिनास्तिकदर्शनेभ्यः प्राचीनत्वं च व्यवस्थापितं तत्तत्रैव द्रष्टव्यम् । तस्यैव च प्रत्यक्षानुमानोपमानशब्दाख्यप्रमाणचतुष्टयवादिनो महर्षेर्मत-मवलम्बमानेन लोकोत्तरनव्यन्यायप्रपञ्चप्रजापतिना महार्किकल्पेन श्री-मद्गङ्गेशोपाध्यायेन प्रमाणादिषोडशपदार्थनिरूपणपरस्य पञ्चाध्याय्या-त्मकस्य न्यायशास्त्रस्य प्रमाणप्रकरणात्मकमेकांशमवलम्ब्य प्रमा-णचतुष्टयव्यवस्थापनपरो युक्तिदीपिजालजटिलस्तत्त्वचिन्तामणिर्म-हानिबन्धः सर्वेषां प्रमेयज्ञानसौलभ्याय प्रमाणतत्त्वावधारणार्थमेव निरमायि । तत्रेदमादिमं वाक्यम्-'अथ जगदेव दुःखपङ्कनिमग्न-मुद्दिधीर्षुरष्टादशविद्यास्थानेष्वभ्यर्हिततमामान्वीक्षिकीं परमकारुणि-

Digitized by Arya Samaj Foundation Chennai and eGangotri



को मुनिः प्रणिनाय तत्र प्रेक्षावत्प्रवृत्त्यर्थं प्रमाणादितत्त्वज्ञानान्निःश्रेयसाधिगम इत्यादावसूत्रयत्। तेष्वपि प्रमाणाधीना सर्वेषां व्यवस्थितिरिति प्रमाणतत्त्वमत्र विविच्यत' इति। न्यायदर्शनस्थं 'प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि' इति पञ्चदशाक्षरात्मकं १ अ०१आ० ३ सूत्रमेकमेवावलम्ब्य श्लोकद्वादशसाहस्र्यात्मकश्चिन्तामणिमहानिबन्धो (१)गङ्गेशोपाध्यायेन स्वमतिप्रागल्भ्येन यथा विदधे तथा नाव्यक्तं नव्यन्यायाम्बुधिपरिशीलनपराणां तर्करसिकानाम्। स चेदानीं मिथिला-वङ्ग-द्रविडादिदेशीयैर्महापण्डितैः साक्षात् परम्परया वा व्याख्यातः क्रोडपत्रादिभिरलङ्कृतः श्लोकानां लक्षाणामष्टाविंशत्योपबृंहितो नव्यन्यायशास्त्रत्वेन व्यवहृति गमितोऽनेकैर्भारतीयैः पाश्चात्यैश्च विद्वद्भिः। एतेनाऽस्य ग्रन्थस्य नवीनत्वन्तद्व्याख्यानरूपाणां च दीधिति-जागदीशी-माथुरी-गादाधरी-क्रोडपत्रादीनां प्रलापत्वमात्रत्वं चेति निरस्तम्। शास्त्रतात्पर्यानवबोधात् गोतमीयसूत्राधारेणास्य विनिर्मितत्वाच्च। सूत्रभाष्यवार्तिकादीन्येवानवस्थितानि नवीनान्यकर्मण्याणि चेत्याद्याक्षेपेण न्यायस्य समूलोच्छेदं कर्तुमिच्छन्तोऽविज्ञातन्यायागममहिमानः पल्लवग्राहिपाण्डित्येनैव नैयायिकंमन्याः पाश्चात्या अभिनवदार्शनिकास्त्वस्माभिः खद्योतभाष्यचन्द्राख्यटीकाद्वयसहितस्य भाष्यस्य भूमिकायां दत्तोत्तरा इति विरम्यतेऽत्रास्माद्दृशामवर्णनीये न्यायशास्त्रस्य गांभीर्ये। अत एवोक्तं रघुनाथतार्किकशिरोमणिनाऽनुमानचिन्तामणिदीधितौ—

न्यायमधीते सर्वस्तनुते कुतुकान्निबन्धमप्यत्र।
अस्य तु किमपि रहस्यं केचन विज्ञातुमीशते सुधियः॥

एवमुदयनाचार्यश्रीहर्षादिभिरपि तत्रतत्र प्रतिमादितमेवास्य माहात्म्यम्।

## (२) न्यायशास्त्रस्य नव्यप्राच्यविवेकः।

केचित्तु अवच्छेदकावच्छिन्नशब्दादिभिर्व्याख्यातत्वेनास्य नवीनत्वसाधनमिच्छन्ति। तदपि शास्त्रतात्पर्यस्यानवगमान्न युक्तमिति ब्रूमः। अन्यथा पातञ्जलदर्शनीयसमाधिपादस्थ 'पूर्वेषामपि गुरुः का-

---

(१) गंगेशोपाध्यायप्रभृतीनां नव्यनैयायिकानामैतिह्यं विषयविवेचनप्रकरणे यथाक्रममनुपदमेव टिप्पण्यामुपपादयिष्यते।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



लेनाऽनवच्छेदात्' इति २६ सूत्रे तद्भाष्यादौ चावच्छेदकादिशब्दानां व्यवहारात् तेषामपि नव्यत्वं स्यात्।

इदमत्र विचार्यते। किं तावत् न्यायशास्त्रस्य प्राचीनत्वमर्वाचीनत्वं वा? यद्यपि सूत्रकारीयप्रमाणभागनिरूपकत्वाद्गङ्गेशोपाध्यायप्रचलितशैलीसदृक्षत्वानां ग्रन्थानामद्ययावत्प्राचीनेष्वेवान्तर्भावः समुचितः, तथा तत्त्वचिन्तामण्यादिगादाधर्यन्तेषु सविवेचनेषु ग्रन्थेषु कुत्रापि आदावन्ते वा नव्यशास्त्रं प्राच्यन्यायशास्त्रं चेति व्यपदेशस्यादर्शनात्सकलमेव न्यायशास्त्रमेकविधमेव भवितुं युक्तम्, तथापि भारद्वाजकृतस्य न्यायवार्तिकस्य 'अतिजरतीना'मित्यादिवाक्येन प्राचीनत्वं संस्थापयन्तो वाचस्पतिमिश्रादय एव प्राच्यनव्यव्यवहारे प्रमाणम्। नचैवमपि तत्त्वचिन्तामण्यादिनिबन्धानां नव्यत्वं पूर्वोक्तरीत्याऽसंभवीति वाच्यम्। न्यायसारमारभ्योपलभ्यमानेषु न्यायशास्त्रनिबन्धेषु 'इति प्राच्याः इति नव्या' इत्यादिना विद्वत्सूभयव्यवहारस्य प्रचलितत्वेन तन्निरासस्याशक्यत्वात्।

अत्रकेचित्। आत्मादिप्रमेयपदार्थानां तत्त्वज्ञानान्निःश्रेयमङ्गीकुर्वद्भिः गौतमादिमहर्षिभिर्निरात्मविज्ञानात्मवादिचार्वाकबौद्धादिपराजयार्थमात्मनोऽनुमानेन सिद्धिस्तावत् प्रदर्शिता। परार्थानुमानापरपर्यायस्य च न्यायस्य पूर्वाङ्गोत्तराङ्गसाकल्येनैव वस्तुसाधनक्षमत्वमिति तदनुसारिणां सूत्रग्रन्थानां शास्त्रीयसकलपदार्थप्रतिपादकानां भाष्यवार्तिकतात्पर्यटीकादिव्याख्याग्रन्थानां समानतन्त्रसिद्धानां चोक्तलक्षणसम्पन्नानां प्राचीनत्वम्। तदेकदेशप्रमाणव्याख्यानरूपाणान्तु तत्त्वचिन्तामण्यादीनां सव्याख्यानां निबन्धानां नव्यत्वमित्याहुः।

तन्मन्दम्। तथासति प्रमाणमात्रविवेचनपराणां जैनबौद्धादिग्रन्थानां प्राचीनानामपि नव्यत्वव्यवहार आपद्येत।

अपरे तु बाहुल्येन नास्तिकत्वेनाभिमतानां चार्वाकबौद्धादीनामेव तत्त्वचिन्तामणिपूर्वकालीनेषु सूत्रभाष्यादिग्रन्थेषु खण्डनस्योपलम्भात्तेषां पुराणत्वव्यवहारः, तत्त्वचिन्तामण्यादिषु तु आस्तिकत्वेन गृहीतानां मीमांसा-सांख्यादिदर्शनानामेवाधिक्षेप इति नव्यत्वव्यपदेश इति वदन्ति।

वस्तुतस्तु अलौकिकनूतनप्रतिभाशालिना विद्वद्वरेण गङ्गेशोपाध्यायेन भाष्यग्रन्थं मन्थानं विधाय तात्पर्यटीकादिङ्नागादिनिबन्ध-

Digitized by Arya Samaj Foundation Chennai and eGangotri



प्रग्रहैर्न्यायवैशेषिकसूत्राम्बुधिं मथित्वा तत्सारभूतोऽयं तत्त्वचिन्तामणिर्नूतन एवोदपादीति तत्कालमारभ्य विनिर्मितस्य न्यायशास्त्रनिकरस्य नव्यत्वव्यवहार इति युक्तमुत्पश्यामः।

केचित्तु विद्वांसोऽस्य न्यायशास्त्रस्य प्राच्यं-नव्यं-नव्यनव्यं चेति त्रिविधं विभागं वदन्ति। तत्र सूत्रकारमारभ्योदयनात्पूर्वजातं प्राच्यम्(१) उदयनाद्गङ्गेशाद्वा दीधितिकारात्प्राग् नव्यम्(२) शिरोमणिमारभ्य निबद्धं तु सर्वं न्यायशास्त्रं नव्यनव्यमि(३ ति तेषामाशयः।

अत्र तृतीयविभागस्य मूलं विमृश्यमाणमवच्छेदकादिप्रवेशनिबन्धनमेव प्रतिभासते, तच्च व्यभिचरितत्वादयुक्तमित्युक्तमेव। किञ्चैवं सति 'अतिजरतीना' मिति वाचस्पत्यवचनाच्चातुर्विध्यमप्यापद्येत। प्रदर्शितवचनबलेनोद्योतकारान्तानां गौतमकणादादीनामतिप्राचीनत्वमुद्योतकरभारद्वाजोत्तरकालवर्तिनां पुराणत्वं स्वस्य स्वसमकालस्थितानामुदयनादीनां च नव्यत्वमाविष्कुर्वता तदुत्तरसमयजातानां गङ्गेशोपाध्यायादीनां नव्यनव्यत्वस्य संभवदुक्तिकतया (१)अतिप्राचीन (२)प्राचीन (३)नव्य (४)नव्यनव्येति चतुर्धा विभागस्य वक्तुं शक्यत्वात्। तस्मोद्धस्तुतस्त्वित्यादिना प्रदर्शित एव प्राचीनार्वाचीनव्यपदेशः साध्विति कृतं वाग्विवादेन।

## (३) नव्यन्यायशास्त्रस्य विषयविवेचनम्।

स चायं प्राचीनतर्कशास्त्राम्बुधिनिर्मन्थनसमुद्भूतो नव्यन्यायशास्त्रकल्पनायुक्तीनामादिमः कल्पस्तत्त्वचिन्तामणिः प्रत्यक्षा(१)नुमानो(२)पमान(३)शब्दा(४)ख्ये खण्डचतुष्टये विभक्तः। तत्रादिमे खंडे त्रयोदश विषया विवेचिताः। तेषु प्रथमं धर्मव्यवस्थापनं विदधतोपाध्यायेन दृष्टादृष्टप्रयोजनककर्मणां साफल्यमङ्गीकुर्वताम्याच्छन्ननास्तिकानां पराजयार्थं ग्रन्थारभे विहितस्य मङ्गलस्य साफल्यप्रदर्शनापदेशेनाविगीतशिष्टाचारविषयाणां स्वेष्टदेवतोपासनादीनां श्रद्धया कृतानां पूजनान्तानां साफल्यं व्यक्तीकृतं मङ्गलवादे (१)। (२)प्रामाण्यवादे (३)अन्यथाख्यातिवादे च मीमांसकानां स्वतःप्रामाण्यवादिनां निरासो विहितः। (४) (५)लौकिकालौकिकप्रत्यक्षवादौ सर्वतन्त्रसिद्धौ युक्त्या प्रदर्शितौ। (६)समवायवादे च वेदान्तिनां मीमांसकानामपि मतं दूषयित्वा समवायः साधितः। (७)अभावोऽपि सांख्यादिमतविप्रतिपत्तिखण्डनद्वारा स्थापितः। (८)अनुपलब्धिवादेऽनु-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



पलब्धेः प्रमाणान्तरत्वं निरस्तम्। (९)प्रत्यक्षकरणवादे लौकिकप्रत्यक्षकरणानां विवेचनं, (१०)मनोणुत्ववादे मनसोऽणुत्वं च स्थापितम्। (११)अनुव्यवसायवादेन ज्ञानस्य स्वतो ग्राह्यत्ववादिनां मीमांसकानां (१२।१३) सविकल्पकनिर्विकल्पकवादाभ्यां च निर्विकल्पमात्रस्य प्रत्यक्षत्वमिच्छतां बौद्धानां खण्डनं विहितम्।

एवमनुमानखण्डेऽपि सप्तविंशतिविषयाणां निरूपणं विवेचितम्। ते चानुमानखण्डमभ्यस्यतां नैयायिकानां प्रथिता एवानुमित्यादयः ईश्वरानुमानान्तो विषयाः। तत्रापि द्वौ मुख्यभागौ व्याप्तिवादो हेत्वाभासवादश्च। अतो व्याप्तिवादे व्याप्तिसिद्धान्तलक्षणं हेत्वाभासे हेत्वाभाससामान्यलक्षणञ्चातीवोपयोगि सर्वेषामभिमतं प्रथितं चेति तदुपादाय गंगेशप्रभृतीनां नव्यनैयायिकानामुभयत्र लक्षणे निष्कृष्य विवेचयामः॥

## श्रीसद्गुरुः शरणम्।

### ( ४ ) मण्युक्ते सिद्धान्तलक्षणे मतान्तरप्रदर्शनम्।

अत्रोच्यते [१]प्रतियोग्यसमानाधिकरणयत्समानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदकावच्छिन्नं यन्न भवति तेन समं तस्य सामानाधिकरण्यं व्याप्तिरिति व्याप्तिलक्षणं श्रीमता गङ्गेशोपाध्यायेन(१) सिद्धान्तितम्।

---

(१) एष खलु नव्यनैयायिकतिलको दरभङ्गामण्डलान्तर्गते कमलारोधसि वर्तमाने कोरानग्रामे कस्यचिच्छ्रोत्रियस्य सदने समजनि। शैशवांत एव चायं तर्कशास्त्रे निष्णातो महाकाल्युपासकश्चाभूत्। स च सप्तपदार्थीनिबन्धप्रणेतुः शिवादित्यस्योल्लेखात् वैशेषिकदर्शनावलम्बिनो रत्नकोशाख्यमहानिबन्धधृतमतास्योट्टङ्कनाच्च पञ्चशताधिकैकादशशतईस्वीयसंवत्सरादूर्ध्वमासीद्भूमण्डल इत्यनुमीयते। यतश्चिन्तामणिग्रन्थे व्याघ्रशिशुक-सिंहशिशुकापराह्वयोरानन्दसूरि-अपरचन्द्रसूरिणोर्बौद्धनैयायिकयोर्मतं सिंहव्याघ्राख्यव्याप्तिपूर्वपक्षलक्षणयोरपदेशेनोद्धृत्य निरस्तम्। खण्डनखाद्यमतखण्डनाच्च ११४६ ई० समये वर्तमानस्य कन्नौजाधिपतेर्जयचन्द्रस्य राज्ञः सभापण्डितस्य श्रीहर्षस्य समकालीनोऽयमिति वदन्तीतिहासविज्ञाः। एवं चाद्यमतेन गङ्गेशोपाध्यायस्य समयस्त्रयोदशशताब्द्याः प्रथमभागोऽन्त्येन तु द्वादशशताब्द्या अन्तिमभाग इति विज्ञायते।

Digitized by Arya Samaj Foundation Chennai and eGangotri



तत्र च नैयायिकशिरोमणिना (१)रघुनाथसार्वभौमेन दीधितिग्रन्थे कालो घटवान् कालपरिमाणादित्यत्राव्याप्तिवारणाय [२]साध्यतावच्छेदकसम्बन्धसामान्ये निरुक्तप्रतियोगिप्रतियोगिकत्वहेत्वधिकरणीभूतयत्किञ्चिद्धर्म्यनुयोगिकत्वसामान्याभयाभावरूपोऽर्थो विवक्षितः। एवं च कालिकसम्बन्धसामान्ये महाकालानुयोगिकत्वसत्त्वेऽपि गगनप्रतियोगिकत्वविरहात् गगनाभाव एव घटवान् महाकालत्वादित्यादौ प्रतियोगिव्यधिकरणतया प्रसिद्ध इत्यव्याप्तिदोषो वारितो भवति।

(१)ई० १४७७ परिमितेऽब्दे श्रीमता रघुनाथसार्वभौमेन नदियाशान्तिपुरे जनुर्गृहीता। बाल्य एव तस्य पिता लोकान्तरमगमत्। जनन्या महता कृच्छ्रेण रघुनाथस्य पोषणं विहितम्। पञ्चवार्षिकोऽयं मात्रा कदाचिदन्यानयनार्थमादिष्ट आधारं विनैव तमानेतुं कस्यांचित् चतुष्पाठ्यां प्रविष्टः। ततश्च भूतिपुञ्जं करे संस्थाप्याग्निं गृहीत्वा गन्तुकामः स चतुष्पाठीशिक्षकेन वासुदेवसार्वभौमविदुषा लक्षितः। तस्य बुद्धिगाम्भीर्यमवलोक्य जातहार्देन सार्वभौमेन रघुनाथः स्वशिष्यतामानायि। रघुनाथः सार्वभौमोऽपि व्याकरणसाहित्यादौ व्युत्पत्तिमुपलभ्य न्यायशास्त्रेऽपि परिश्रमं विधाय तत्र व्युत्पत्तिमुपलिप्सुर्गुरोराज्ञया मिथिलां गत्वा पक्षधरमिश्राणां छात्रो बभूव। रघुनाथस्त्वेकाक्षे एवासीदित्यपि वदन्ति तद्वृत्तज्ञाः। एकदा नैयायिकछात्रैः पंडितैश्च भूयिष्ठे विद्वत्समाजे चतुष्पाठ्या अध्यापकः पक्षधरस्ततर्कशास्त्रे व्युत्पन्नं रघुनाथसार्वभौममन्यैर्मैथिलछात्रैर्विवादयित्वा न ते विचारा ग्राह्या इत्यन्तेऽधिक्षिप्तवान्। तदसहमानेन सार्वभौमेन पक्षधरमिश्रान् हन्तुं सासिना तद्गृहसमीपेऽपावृतशरीरेणास्थायि। निशि कान्तया सहेन्दोः सुषमां पश्यतो गवाक्षस्थितस्य पक्षधरमिश्रस्य शिरश्छेत्तुं यदा प्रवृत्तो रघुनाथस्तदेन्दोरप्यधिकं प्रकाशमानमेकं मुखं जगत्यस्मिन् वर्तते यदहमहोरात्रं चिन्तये यदाधारं नैयायिकप्रवरं मिथिलायामद्य जेतुं कोऽपि न क्षम, इति पक्षधरवचनश्रवणमात्रेण तद्धस्तादसिर्भूमौ विग्रहश्च चरणयोः पपातेत्यपि रघुनाथसार्वभौमानां कीर्तिपताका वंशदेशेऽधुनापि गीयते। तेन च बौद्धाधिकारे [१] किरणावलीप्रकाशे [२] न्यायलीलावतीप्रकाशे[३] खंडनखंडखाद्ये च[४] दीधित्याख्या टीका कृता। १ पदार्थतत्त्वनिरूपणम् २अवच्छेदकत्वनिरुक्तिः ३नञ्वादः ४आख्यातवादश्चेति चत्वारो मूलग्रन्थाश्च निर्मिताः।

Digitized by Arya Samaj Foundation Chennai and eGangotri



किन्तु कालस्य जगदाधारतया संयोगसमवायाभ्यां गगनादेरवृत्तित्वेऽपि स्वरूपसम्बन्धेन चेत् वृत्तित्वं तदोक्तरीत्या गगनाभावोऽपि प्रतियोगिव्यधिकरणो भवितुं नार्हतीति उक्तकल्पं परित्यज्य-[३ निरुक्तप्रतियोग्यनधिकरणहेतुमन्निष्ठाभावप्रतियोगितासामान्ये यत्सम्बन्धावच्छिन्नत्वयद्धर्मावच्छिन्नत्वोभयाभावस्तेन सम्बन्धेन तद्धर्मावच्छिन्नस्य व्यापकत्वमित्यर्थान्तरं कृतं तेनैव । तथा च संयोगेन घटाद्यभावमादायैवोक्तदोषवारणं सम्भवतीति ।

अनयोश्चाद्यकल्पे उक्ताव्याप्तिवारणेऽपि घटवान्नित्यज्ञानत्वादित्यादौ विषयितासम्बन्धे गगनप्रतियोगिकत्वनित्यज्ञानानुयोगिकत्वोभयसत्त्वेन गगनाभावमादायापि प्रतियोगिव्यधिकरणाभावस्य प्रसिद्ध्यसम्भवाद्व्याप्तिं निराकर्तुं श्रीमता (१)जगदीशतर्कालङ्कारेण [४]साध्यतावच्छेदकसम्बन्धावच्छिन्नप्रकृतसाध्याधिकरणतानिरूपितस्वरूपसम्बन्धे यदभावप्रतियोगितावच्छेदकावच्छिन्नाधिकरणतासामान्याभाववत्त्वं हेतुमतस्तदभावप्रतियोगितानवच्छेदकं यत्साध्यतावत्-

(१) जगद्विख्यातस्य चैतन्यमहाप्रभोः श्वशुराणां सनातनमिश्राणामात्मजस्य प्रपौत्रोऽयं जगदीशतर्कालङ्कारः ई० पञ्चत्रिंशाधिकशोडषेऽब्दे जागदीशीं लिखितवानिति वदन्ति इतिहासज्ञाः । अष्टादशवर्षदेशीयोऽयं मातृकात्तरग्रहणं विधाय भवानन्दसिद्धान्तवागीशानां चतुष्पाठ्यां न्यायशास्त्रमधीतवान्, किन्तु—

श्रीसार्वभौमस्य गुरोः पदाब्जं विद्यार्थिना कल्पतरोः प्रणम्य ।
विनिर्मितः श्रीजगदीशविज्ञैर्विद्योततामाद्यमणेर्मयूखः ॥

इत्याद्युक्त्या सार्वभौमान्तेवासिनमेवात्मानं मन्यते स्म जगदीशः । शब्दशक्तिप्रकाशिकायां' इति पुनर्न्यायरहस्येऽस्मद्गुरुचरणा' इत्युल्लेखदर्शनाच्चायं न्यायरहस्य-न्यायकुसुमाञ्जलिकारिकाव्याख्यापदार्थप्रकाशादिन्यायग्रन्थप्रणेता रामभद्रसार्वभौम एवेति सिद्ध्यति ।

(१) तत्त्वचिन्तामणिदीधितिप्रकाश(जागदीशी) (२) चिन्तामणिमयूख (३) न्यायादर्श (न्यायसारावली) (४) शब्दशक्तिप्रकाशिका- (५) तर्कामृत (६) पदार्थतत्त्वनिर्णय (द्रव्यभाष्यटीका) (७) न्याय लीलावतीदीधितिव्याख्याख्याः सप्त निबन्धा न्यायशास्त्रे जगदीशतर्कालङ्कारेण प्रणीताः। तल्लेखे शब्दसंक्षेपेऽपि यदर्थगाम्भीर्यं तन्नाव्यक्तं नव्यन्यायकोविदानाम् ॥

Digitized by Arya Samaj Foundation Chennai and eGangotri



च्छेदकमित्याद्यर्थेनैवोक्तदोषद्वयसमाधानसंभवे निरुक्तप्रतियोगिकत्वेत्यादिरीत्या दीधितिकारोक्तायां खण्डशः प्रसिद्धौ वैयर्थ्यक्षेपः प्रदर्शितः। [५]यादृशप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिकसंबन्धसामान्ये साध्यतावच्छेदकसम्बन्धत्वहेत्वधिकरणीभूतयत्किञ्चिद्यत्तयनुयोगिकसम्बन्धत्वोभयाभावस्तादृशप्रतियोगितानवच्छेदकत्वस्यैव साध्यतावच्छेदके विवक्षणेऽपि उक्तदोषवारणं संभवतीति कथमेवं नोक्तमित्यादिरीत्यापि दीधितावाक्षेपोऽदर्शि। विश्वनाथन्यायपञ्चाननास्तु गगनादेर्वृत्तित्वमङ्गीकृत्यान्यं प्रतियोगिताघटितमुभयाभावकल्पमेवोद्धृतवन्तो न्यायसिद्धान्तमुक्तावल्याम्।

अन्त्यस्य प्रतियोगिताघटितोभयाभावकल्पस्य व्यभिचारिण्यतिव्याप्तिवारणाय जगदीशतर्कालङ्कारेण—[ ६ ] स्वावच्छेदकताघटकसम्बन्धेन यादृशप्रतियोगितावच्छेदकानधिकरणं हेत्वधिकरणं तादृशप्रतियोगितासामान्ये यद्धर्मावच्छिन्नावच्छेदकताकत्व – यत्सम्बन्धावच्छिन्नावच्छेदकताकत्वोभयाभावस्तेन सम्बन्धेन तद्धर्मावच्छिन्नस्य व्यापकत्वमित्यर्थः। एवं च वृत्त्यनियामकसम्बन्धस्य प्रतियोगितावच्छेदकत्वाभावेऽपि प्रतियोगितावच्छेदकताघटकसम्बन्धत्वस्य चैत्रो न पचतीत्यादौ पाकविशिष्टायाः कृतेरभावस्य वृत्त्यनियामकानुकूलत्वसम्बन्धेन चैत्रादावन्वयानुरोधेन सर्ववादिसंमतत्वात्, व्यभिचारिणि च सामान्याभावप्रतियोगितायामेव तादृशोभयाभावविरहान्नातिव्याप्तिरिति पूर्वकल्पोपरि नव्यमतापदेशेनान्यः कल्पोऽपि उल्लिखितः ॥

(१)मथुरानाथतर्कवागीशास्तु [ ७ ] स्वावच्छेदकसम्बन्धेन स्वा-

---

(१)श्रीमान् नव्यनैयायिकप्रवरो मथुरानाथतर्कवागीशः सप्तत्यधिकपंचदशशताब्दामासीत्। अस्य च पिता—

न्यायाम्बुधिकृतसेतुं हेतुं श्रीराममखिलसंपत्तेः।
तातं त्रिभुवनगीतं तर्कालङ्कारमादरान्नत्वा ॥ १ ॥
श्रीमता मथुरानाथतर्कवागीशधीमता।
विशदीकृत्य दर्श्यन्ते प्रत्यक्षमणिफक्किकाः ॥ २ ॥

इति तत्त्वचिन्तामणिरहस्याख्यायाः माथुर्याः प्रारम्भिकपद्यद्वयप्रदर्शनेन श्रीरामतर्कालङ्कारनाम्ना प्रथितो रघुनाथशिरोमणेरन्तेवासी बभवेति प्रतीयते। मथुरानाथतर्कवागीशस्तु रघुनाथशिरोमणि-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



वच्छेदकावच्छिन्नसामान्यासम्बन्धिनिरुक्तहेतुसम्बन्धिका या या प्रतियोगिता तदनवच्छेदकं यत्साध्यतावच्छेदकं तदवच्छिन्नसाध्यसामानाधिकरण्यं व्याप्तिरित्यादिनोक्तचिन्तामणिसिद्धान्तलक्षणस्यार्थं निष्कृष्य तत्रापि वह्निमान् धूमादित्यादावसम्भवस्य प्रतियोगिताव्यक्तिसु साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वं निवेश्य स्वावच्छेदकसम्बन्धेनेत्यत्र साध्यतावच्छेदकसम्बन्धेनेत्युक्त्या वा निवारणेऽपि कालो घटवान् कालपरिमाणादित्यादौ अव्याप्तिं प्रदर्श्य [८]स्वावच्छेदकसम्बन्धेन स्वावच्छेदकावच्छिन्नसामान्यासम्बन्धिनिरुक्तहेतुसम्बन्धिकप्रतियोगितासामान्ये साध्यतावच्छेदकसम्बन्धावच्छिन्नत्व-यद्धर्मनिष्ठपर्याप्तावच्छेदकत्वोभयाभावस्तद्धर्मावच्छिन्नसाध्यसामानाधिकरण्यमित्यर्थं कृतवन्तः । इत्थं चोक्तस्थले समवायादिसम्बन्धावच्छिन्नघटाद्यभावप्रतियोगितामादाय प्रसिद्धिसंभवेनाव्याप्तिवारणं सुलभमेव । घटवान्नित्यज्ञानत्वादित्यादौ वृत्त्यनियामकविषयतादिसम्बन्धेन साध्यतायामव्याप्तिवारणं च वृत्तिनियामकसम्बन्धवत् वृत्त्यनियामकसम्बन्धस्याप्यभावप्रतियोगितावच्छेकत्वं स्वीकुर्वद्भिर्मथुरानाथतर्कवागीशैर्जगदीशतर्कालङ्कारणामुक्त [४]लक्षणार्थकरणप्रयासो व्यर्थतामापादितः । एवं तादात्म्यादिवृत्त्यनियामकसम्बन्धेन साध्यत्वे हेतुत्वे चाव्याप्तिवारणायाधिकरणत्वं वृत्तित्वमपहाय सम्बन्धित्वविवेशं शोभनं मन्वानेन मथुरानाथेन दीधितिकारोक्तायाः तादृ-

---

समस्य विद्वद्वरस्योक्तश्रीरामतर्कालङ्कारस्यैव सविधे न्यायशास्त्रमधीत्य माथुरीतिनाम्ना सुप्रथितां मणिग्रन्थस्य व्याख्यां चक्रे । सर्वासु च चिन्तामणिव्याख्यासु अधिकं सरलतया नास्यास्तादृग् प्रचारो नवद्वीपेऽभूद्यथा जागदीश्याः । निम्नलिखिता ग्रन्था मथुरानाथतर्कवागीशेन निबद्धाः—

(१) तत्त्वचिन्तामणिरहस्यम् ( माथुरी )
(२) मण्यालोकरहस्यम् ।
(३) दीधितिरहस्यम् ।
(४) सिद्धान्तरहस्यम् ।
(५) लीलावतीप्रकाशरहस्यम् ।
(६) लीलावतीप्रकाशदीधितिरहस्यम् ।
(७) बौद्धाधिकारहस्यम् ।

Digitized by Arya Samaj Foundation Chennai and eGangotri



शसंयोगिवृत्तिधूमत्वादिरूपव्याप्तेः खण्डनमपि कृतम् ।

(१)गदाधरभट्टाचार्यास्तु सम्बन्धघटितशिरोमण्युक्त[२]उभया-भावघटितकल्पे संयोगेन घटादिसाध्यके घटत्वादिहेतोर्व्यभिचारिता-

(१) नव्यन्यायशास्त्रग्रन्थाम्बुधिपारङ्गतः श्रीमान् चक्रवर्तिविरुदावलीसम्पन्नः श्रीगदाधरभट्टाचार्यः पूर्ववङ्गदेशावयव-बोआमण्डलान्तर्गत-लक्ष्मीपासाग्राममधिवसन् सप्तदशशताब्दामभूत् इति इतिहासविदां सम्मतम् । तेन च नदियानाम्नि न्यायशास्त्रस्याद्यपीठे गत्वा हरिराम-तर्कवागीशानां सविधे तर्कशास्त्रमधीतम् । किन्तु गुरोः पश्चात् पूर्ववङ्गदेशोद्भवत्वात्प्रथितबुधवंशानुद्भूतत्वाच्च तत्रस्थैश्छात्रैर्न्याय-विदां दक्षमतिरप्यसौ नात्यादृतोऽभूत् । ततश्च चक्रवर्तिमहाशयेन गुरुच-तुष्पाठी त्यक्ता स्थापिता च स्वकीयाऽन्या चतुष्पाठी आरामवाटिका च। कदाचिदेकेन छात्रेण कुसुमावचयार्थन्तत्रागत्य कश्चित् पादपमेवो-द्दिश्य पूर्वपक्षसमाधाने कुर्वंश्चक्रवर्तिमहाशयो सविस्मयमालोकितः । ततश्च जाता अनेके शिष्यास्तस्य न्यायशास्त्रेऽप्रतिमया प्रतिभया-ऽगाधपाण्डित्येन वशीभूताः। एकदा तत्समकालीनस्य जगदीशतर्का-लङ्कारस्य समीपे गदाधरभट्टाचार्याणां कश्चिच्छात्रः प्राप्त-वान् । तर्कालङ्कारेण स्थलविशेषव्याख्यानार्थं पृष्टः स च्छात्रो यथा-धीतं व्याख्यातवान् । तर्कालङ्कारस्तु अशुद्धमिदं न सम्यक् गुरवे निवेदयेति तमाज्ञप्तवान् । श्रुतवृत्तान्तास्तु गदाधरभट्टाचार्याः-स्व-मतिवैभवेनासङ्गतस्यापि तस्य स्वव्याख्यानानुसारेण मूलपाठमपि संयोज्य लिखित्वा कस्यचिद्धस्तेन प्रेषितवन्तः । दृष्ट्वा तु तादृशं बुद्धिदार्ढ्यं चकितो जगदीशतर्कालङ्कारमहाशयो मुग्ध इवाभूदित्येषापि किंवदन्ती तद्वैदुष्ये प्रमाणम् । प्रणीतवांश्चायं (१)तत्त्वचिन्तामणिदीधि-तिप्रकाशिका (२)चिन्तामणिव्याख्या (३)आलोकटीका (४)मुक्तावलि-टीका (५)रत्नकोशवादरहस्याख्यान् व्याख्याग्रन्थान् । (६)आख्या-तवाद (७)कारकवाद (८)नञ्वाद (९)मुक्तिवाद (१०)विषयतावाद (११)व्युत्पत्तिवाद (१२)शक्तिवाद (१३)स्मृतिसंस्कारवादादयो मौल ग्रन्था अपि तेन निबद्धाः। येन स नव्यनैयायिकेषु प्रधानतया विश्रुतो-भत् । अयं भवानन्दरायस्य ज्येष्ठसूनोर्नदियाशान्तीन्द्रस्य राघवरायस्य समये सुप्रसिद्धनैयायिको बभूव । नदियाशान्तिपुरमेवातः परं तस्य निवासस्थानमभूद्, गौडदेशीयश्चातःपरं सोऽगण्यत ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



रणाय संयोगमात्र एव निरुक्तप्रतियोगिप्रतियोगिकत्वहेत्वधिकरणयत्किञ्चिद्यत्तयनुयोगिकत्वोभयाभावमादृत्य,-यस्य घटस्याधःस्थितपटे येन संयोगेन घटविशिष्टबुद्धिर्जनिता तेनैव संयोगेन पटेन समं परिवृत्य स्थापिते तद्घटे घटविशिष्टबुद्धिरपि जन्यते तत्र संयोगे घटप्रतियोगिकत्वघटानुयोगिकत्वस्यावश्यकतया संयोगेन घटसाध्यके तद्घट-तत्पटान्यतरत्वरूपेण हेतुतायामतिव्याप्तिं निरसितुं [९]साध्यतावच्छेदकसम्बन्धानुयोगितासामान्ये निरुक्तप्रतियोगिकत्वविशिष्टसम्बन्धनिरूपितत्वहेत्वधिकरणीभूतयत्किञ्चिद्यत्तिनिष्ठत्वोभयाभावरूपमर्थं विवक्षितवन्तः। एवं च स्वस्मिन् स्वविशिष्टबुद्ध्यनुदयेन स्वप्रतियोगिकत्वविशिष्टसंयोगनिरूपितत्वस्य स्वनिष्ठानुयोगितायामसत्त्वात् संयोगीयानुयोगितासामान्ये घटप्रतियोगिकत्वविशिष्टसम्बन्धनिरूपितत्वतद्घटनिष्ठत्वोभयाभावोऽक्षत इति नोक्तदोषः। एतैनैतत्कल्पे समवायैक्यमतेनातिव्याप्तिसमुद्भावनं यथाश्रुताभिप्रायेण बोध्यम् इत्युक्तं तैः। किन्तु 'इदन्तु बोध्य'मित्यादिना गदाधरभट्टाचार्येणापि दीधितिकारोक्तस्योभयाभावघटितोक्तप्रतियोगिवैयधिकरण्यानुधावनस्याक्षेपः कृत एव। साध्यतावच्छेदकावच्छिन्नाभावनिरूपित-त्वविशिष्टसाध्यवन्निष्ठाधिकरणताभिन्नहेतुमन्निष्ठाधिकरणताकत्वस्य प्रतियोगिव्यधिकरणहेतुसमानाधिरणेति पदस्यार्थकरणेनैव महाकालो घटवान् महाकालत्वादित्यादावव्याप्तिवारणसम्भवात् हेतुमन्निष्ठतदधिकरणतायाः साध्याभावाधिकरणताभिन्नत्वसत्त्वेन विशिष्टभेदसत्त्वात्, कालिकसम्बन्धावच्छिन्नपटाद्यभावस्यैवैतादृशविशेषणाक्रान्ततया प्रतियोगिव्यधिकरणस्याभावस्य प्रसिद्धत्वात्। एवं च प्रतियोगिवैयधिकरण्यस्य 'यादृशप्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वं हेतुमत' इत्यादिक्रमेण निर्वचनेऽननुगमात् तत्तत्प्रतियोगितावच्छेदकत्वाभावकूटनिवेशने व्याप्तेर्दुर्ज्ञेयतेत्यादि दूषणान्तराणामप्यनवकाश इत्यादिनोक्तार्थकरणस्य प्रयोजनान्तरमपि गदाधरेण प्रदर्शितम्। द्वितीयकल्पानुसरणं तु स्वमतेन दीधितिकारजगदीशाभ्यामनुसृतं प्रदर्श्य मतान्तराभिमतस्य पूर्वोक्ते घटवान्नित्यज्ञानत्वादित्यादिस्थलेऽव्याप्तिवारकस्य साध्यतावच्छेदकसम्बन्धे [१०] निरुक्तप्रतियोगिप्रतियोगिकत्वहेत्वधिकरणीभूतयत्किञ्चिद्यत्तयनुयोगित्वसाध्यप्रतियोगिकत्वैतत्त्रित्वावच्छिन्नाभावरूपार्थस्य कालिकसम्बन्धेन घटादिसाध्यके-

Digitized by Arya Samaj Foundation Chennai and eGangotri



ऽव्याप्तिप्रसङ्गकत्वात्कल्पान्तरानुसरणबीजप्रदर्शनं 'अत्र केचि'दित्यादिग्रन्थोक्तमुक्तनैयायिकशिरोमणिनाऽधिकं परिहृतम्। अयं च गादाधर्यामत्र विशेषो द्रष्टव्यः । रघुनाथसार्वभौमेन सम्बन्धघटितोभयाभावकल्पपरित्यागे द्रव्यं जातेरित्यादावतिव्याप्तिवारणरूपं यद्बीजं दत्तम्। तस्य [११]साध्यतावच्छेदकसम्बन्धतावच्छेदकरूपविशिष्टनिरूपितानुयोगितासामान्ये निरुक्तप्रतियोगिप्रतियोगिकसम्बन्धनिरूपितत्व-हेत्वधिकरणीभूतयत्किञ्चिद्व्यक्तिनिष्ठत्वोभयाभावरूपार्थविवक्षया समवायभेदमते समवायकालिकविशेषणतोभयसम्बन्धेन द्रव्यत्वस्य साध्यतायां केवलसमवायादिना द्रव्यत्वादेर्हेतुतास्थलेऽतिव्याप्तिवारणेऽपि न निरुक्तप्रतियोगिप्रतियोगिकसम्बन्धनिरूपितत्वस्थाने निरुक्तप्रतियोगिप्रतियोगिकत्वविशिष्टसम्बन्धनिरूपितत्वनिवेशेन द्रव्यं जातेरित्यादावप्यतिव्याप्तिर्वारयितुं शक्येति वदता गदाधरभट्टाचार्येण समवायस्यैक्यमतेनैव कथमतिव्याप्तिः पूर्वकल्पे दत्ता दीधितिग्रन्थ इति शिरोमणिमतेऽस्वरसः प्रदर्शितः ॥ एवमुक्तप्रतियोगिताघटितोभयाभावकल्पे विषयतादिवृत्त्यनियामकसम्बन्धेन साध्यतायां तादृशसम्बन्धस्य वृत्त्यनियामकतयाऽभावप्रतियोगितानवच्छेदकत्वेन तत्सम्बन्धावच्छिन्नत्वस्याप्रसिद्धतयाऽव्याप्तिवारणाय वृत्त्यनियामकसम्बन्धेन व्यापकतास्वीकारपक्षे तत्सम्बन्धस्याभावप्रतियोगितानवच्छेदकत्वमङ्गीकृत्य [१२]प्रतियोगितावच्छेदकताघटकसम्बन्धेन प्रतियोगितावच्छेदकानधिकरणकाभावप्रतियोगितावच्छेदकतासामान्ये साध्यतावच्छेदकसम्बन्धावच्छिन्नत्व-तादृशरूपावच्छिन्नत्वोभयाभावरूपोऽर्थो विवक्षितः। तथाच उक्तसम्बन्धेन साध्यतायां सद्धेतौ तत्सम्बन्धावच्छिन्नावच्छेदकताकसाध्यवदभावो न प्रतियोगितावच्छेदकताघटकसम्बन्धेन प्रतियोगितावच्छेदकानधिकरणहेत्वधिकरणकः, अतोऽन्यसम्बन्धेन साध्यादिमदभावः तत्सम्बन्धेनान्यावच्छिन्नाभावो वा तादृश इति तत्प्रतियोगितावच्छेदकतायामुभयाभावसत्त्वान्नाव्याप्तिरिति संक्षेपः ॥

**(५) मण्युक्ते हेत्वाभाससामान्यलक्षणे मतान्तरप्रदर्शनम् ।**

**(१) अनुमितिकारणीभूताभावप्रतियोगियथार्थज्ञानविषयत्वम् । (२)यद्विषयत्वेन लिङ्गज्ञानस्यानुमितिप्रतिबन्धकत्वम् तत्त्वम्। (३)ज्ञायमानं सदनुमितिप्रतिबन्धकं यत्तत्त्वं वा हेत्वाभाससामान्यलक्षणमिति**

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



लक्षणत्रयमुद्दिष्टं मणिग्रन्थे।

तत्र च प्रतिबन्धकज्ञानविषयव्यभिचारादिघटकसाध्यादावतिप्रसङ्गवारणाय द्वितीयलक्षणमुपात्तमिति रघुनाथ-मथुरानाथादीनामभिप्रायः। तत्र च प्रमेयत्वविशिष्टव्यभिचारादावतिव्याप्तिवारणाय विशिष्टान्तराघटितत्वनिवेशः शिरोमणिना प्रोक्तः। यद्विषयकत्वेनेत्यादिद्वितीयलक्षणस्य तद्धर्मावच्छिन्नतत्पक्षकतद्धर्मावच्छिन्नतत्साध्यकतद्धर्मावच्छिन्नतद्धेतुकानुमितिप्रतिबन्धकत्वार्थकत्वस्य पर्वतत्वेन पक्षत्वे वह्नित्वेन साध्यत्वे विशिष्टधूमत्वेन हेतुत्वे पर्वतादेः काञ्चनमयत्वविरहस्यादोषत्वेन तत्रातिव्याप्तिवारणायावश्यकत्वेन निर्वह्निः पर्वतो वह्निमान् पर्वतावृत्तिवह्निमान् वा तद्व्यभिचारिणः पर्वतावृत्तेर्वा धर्मादित्यादौ तादृशानुमितेरप्रसिद्धतयाऽव्याप्तिवारणार्थं (४)यद्विषयकनिश्चयस्य विरोधिविषयताप्रयुक्तस्तदुत्तरमनुमितौ अनाहार्यमानसज्ञाने वा पक्षतावच्छेदकविशिष्टपक्षे साध्यतावच्छेदकविशिष्टसाध्यवैशिष्ट्यावगाहित्वस्य साध्यतावच्छेदकविशिष्टसाध्यवैशिष्ट्यावगाहित्वस्य साध्यताच्छेदकविशिष्टसाध्यनिरूपितव्याप्तिविशिष्टहेतुतावच्छेदकविशिष्टहेतुमत्त्वावगाहित्वस्य च द्वयोर्व्यतिरेकः तत्त्वं हेतुदोषत्वम्। (५) प्रकृतपक्षे प्रकृतसाध्यवत्त्वस्य प्रकृतसाध्यव्याप्यप्रकृतहेतुमत्त्वस्य चावगाहिनो ज्ञानस्य यद्विषयकं ज्ञानं विरोधिविषयकं तत्त्वं तादृशज्ञानविरोधित्वं वा हेतुदोषत्वम्। (६) यादृशपक्षकयादृशसाध्यकयादृशहेतौ यावन्तो दोषाः सम्भवन्ति तावदन्यान्यत्वं तत्र हेत्वाभासत्वमिति मतान्तरेणार्थत्रयं प्रदर्शितम्।

तत्र च प्रथमकल्पे प्रमेयत्वविशिष्टव्यभिचारादावतिव्याप्तिं निराकर्तुं वस्तुतस्त्वित्यादिना (७) यद्विषयकनिश्चयत्वविरोधियादृशयादृशप्रतियोगिको निरुक्तोभयव्यतिरेकस्तदन्ययद्विषयकनिश्चयत्वविरोधितादृशविषयिताप्रतियोगिकस्तथाविधविशिष्टाघटितत्वरूपतादृशविशिष्टान्तराघटितत्वस्य निवेशः प्रदर्शितो जगदीशतर्कालङ्कारेण। साध्याभाववदवृत्तित्वरूपाया अन्वयव्याप्तेरेवानुमित्युपयोगित्वात् तादृशव्याप्तिविशिष्टप्रकृतहेतुमत्त्वावगाहित्वस्यैव लक्षणे निवेशमङ्गीकुर्वतां नव्यानां मतेन तु (८)प्रकृतपक्षतावच्छेदकविशिष्टपक्षे प्रकृतसाध्यावगाहित्वस्य प्रकृतसाध्यीयतादृशव्याप्तिविशिष्टप्रकृतहेतुमत्त्वावगाहित्वस्य

Digitized by Arya Samaj Foundation Chennai and eGangotri



च त्रित्वावच्छिन्नाभावो यद्धर्मावच्छेदेन यादृशधर्मवत्तानिश्चयत्वविरोधिविषयिताप्रतियोगिकस्तद्धर्मावच्छिन्न एव तादृशधर्मविशिष्टस्य प्रकृतपक्षतावच्छेदकविशिष्टपक्षकप्रकृतहेतकसाध्यकन्यायस्थले दोषत्वं विवृतं जागदीश्याम्। अस्मिंस्तु मते जगदीशभट्टाचार्याणामभिमानः 'परैरपरिशीलितः पन्था' इत्युक्तेः। (९)यादृशविशिष्टविषयकनिश्चयवृत्तित्वविशिष्टाया विरोधिविषयतायाः प्रयुक्तो व्यापकः प्रकृतपक्षे प्रकृतसाध्यावगाहित्वस्य प्रकृतसाध्यव्याप्यप्रकृतहेतुमत्त्वावगाहित्वस्य च द्वयोर्व्यतिरेकस्तत्त्वं हेतुदोषत्वम् इत्यादिस्तु रामभद्रसार्वभौमाणां गुरुचरणानामप्यभिप्रेतोऽर्थः साध्याभावव्याप्यविशेषपक्षात्मकस तत्प्रतिपक्षेऽव्याप्तिप्रसङ्गाद्यापादनेन खण्डितः श्रीमज्जगदीशतर्कालङ्कारमहोदयैः। कल्पे चास्मिन् सर्वत्र सर्ववस्तूनां भ्रमे मानाभावाद्यत्र यस्य यद्भाप्यस्य वा भ्रमो नास्ति तत्र तस्य साध्यतायां तदभावविशिष्टतद्भस्तुरूपबाधादावव्याप्त्यादिरूपाऽस्वरसबीजस्य 'वदन्ति' इत्युक्त्या सूचितस्योद्घाटनान्न तत्र शिरोमणेर्निर्भर इति जगदीशग्रन्थेन बुध्यते। दीधित्युक्ते (२) कल्पेऽपि यत्र स्थलविशेषे साध्यतद्भाप्ययोः पक्षे समूहालम्बनभ्रमो न कस्याप्युत्पन्नः तत्रत्यदोषे पर्वतः पर्वतान्यो धूमादित्यादिस्थलीयबाधादावव्याप्तितादवस्थ्याद्दीधितिकारस्यानिर्भर एवेति जगदीशेनोक्तम्। तृतीयेऽत्वननुगतेऽपि लक्षणे स्वमतेन कस्यचिदस्वरसस्यानुल्लेखात्तत्र दीधितिकारस्य निर्भरः सूचितो जगदीशभट्टाचार्यैः॥

मथुरानाथतर्कवागीशास्तु चिन्तामण्युक्त(१)कल्पे दीधितिकारवदस्वरसं प्रदर्श्य यद्विषयकत्वेनेत्यादि(२)कल्पे प्रमेयत्वविशिष्टव्यभिचारादावतिव्याप्तिनिरासकं जागदीश्यामुक्तं विशिष्टान्तराघटितत्वनिवेशं प्रमेयत्वमवृत्ति प्रमेयत्वादित्यादौ अवृत्तित्वाभाववद्वृत्तिप्रमेयत्वादिरूपव्यभिचारेऽव्याप्तिभिया परित्यज्य प्रतिबन्धकतायां स्वानिरूपितविशिष्टविशेष्यकत्वानवच्छेद्यत्वविशेषणं दत्तवन्तः। तत्र च स्वानिरूपितविशिष्टविशेष्यकत्वानवच्छिन्नत्वं स्वानिरूपितविशिष्टविशेष्यकत्वानतिरिक्तवृत्तिप्रतिबन्धकताभिन्नत्वमुक्तम्। प्रमेयत्वादिविशिष्टवह्न्यभाववद्ध्रदात्मकविशिष्टविषयकत्वावच्छिन्नप्रतिबन्धकतायाः स्वानिरूपितेन केवलवह्न्यभाववद्ध्रदविशेष्यकत्वेनाप्यवच्छिन्नत्वात् नोक्तदोषापत्तिः। (१०)प्रकृतपक्षतावच्छेदकरूपेण प्रकृतपक्षे

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



प्रकृतसाध्यतावच्छेदकरूपेण प्रकृतसाध्यवैशिष्ट्यावगाहिनी प्रकृतसाध्यतावच्छेदकरूपेण प्रकृतसाध्यनिरूपितव्याप्तिप्रकारेण प्रकृतहेतुतावच्छेदकरूपेण प्रकृतहेतुवैशिष्ट्यावगाहिनी च या बुद्धिः सा यत्र यद्यवगाहते तत्र तद्वैशिष्ट्यावगाहि यज्ज्ञानं यत्प्रतिबन्धकतानतिरिक्तवृत्ति यादृशविशिष्टनिरूपितविषयतासामान्यं तादृशविशिष्टत्वं हेतुदोषत्वमित्याकारोऽपि उक्तकल्पार्थो निर्वाह्यः पर्वतो वह्निमान् वह्निव्यभिचारिधर्मत्वादित्यादिस्थलसङ्ग्रहाय माथुर्यामुक्तः।

गदाधरचक्रवर्तिनस्तु यद्विषयकनिश्चयस्येत्यादिदीधितिनिबद्धप्रथमकल्पस्यावच्छेदकावच्छेदेन साध्यसिद्धिस्थले (११)यद्विषयकनिश्चयाव्यवहितोत्तरानुमितित्वव्यापको विरोधिविषयताप्रयुक्तो व्यापकत्वविशिष्टसंयोगसंसर्गकवह्निप्रकारकत्वघटितोभयाभावस्तत्त्वरूपमर्थं प्रदर्श्य व्यापकत्वाद्यविशेषितसंयोगसंसर्गकवह्निप्रकारकघटितोभयाभावघटितं साध्यसामानाधिकरण्येन साध्यस्थले निर्दिष्टवन्तः। अवच्छेदकावच्छेदेन साध्यसिद्धौ सामानाधिकरण्येन बाधाव्याप्त्या सामानाधिकरण्येन तत्सिद्धौ च सामानाधिकरण्येन बाधातिव्याप्त्या चोभयैसाधारणलक्षणस्यासंभवस्तैः प्रदर्शितः। एवं मेयत्वविशिष्टव्यभिचारादिवारणाय यथाश्रुतविशिष्टान्तराघटितत्वनिवेशमुपदर्शितव्यभिचारघटितबाधादावव्याप्तिवारणाय परिहृत्य विशिष्टान्तरविषयित्वाप्रयोज्यस्वविषयिताप्रयोज्यतादृशोभयाभावप्रयोजकाभावाधिकरणताकत्वरूपं विशेषणं निवेशितं गादाधर्यम्, तथाच मेयत्वविशिष्टव्यभिचारादिविषयिताप्रयोज्याया उक्तोभयाभावप्रयोजकव्याप्यवयवगाहित्वाभाववत्तायाः शुद्धव्यभिचारादिविषयिताप्रयोज्यत्वनियमेन न मेयत्वविशिष्टव्यभिचारादौ विशिष्टान्तरविषयित्वाप्रयोज्यस्वविषयिताप्रयोज्यनिरुक्तोभयाभावप्रयोजकाभावाधिकरणताकत्वमिति नोक्तदोषप्रसङ्गः। यत्त्वित्यादिना रामभद्रसार्वभौमतममपि निबध्य तत्तुच्छमित्यादिना जगदीशवन्निरस्तम्। पक्षतावच्छेदकविशिष्टे निरुक्तसाध्यहेतुवैशिष्ट्यावगाहिनिश्चयावृत्तिविषयतायाश्च विरोधिविषयतात्वमङ्गीकुर्वतां मतेन (१२)यन्निरूपितताद्दशविषयताशालिनिश्चयोत्तरानुमितित्वव्यापकः उभयाभावस्तत्त्वमित्याद्यर्थश्चोदासीने घटादावतिव्याप्तेर्वारणाया न्यादृशविरोधिविषयताया विवक्षणीयतया भ्रमान्यवृत्तितदीयविषयितासामान्यं तादृशनिश्चयावृत्ति तदीयविषयताया एव विवक्षणेन नि-

Digitized by Arya Samaj Foundation Chennai and eGangotri



र्वाहसम्भवे विरोधियद्विषयताशालिनिश्चयोत्तरानुमितिसामान्ये द्वयो-र्व्यतिरेक इत्यनभिधाय यद्विषयकनिश्चयस्येत्यादिवक्राभिधानस्यानौ-चित्यप्रदर्शनेन निरस्तः ॥ दीधित्युक्तद्वितीयकल्पस्य च घटवद्भूतला-दिरूपोदासीनपदार्थविषयकसमूहालम्बनात्मकपक्षतावच्छेदकावच्छि-न्नविशेष्यकसाध्यतद्व्याप्यहेतुप्रकारकज्ञानविषयकघटवद्भूतलादिज्ञा-नप्रतिबन्धकज्ञानविषयघटाभाववद्भूतलादावतिव्याप्तिं निरसितुं यद्रू-पावच्छिन्ने यद्रूपावच्छिन्नप्रकारकत्ववत्त्वावच्छिन्नं तादृशग्रहत्वव्यापकं तद्रूपावच्छिन्नविशेष्यकतद्रूपावच्छिन्नप्रकारकग्रहत्वावच्छिन्नप्रतिब-ध्यतानिरूपितप्रतिबन्धकतावच्छेदकस्वावच्छिन्ननिरूपितविषयिताक-धर्मवत्त्वरूपोऽर्थो विवक्षितः । तृतीये त्वननुगतकल्पे 'तावदन्या-न्यत्वस्येतरभेदानुमापकत्वमेव न तु दोषपदप्रवृत्तिनिमित्तत्वम्, किन्तु अभावप्रयोजकभ्रमान्यवृत्तिविषयितानिरूपकत्वमेव, अन्यथा निर्वह्नित्वनिशिष्टे वह्निसाधने धूमो दुष्ट इत्यादौ दुष्टपदस्य वह्न्यभाववि-शिष्टनिर्वह्नित्वाद्यवच्छिन्नान्यतमवदर्थकत्वेन निर्वह्नित्वविशिष्टे निर्वह्नेः साधने इत्यादेः प्रसिध्या तस्य हेत्वन्वयिनि निर्वह्नित्वविशिष्टविशे-ष्यकवह्न्यनुमितिप्रयोजकत्वार्थकत्वासम्भवेनान्वितार्थकत्वप्रसङ्गात्' इत्यादिना गदाधरचक्रवर्तिभिरुक्तकल्पे दोषपदार्थविवेचनं विहितम् । पूर्वोक्तेषु च कल्पेषु कश्चित्केचिद्वदन्तीत्यादिपदैरस्वरसस्य प्रदर्श-नाद्दीधितिकारस्यान्तिम एव कल्पे निर्भर इति गदाधरचक्रवर्तिनापि सूचितम् ॥

(१)पक्षधरमिश्रास्त्वालोकाख्ये चिन्तामणिव्याख्याने हेत्वाभास-

---

(१) जयदेवापरसंज्ञाः श्रीपक्षधरमिश्रा दरभङ्गामण्डलान्तर्गते कोराननाम्नि ग्रामे कमलासरित्तटे निवसतो भद्रसेनमिश्रस्य भार्यायां सुमित्रादेव्यां १२७५ ई० वर्षे समजनि । ते च हरिमिश्रविदुषः स्व-पितृव्यस्यैवान्तेवासिनोऽभूवन्—

अधीत्य जयदेवेन हरिमिश्रात् पितृव्यतः ।
तत्त्वचिन्तामणेरित्थमालोकोऽयं प्रकाश्यते ॥

इत्यालोकग्रन्थस्याद्यपद्येनोह्यते । तेषां पाण्डित्यविषय एवमा-भण्यते—

शङ्करवाचस्पत्योः शङ्करवाचस्पती सदृशौ ।
पक्षधरप्रतिपक्षीलक्ष्मीभूतो न च क्वापि ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



सामान्यलक्षणं दुष्टानां हेतूनामेव न तु दोषाणां तृतीयलक्षणस्यैव प्रथमस्यापि ज्ञायमानदोषस्य प्रतिबन्धकत्वमते तादृशाभावप्रतियोगिनां यथार्थज्ञानमिति षष्ठीसमासाङ्गीकारेण तादृशाभावप्रतियोगिप्रकारकयथार्थज्ञानविषयत्वरूपस्यार्थस्य सम्भवान्न कश्चिद्दोष इत्याहुः। अत्र च ज्ञानविषयतावच्छेदकस्य प्रतिबन्धकतावच्छेदकत्वज्ञानेप्यनुमितिप्रतिबन्धकतावच्छेदको विषय एव वेति कल्पद्वयं प्रदर्श्यान्तिमकल्पाभिप्रायेणाग्रिमं लक्षणद्वयमित्युक्त्वा विशेषोऽपि तैरयमवोचि। प्रथमेऽनुमितिप्रतिबन्धकतावच्छेदकधर्मे यथार्थज्ञानविषयत्वमित्यनेन यथार्थपदगर्भमेव तद्वत्त्वं लभ्यत इति व्यर्थविशेषणत्वात्तादृशधर्मवत्त्वमात्रमुपादाय लक्षणान्तरप्रणयनम्। तत्रापि मध्यमे विषयस्यैव प्रतिबन्धकत्वं प्राप्यते न च तत्सम्भवति ज्ञानस्यैव तथात्वादिति चरममाश्रित्य सिद्धान्तः। एवं च सर्वसामञ्जस्ये प्रथमस्य धर्मिलक्षकत्वमुत्तरयोर्व्यभिचारादिधर्मलक्षकत्वं बाधितादौ व्यभिचारत्वादिनैव सामान्यलक्षणेन सङ्ग्रह इत्यादि कल्पनमकल्पनमेवेति।

मिश्राणां दुष्टलक्षणपरेऽप्यत्र व्याख्याने यथार्थपदसार्थक्यसम्भवाज्ज्ञास्वरससम्भावना। अत एवात्र गदाधरमतस्यास्था प्रतीयते। जगदीशतर्कालङ्कारस्तु पक्षवृत्तितया ज्ञायमानस्य बह्वयभावरूपबाधस्य स्वरूपसम्बन्धेनैव यद्यर्थज्ञानं तद्विषयत्वस्य धूमादौ वर्तमानत्वात् पर्वतो वह्निमान्धूमादित्यादावतिव्याप्तिरूपामरुचिं दत्तवान्। तथा च तस्य दुष्टलक्षणपरत्वे निर्भर इति वदामः।

(१)प्रकाशकृदुचिदत्तस्यापि मते 'हेतुवदवभासमान' इति योगाद्दुष्टो धर्म्येव हेत्वाभासपदवाच्य इति तल्लक्षणमाहानुमितीति' प्रतीकस्य

---

एतेषां तार्किकी सृष्टिः—(१) तत्त्वचिन्तामण्यालोकः (२) द्रव्यपदार्थः ( द्रव्यकिरणावलीप्रकाशः ) (३) लीलावतीविवेकः ( लीलावतीप्रकाशटीका )। तर्ककर्कशमतयोऽपीमे साहित्यकलालङ्कृतवाग्विभवा बभूवुरिति तन्निर्मिताभ्यां प्रसन्नराघव-चन्द्रालोकाभ्यामवसीयत इति।

(१)रुचिदत्तमिश्रस्तु जयदेवमिश्रस्य प्रधानशिष्यो त्रयोदशशताब्द्यामलंचकार मिथिलादेशम्। तत्त्वचिन्तामणिप्रकाशः न्यायकुसुमाञ्जलिप्रकाशमकरन्दश्च तत्पाण्डित्यद्योतकरी कृतिरिति इतिहासविदां सम्मतम्।

Digitized by Arya Samaj Foundation Chennai and eGangotri



प्रकरणारम्भे ग्रहणाद्दुष्टधर्मिपरतयैवोक्तलक्षणानां व्याख्यानमित्यवधार्यते। तेन च मण्युक्तप्रथमलक्षणस्य व्यभिचारादिधर्मेऽतिव्याप्तिवारणायानुमितिप्रतिबन्धकपदेन ज्ञानस्यानुमितिप्रतिबन्धकतावच्छेदकधर्मानवच्छिन्नानुमितिप्रतिबन्धकज्ञाने विषयतयाऽवच्छेदकरूपान् व्यभिचारत्वाद्युपाधीनादाय तद्धर्त्वगोचरयथार्थज्ञानविषयत्वरूपं हेत्वाभासत्वं विवक्षितम्। अत्र व्यर्थविशेषणताया द्वितीयतृतीयलक्षणानुसरणस्य बीजत्वं प्रदर्श्य तत्रापि ज्ञानविषयीभूतस्य व्यभिचारादेर्न प्रतिबन्धकत्वं किन्तु तज्ज्ञानस्यैवेत्यपरितोषो द्वितीयलक्षणानुसरणे हेतुः प्रदर्शितः। एतेन व्यभिचारादय उपाधय एव लक्षिताः तद्विषयकत्वेनैव लिङ्गज्ञानस्यानुमितिप्रतिबन्धकत्वात् लक्षणद्वये तत्पदस्य च तद्धस्वपरत्वेन तद्धत्वमर्थः, तेन व्यभिचारादिधर्मे नाव्याप्तिः धर्मिणि लिङ्गे च नासम्भव इति सूचितम्। एवं च रुचिदत्तमते प्रथमस्य लक्षणस्य धर्मिलक्षकत्वमुत्तरयोश्च दोषलक्षकत्वं प्रतीयते द्वितीयमादाय च सिद्धान्तत्वाभिमानस्तेषाम्। इदं च वर्धमानमतेनोक्तन्तेन पक्षधरमिश्रोक्तैतन्मतनिरासससङ्गतिः॥

(१) न्यायसिद्धान्तमुक्तावल्यां यद्विषयकत्वेनेत्यादिना द्वितीयलक्षणमेवोद्धृतम्। शिरोमण्युक्तोऽन्त्यकल्पोपि परिगृहीतः। सत्प्रतिपक्षादीनामनित्यदोषत्वाभिप्रायेण 'परे त्वि'त्यादिना द्वितीयस्यैव लक्षणस्य कल्पान्तरप्रदर्शनं कृतम्। तत्र यथार्थपदवैयर्थ्यं प्रथमलक्षणस्य परित्यागे हेतुः, व्यभिचारादिज्ञानस्यैव प्रतिबन्धकत्वं न तु ज्ञायमानदोषाणामित्यभिमानेन तु तृतीयं परित्यज्य द्वितीयलक्षणमेव विश्वनाथपञ्चाननेन गृहीतमिति दिक्॥

## ( ६ ) उपसंहारः।

एवमनुमानान्ते गङ्गेशोपाध्यायेनोपमानखण्डचिन्तामणौ उपमितितत्करणादीनां विवेचनं कृत्वा चतुर्थे शब्दखण्डे प्रथमं शाब्दबोध-

(१) विश्वनाथन्यायपञ्चाननानामैतिह्यविषयो न्यायचन्द्रिकोपेतायां काशीसंस्कृतपुस्तकमालामुद्रितायां मुक्तावल्या भूमिकायां सविस्तरमस्माभिर्निरूपितस्तत्रैव द्रष्टव्यः। डाक्टरसतीशचन्द्रविद्याभूषणमहोदयैर्निबद्धेन (Indian Logic History) पुस्तकेन ज्ञायते यदुक्तपञ्चाननेन नञ्वादटीका-अलङ्कारपरीक्षा-कारकचक्रन्यायबोधिन्याख्या अपरेऽपि निबन्धा विनिर्मिताः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



प्रमां निरूप्य शब्दप्रामाण्यविचारः सविस्तरमुक्तः। ततश्च शाब्दबोधकारणीभूतानाकाङ्क्षायोग्यताऽऽसत्तितात्पर्यादीन् विविच्य शब्दनित्यतावादिमीमांसकमतखण्डनाय तदनित्यतास्थापनं विहितम्। उच्छिन्नप्रच्छन्नवादेन वेदानां पौरुषेयत्वं च व्यवस्थाप्य विधि-अपूर्व-शक्ति-लक्षणा-समास-आख्यात-धातु-उपसर्गाणां वादास्तदर्थविवेचनद्वारा विप्रतिपत्तिनिरासाय प्रदर्शिताः। प्रामाण्यचतुष्टयप्रामाण्यवादे गौतममतेन प्रमाणचतुष्टयस्योपसंहारेण ग्रन्थसमाप्तिः कृता श्रीमता गङ्गेशोपाध्यायेन। (१)खण्डचतुष्टयेष्वप्युक्तमणेर्व्याख्यानानां बाहुल्येष्वनु-

(१) तत्त्वचिन्तामणेरद्यावदुपलब्धानां साक्षात्परम्पराव्याख्यानानां निघण्टुपत्रम्—

तत्त्वचिन्तामणिर्मूलम्।

1 मणिव्याख्या (कणादतर्कवागीशभट्टाचार्यकृता) 1560 A. D.
2 चिन्तामणिदीधितिः (रघुनाथतार्किकशिरोमणिकृता) 1477–1547 A. P
[1] मणिदीधितिटीका (रामरुद्रतर्कवागीश०) 1700 A.D.
[2] दीधितिप्रकाशिका (गदाधरभट्टाचार्य०) 1650 A.D.
[3] दीधितिटीका (रघुदेवन्यायालंकार०) 1650 A.D.
[4] मणिदीधितिप्रकाशिका (रुद्रन्यायवाचस्पति०) 1700
[5] दीधितिगूढार्थविद्योतनं (जयरामन्यायपंचानन०) 1700 A.
[6] दीधितिप्रकाशिका (जगदीशतर्कालंकार०) 1700A.D.
[7] दीधितिटीका (रामभद्रसार्वभौम०) 1680 A.D.
[8] दीधितिरहस्यम् (मथुरानाथतर्कवागीश०) 1570 A.D.
[9] दीधितिप्रसारिणी (कृष्णदाससार्वभौम०) 1515
[10] दीधितिप्रकाशिका (भवानन्दसिद्धान्तवागीश०) 1625 A,D.
3 तत्त्वचिन्तामणिप्रकाशः(हरिदासन्यायालङ्कार०)1480–1540 AD.
4 अनुमानखण्डटीका (वाचस्पतिमिश्र०) 1450 A.D.
5 चिन्तामणिमयूखः (शङ्करमिश्र०) 1450 A.D.
6 चिन्तामणिप्रकाशः। (वर्धमानोपाध्याय०) 1250 A.D.
7 तत्त्वचिन्तामण्यालोकः (पक्षधरमिश्र०) 1275 A.D.

Digitized by Arya Samaj Foundation Chennai and eGangotri



मानखण्डदीधित्याः प्रायशः पठनपाठनादौ प्रचारस्योपलभ्यमानत्वात् परीक्षासु तद्व्याख्यानप्रकरणानां व्यवस्थापनाच्च काशीस्थचौखम्बा-संस्कृतपुस्तकमालायामनुमानजागदीशीसहितां सा पूर्वं मुद्रिता। अनुमानखण्डदीधितेः गदाधरकृतव्याख्यायास्तु प्रालञ्जलेख स्वरूपसुषमा-गुणपाशवशीभूततार्किकमण्डलीषु सम्प्राप्तपठनपाठनप्रचाराया अद्यापि कात्स्न्र्येनामुद्रितायाः पुस्तकान्वेषणे बहु क्लिश्यन्तोऽन्तेवासिनः समीक्ष्य पुण्यबललाभलालसासमेधितोत्साहवशीकृतान्तःकरणः संस्कृतविद्यानुरागी श्रीयुतहरिदासगुप्तमहोदयानामात्मजः श्रेष्ठि-कुलावतंसः श्रीजयकृष्णदासगुप्तमहोदयः प्रवर्तयामास मुद्रित-पत्रप्रूफपरिशोधनाय महामहोपाध्यायपं०विन्ध्येश्वरीप्रसादद्विवेदि नोऽस्मद्गुरुवरान् म०म० पं० वामाचरणभट्टाचार्यन्यायाचार्यांश्च। महतोऽस्य ग्रन्थस्य परिशोधने भट्टाचार्याणामवकाशाभावादस्मत्सहाध्यायिना न्यायाचार्येण पं० श्रीरामशास्त्रिणा दत्ते साहाय्ये गादाधर्याः संशोधनकार्यं समीचीनतया प्रचलितमासीत्। किन्त्वस्माकं दैवदुर्विपाकवशात् केवलान्वयिप्रकरणपर्यन्तं परिशोध्य

---

[1] त० वि० आलोकारहस्यं ( मथुरानाथ० ) 1570 A.D.
[2] मण्यालोकटिप्पणी ( हरिदासन्यायालंकार० ) 1480–1540
[3] त० चि० आलोककंटकोद्धारः (मधुसूदनठक्कुर०) 1575
[4] आलोकदर्पणः [ महेशठक्कुर० ] 1400
[5] त० वि० आलोकपरिशिष्टम् [ देवनाथठक्कुर० ] 1562
[6] अनुमानालोकप्रसारिणी [ कृष्णदाससार्वभौम० ] 1515
[7] शब्दालोकविवेकः [ गुणानन्दवागीश० ] 1570
[8] प्रत्यक्षालोकसारमंजरी [ भवानन्द० ] 1625
[9] त० वि० आलोकटीका [ गदाधरभट्टाचार्य० ] 1650 A.D.
8 चिन्तामणिप्रकाशः ( रुचिदत्तमिश्र० ) 1275 A.D.
9 त० चिन्तामणिमयूखः [ जगदीशतर्कालङ्कार०। ] 1625 A.D.
10 त० वि० आलोकविवेकः [ जयरामन्यायपंचानन० ] 1700
11 त० चिन्तामणिटीका [ भवानन्दसिद्धान्तवागीश० ] 1625
12 DO [ हरिरामतर्कवागीश० ] 1625 A.D.
13 त० चि० गूढार्थदीपिका [ रघुदेवन्यायालङ्कार० ] 1650
14 त० चिन्तामणिव्याख्या [ गदाधरभट्टाचार्य० ] 1650 A.D.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

२३६६२
६६१
४८ XXI (२) २१



पुरन्दरपुरातिथौ संजाते द्विवेदिमहोदये श्रीरामशास्त्रिणि चोक्तगुरुमहोदयेनैव प्रोत्साहितोऽहं यथामति प्रावर्तिषि गादाधर्याः संशोधने । अस्याश्च वाराणसीस्थराजकीयसंस्कृतपाठशालापुस्तकालयस्थितं तदध्यक्षपण्डितप्रवर श्रीगोपीनाथकविराज एम० ए० महोदयप्रसादेन लब्धं प्रायशोऽशुद्धं विश्वविख्यातवैदुषीविभवानामस्मद्गुरुवरपूज्यपादश्रीमहामहोपाध्यायवामाचरणन्यायाचार्यमहोदयानां वङ्गाक्षरलिखितं च पुस्तकं, चिन्तामणेस्तु चौखम्बामुद्रितं, दीधितेः जीवानन्दमुद्रितमन्यच्च पुस्तकं समासाद्य हेत्वाभासग्रन्थे केवलव्यतिरेक्यर्थापत्तिप्रकरणयोश्च गादाधरीव्याख्याया अभावात् तत्र प्रातःस्मरणीयैः तर्कतीर्थोपाधिसमलङ्कृतैः बटुकनाथशास्त्रिभिरस्मत्तातपादैः कृतं विवरणाख्यव्याख्यानं च सन्निवेश्य योग्यपाठविशेषं च कुण्डल्यन्तर्गतं विधाय यथाबुद्धिवैभवं प्रकाशितोऽसौ महानिबन्धः । दुरवगाहेऽत्र ग्रन्थे अत्रभवतां तातकल्पानां गुरुवर्याणां काशीविद्यालयस्थमुख्याध्यापकानां नैयायिकप्रवराणां म० म० पं० श्रीमदम्बादत्तशास्त्रिणां साहाय्येनैव मया विषमस्थलपारावारतरणमकारीति तदुपकारान्न कदापि विस्मरिष्यामि । तदेवमस्मिन्महति निबन्धजलधावुदुम्बरकीटकल्पेन बहूपराद्धं स्यादिति सम्भावयन् प्रकृतिसुभगशिक्षाभिलाषान्तःकरणो विद्वन्मण्डलीमण्डनायमानान् तार्किकान् साञ्जलिकलिकोपहारं प्रीयतामनेन क्लेशलेशेन कृतज्ञः सर्वान्तर्यामी श्रीजगदीश्वर इत्यभ्यर्थयते—

विदुषामनुचरः

ढुण्ढिराजशास्त्री ।

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Hari

Digitized by Arya Samaj Foundation Chennai and eGangotri

# गादाधरी-दीधितिसहिततत्त्वचिन्तामणेः प्रकरणानां

# सूचीपत्रम्।


| प्रकरणम् | प्रा० पृ० अ० पृ० |
|---|---|
| १ अनुमितिप्रकरणम्। | १–१४० |
| २ व्याप्तिपञ्चकप्रकरणम्। | १४१–१८२ |
| ३ व्यधिकरणधर्मावच्छिन्नाभावप्रकरणम्। | १८३–३३० |
| ४ पूर्वपक्षप्रकरणम्। | ३३१–३९० |
| ५ सिद्धान्तलक्षणप्रकरणम्। | ३९१–४७८ |
| ६ अवच्छेदकत्वनिरुक्तिप्रकरणम्। | ४७९–५२६ |
| ७ सामान्याभावप्रकरणम्। | ५२७–५५९ |
| ८ विशेषव्याप्तिप्रकरणम्। | ५६०–६१८ |
| ९ अतएवचतुष्टयप्रकरणम्। | ६१९–६३४ |
| १० व्याप्तिग्रहोपायप्रकरणम्। | ६३५–६७४ |
| ११ तर्कप्रकरणम्। | ६७५–७३६ |
| १२ व्याप्त्यनुगमप्रकरणम्। | ७३७–७७१ |
| १३ सामान्यलक्षणाप्रकरणम्। | ७७२–८७६ |
| १४ उपाधिप्रकरणम्। | ८७७–१०७८ |
| १५ पक्षताप्रकरणम्। | १०७९–११७६ |
| १६ परामर्शप्रकरणम्। | ११७७–१३२५ |
| १७ केवलान्वयिप्रकरणम्। | १३२६–१३८८ |
| १८ केवलव्यतिरेकिप्रकरणम्। | १३८९–१४३४ |

Digitized by Arya Samaj Foundation Chennai and eGangotri




| प्रकरणम् | प्रा० पृ० अ० पृ० |
|---|---|
| १९ अर्थापत्तिप्रकरणम् । | १४३५–१४६० |
| २० अवयवप्रकरणम् । | १४६१–१५७८ |
| २१ सामान्यनिरुक्तिप्रकरणम् । | १५७९–१६३६ |
| ६१९ अभावबुद्धेर्भावधीप्रतिबन्धकत्वव्यवस्थापनम् । | १९२१ | ६४२ |
| ६२० बाधविभागवर्णनम् । | १९२१ | ६४३ |
| ६२१ दीधितौ बाधस्यासङ्कीर्णोदाहरणासम्भवान्न पृथक्त्वमित्यभिप्रायेण शङ्कावर्णनम् । | " | ६४४ |
| ६२२ आशङ्कासमाधानम् । | १९२६ | ६४५ |
| ६२३ बाधग्रन्थोपसंहारप्रदर्शनम् । | १९२८ | ६४६ |
| (३०) असाधकतासाधकत्वप्रकरणे | | ६४७ |
| ६२४ हेत्वाभासानामसाधकतासाधकत्वनिरूपणे संगतिप्रदर्शनम् । | १९२९ | ६४८ |
| ६२५ असाधकतासाधकत्वस्य सदुत्तरत्वे आक्षेपः । | " | ६४९ |
| ६२६ उक्ताक्षेपपरीहारः । | " | ६५० |
| ६२७ कथकत्वाविरोधापादनार्थमसाधकता व्याप्त्युपस्थितेरावश्यकत्वम् । | १९३१ | ६५१ |
| ६२८ असाधकतासाधकत्व पूर्वपक्षपक्षकथनम् । | १९३१ | ६५२ |
| ६२९ तत्र चार्वाकमत प्रदर्शनं तत्खण्डनञ्च । | १९३१ | ६५३ |
| ६३० पूर्वपक्षीयासाधकतासाधकत्वान्तरनिरसनम् । | १९३१ | ६५४ |
| ६३१ उच्यत इत्यादिना सिद्धान्तेऽसाधकतासाधकत्वविवेचनम् । | १८३ | ६५५ |
| ६३२ स्वज्ञानकालस्य विशेषणत्वाभिप्रायेणोक्तसिद्धान्तसङ्गमनम् । | १९३ | ६५६ |
| ६३३ स्वज्ञानकालस्य साध्ये निवेशमंगीकुर्वतां मतस्यखण्डनम् । | १९३ | ६५७ |
| ६३४ अन्येत्वित्यादिनोक्तस्थले मतान्तरप्रदर्शनम् । | १९३ | ६५८ |
| ६३५ गादाधर्यामसाधकतासाधकत्वप्रकरणस्य समाप्तिः । | १९४ | ६५९ |




CC-0. In Public Domain. Gurukul Kangri Coll

Digitized by Arya Samaj Foundation Chennai and eGangotri



## (३१) ईश्वरवादप्रकरणे ।


| | विषयः | पृ० |
|---|---|---|
| ६३६ | अनुमाननिरूपणप्रयोजनीभूतेश्वरसिद्ध्यनुमानम् । | १९४१ |
| ६३७ | उक्तसिद्धान्त्यनुमाने पक्षाक्षेपद्वारेश्वरसिद्धावाक्षेपः । | ,, |
| ६३८ | ,, साध्याक्षेपद्वारेश्वरेसिद्धावाक्षेपः । | १९४२ |
| ६३९ | मतान्तरेण पक्षसाध्यनिर्वचनम् । | १९४५ |
| ६४० | उक्तपक्षसाध्यनिर्वचनखण्डनम् पूर्वपक्षिमतेन । | ,, |
| ६४१ | व्याप्तिबलेन साध्यसिद्धिप्रदर्शनं तत्खण्डनञ्च । | १९४६ |
| ६४२ | सर्गाद्यकालीनद्व्यणुकपक्षकानुमानेनेश्वरसिद्धिप्रदर्शनम् । | १९४७ |
| ६४३ | उक्तानुमानखण्डनम् । | ,, |
| ६४४ | उक्तानुमाने कार्यत्वरूपहेतोः खण्डनम् । | ,, |
| ६४५ | पक्षधर्मतावलाच्चित्यज्ञानसिद्धिद्वारेश्वरसाधकानुमानम् । | १९४८ |
| ६४६ | उक्तानुमानखण्डनम् । | १९४९ |
| ६४७ | मनःक्रियापक्षकानुमानेनेश्वरसिद्धिप्रदर्शनम् । | ,, |
| ६४८ | उक्तानुमानाक्षेपकथनम् । | ,, |
| ६४९ | अत्रोच्यत इत्यादिना सिद्धान्त्यनुमानत्रयनिष्कर्षप्रदर्शनम् । | १९५० |
| ६५० | निष्कृष्टसिद्धान्त्यनुमानत्रयपक्षव्यवस्थापनम् । | १९५१ |
| ६५१ | पक्षेऽदृष्टाद्वारकविशेषणवैयर्थ्याक्षेपसमाधानम् । | १९५२ |
| ६५२ | साध्ये उपादानपदविचारः । | ,, |
| ६५३ | पक्षेप्युपादानपदसार्थक्यप्रदर्शनम् । | १९५४ |
| ६५४ | साध्यसंदेहवति हेतुनिश्चयस्यादोषत्वकथनम् । | १९५५ |
| ६५५ | साध्ये ज्ञानादीनां विशेषणत्वेन विशिष्टसाधनविवक्षया-ऽस्मदादिनार्थान्तरनिरसनम् । | ,, |
| ६५६ | उक्तसिद्धान्त्यनुमानत्रयस्य साध्येष्वर्थान्तरत्वशंका । | १९५६ |
| ६५७ | उक्ताशंकानिरसनम् । | ,, |
| ६५८ | सिद्धान्त्यनुमाने दृष्टान्ते साध्यवैकल्याक्षेपप्रदर्शनम् । | १९५७ |
| ६५९ | उक्ताक्षेपखण्डनम् । | १९५८ |
| ६६० | मतान्तरेण साध्यार्थप्रदर्शनद्वारेश्वरकर्तृत्वसिद्धिप्रदर्शनम् । | १९५९ |
| ६६१ | ईश्वरे द्वेषोपि स्यादित्याक्षेपस्य समाधानम् । | १९६० |
| ६६२ | भावकार्ये समवेतमिति व्याप्त्या कृतिविशेषकार्यविशेषयोरन्वयव्यतिरेकग्रहस्य सामान्येन तद्व्याप्तिग्रहे उपा- | |

Digitized by Arya Samaj Foundation Chennai and eGangotri




| | विषयः | पृ० |
|---|---|---|
| | यत्वकथनद्वारेश्वरसिद्धिकथनम् । | १९६३ |
| ६६३ | दृष्टान्ते विरुद्धकर्तृसहचारदर्शनात्सिद्धान्त्यनुमाने विरुद्धत्वशङ्कानिरसनम् । | १९६५ |
| ६६४ | सिद्धान्त्यनुमाने बाधोपाध्योः प्रदर्शनम् पूर्वपक्षिमतेन । | १९६७ |
| ६६५ | बाधोपाध्योः खण्डनद्वारा हस्तादिव्यापारनिरपेक्षस्येश्वरस्य क्षित्यादिकर्तृकत्वसिद्धिकथनम् । | १९६७ |
| ६६६ | कर्ता शरीर्येव ज्ञानमनित्यमेवेत्यादिव्याप्तिप्रत्यक्षविरोधान्नाशरीरनित्यज्ञानादिमत्कर्तृसिद्धिरिति पूर्वपक्षः । | १९६८ |
| ६६७ | उक्तपूर्वपक्षखण्डनम् । | १९७० |
| ६६८ | उक्तपूर्वपक्षस्य गङ्गेशोपाध्यायाभिमतं खण्डनम् । | १९७१ |
| ६६९ | नव्यमतेन ज्ञानमनित्यमेवेति व्याप्तिज्ञानस्याकिंचित्करत्वकथनम् । | १९७३ |
| ६७० | सिद्धान्त्यनुमाने शरीरजन्यत्वरूपोपाधिप्रदर्शनद्वाराक्षेपः । | १९७४ |
| ६७१ | उक्ताक्षेपसमाधानम् । | १९७५ |
| ६७२ | उक्तोपाध्यभिप्रायेणैव साध्यव्यापकताग्राहकाशङ्का । | १९७७ |
| ६७३ | उक्ताशङ्कासमाधानम् । | ,, |
| ६७४ | उपाधिखण्डनप्रदर्शनपूर्वकं सत्प्रतिपक्षाशङ्काखण्डनम् । | १९७८ |
| ६७५ | ज्ञानस्यानित्यतासाधकानामनुमानानां खण्डनम् । | १९८० |
| ६७६ | सत्प्रतिपक्षानुमाने साध्यादिखण्डनम् । | ,, |
| ६७७ | सिद्धान्त्यनुमानेपि प्रतिबन्ध्योपाधिशङ्का । | १९८१ |
| ६७९ | उक्तोपाधिनिर्वचनं यत्त्वित्यादिना । | १९८४ |
| ६८० | उक्तोपाधिनिरसनमुच्यत इत्यादिना । | १९८६ |
| ३८१ | व्याप्यतावच्छेदकविचारः । | १९८७ |
| ६८२ | नीलधूमे व्याप्यत्वासिद्धिविचारः । | १९८९ |
| ६८३ | प्राचां मतेन व्याप्यतावच्छेदकविचारः । | १९९१ |
| ६८४ | ईश्वरस्यैकत्वानेकत्वयोः संशयेनैककर्तृसिद्धावाक्षेपः । | १९९३ |
| ६८५ | उक्ताक्षेपनिरासद्वारैकत्वसाधनप्रदर्शनम् । | ,, |
| ६८६ | मतान्तरेणककर्तृसाधकानुमानस्य खण्डनम् । | १९९५ |
| ६८७ | नित्यसर्वविषयज्ञानसिद्धिः । | ,, |
| ६८८ | नव्यमते उक्तविधज्ञानासिद्धिप्रदर्शनम् । | १९९९ |

| | विषयः | पृ० |
|---|---|---|
| ६८९ | वाचस्पतिमतेन ज्ञानमनित्यमेवेत्यादिव्याप्तिज्ञानस्याकिंचित्करत्वकथनम् । | १९९९ |
| ६९० | ईश्वरसिद्धौ कार्यत्वहेतोः स्वरूपासिद्धिशङ्का । | २००० |
| ६९१ | उक्तासिद्धिसमाधानम् । | २००१ |
| ६९२ | ईश्वरसिद्धौ प्रयोजनवत्त्वहेतोः स्वरूपासिद्धिशङ्का । | २००२ |
| ६९३ | प्रयोजनवत्त्वहेतोः स्वरूपासिद्धिसमाधानम् । | २००३ |
| ६९४ | वस्तुतः प्रयोजनवत्त्वहेतोः स्वरूपासिद्धिसमाधानम् । | २००४ |
| ६९५ | अशरीरत्वहेतोः स्वरूपासिद्धिशङ्का । | २००५ |
| | निरवयवत्वहेतोः स्वरूपासिद्धिशङ्का । | २००६ |
| ६९६ | प्रतिबन्धासिद्धिशङ्का । | २००७ |
| ६९७ | ईश्वरसिद्धौ विशेषणासिद्धिशङ्का । | २००८ |
| ६९८ | ईश्वरसिद्धौ विशेष्यासिद्धिशङ्का । | २००९ |
| ६९९ | शरीरजन्यत्वरूपोपाधिप्रदर्शनद्वाराक्षेपः । | २०१० |
| ७०० | मतान्तरेण शरीरजन्यत्वरूपोपाधिप्रदर्शनद्वाराक्षेपः । | २०११ |
| ७०१ | उक्ताक्षेपसमाधानम् । | २०१२ |
| ७०२ | विरुद्धकर्तृसहचारदर्शनात्सिद्धान्त्यनुमाने विरुद्धत्वशङ्कानिरसनम् । | २०१३ |
| ७०३ | उक्तोपाध्यभिप्रायेणैव साध्यव्यापकताग्राहकाशङ्का । | २०१४ |
| ७०४ | उक्ताशङ्कासमाधानम् । | २०१५ |
| ७०५ | उपाधिखण्डनप्रदर्शनपूर्वकं सत्प्रतिपक्षाशङ्काखण्डनम् । | २०१६ |
| ७०६ | ज्ञानस्यानित्यतासाधकानामनुमानानां खण्डनम् । | २०१७ |
| ७०७ | सत्प्रतिपक्षानुमाने साध्यादिखण्डनम् । | २०१८ |
| ७०८ | सिद्धान्त्यनुमानेपि प्रतिबन्ध्योपाधिशङ्का । | २०१९ |
| ७०९ | उक्तोपाधिनिर्वचनं यत्त्वित्यादिना । | २०२० |
| ७१० | उक्तोपाधिनिरसनमुच्यत इत्यादिना । | २०२१ |
| ७११ | व्याप्यतावच्छेदकविचारः । | २०२२ |


CC-0. In Public Domain. Gurukul Kangri Collection

Digitized by Arya Samaj Foundation Chennai and eGangotri




| पृ० | | विषयः | पृ० |
|---|---|---|---|
| १९६३ | ६८२ | वाचस्पतिमिश्रमतेन नित्यज्ञानसिद्धिः । | ,, |
| | ६९० | ईश्वरस्य जगन्निर्मातृत्वे आक्षेपः । | ,, |
| १९६५ | ६९१ | उक्ताक्षेपसमाधानम् । | १९९७ |
| १९६७ | ६९२ | ईश्वरस्य सर्वज्ञत्वे भ्रान्तत्वापत्तिरित्याक्षेपसमाधानम् । | ,, |
| | ६९३ | प्रयोजनाभावादीश्वरस्य प्रवृत्त्यभाव इत्याक्षेपस्य खण्डनम् । | ,, |
| १९६७ | ६९४ | वस्तुतस्त्वित्यादिनोक्ताक्षेपस्य समाधानान्तरम् । | १९९८ |
| | ६९५ | अशरीरात्कथं वेदघटादिशब्दव्यवहारसम्प्रदाय इत्याक्षेप-निराकरणम् । | ,, |
| १९६८ | | | |
| १९७० | ६९६ | प्रतिसर्गाद्यनन्तसर्वज्ञकल्पने गौरवप्रदर्शनम् । | १९९९ |
| १९७१ | ६९७ | ईश्वरज्ञानमूलकशब्दशक्तिग्रहेऽपि भ्रमासम्भवप्रदर्शनम् । | २००० |
| | ६९८ | ईश्वरेऽनुमानवत् श्रुतिस्मृत्योरपि प्रमाणत्वेन कथनम् । | ,, |
| १९७३ | | (३२) शक्तिवादप्रकरणे । | |
| १९७४ | ६९९ | शक्तिसाधकानुमानप्रकारः पूर्वपक्षिमतेन । | २००१ |
| १९७५ | ७०० | मण्यभावस्य दाहहेतुत्ववादिनां प्राचां मतम् । | २००२ |
| १९७७, | ७०१ | उक्तमतखण्डनम् । | २००३ |
| ,, | ७०२ | विशेष्यविशेषणोभयाभावव्यापकस्य प्रतिबन्धकाभावस्यानुगतस्य दाहहेतुत्वव्यवस्थापनम् प्राचीनमतेन । | २००४ |
| १९७८ | | | |
| १९८० | ७०३ | उक्ताभावस्य तुरीयसंसर्गाभावत्वांगीकारः । | ,, |
| ,, | ७०४ | तुरीयसंसर्गाभावस्वीकारे विभागव्याघातापत्त्या ध्वंसात्यन्ताभावयोस्तस्यान्तर्भावः । | २००५ |
| ११८१ | | | |
| १९८४ | ७०५ | पूर्वपक्षिमतेनाननुगतत्वादुक्ताभावयोर्दाहहेतुत्वखण्डनम् । | ,, |
| १९८६ | ७०६ | तत्तदुत्तेजकाभावानामनुगतत्वाभावाद्धेतुत्वासम्भवप्रदर्शनम् । | २००७ |
| १९८७ | | | |
| १९८९ | ७०७ | अतिरिक्तविशिष्टाभावस्यासम्भवप्रदर्शनम् । | २००८ |
| १९९१ | ७०८ | विशिष्टाभावस्थापनद्वारा प्रतिबन्धकोत्तेजकाभावयोः सम्बन्धाभावस्य दाहहेतुत्वव्यवस्थापनं सिद्धान्तिमतेन । | ,, |
| १९९३ | ७०९ | प्रकारान्तरेणाननुगमदोषपरिहारद्वारा प्रतिबन्धकाभावस्य दाहहेतुत्वस्थापनम् । | २००९ |
| ,, | | | |
| १९९५ | ७१० | प्रतिबन्धकाभावस्य दाहहेतुत्वाक्षेपसमाधानम् । | २०१० |
| ,, १९९६ | ७११ | यद्वेत्यादिना प्रतिबन्धकत्वावच्छिन्नप्रतियोगताकाभा- | |

Digitized by Arya Samaj Foundation Chennai and eGangotri




| | विषयः | पृ० |
|---|---|---|
| | वस्यैव दाहहेतुत्वकथनम् । | " |
| ७१२ | स्वमतेन संसर्गाभावादिनिर्वचनद्वाराऽभावस्य दाहहेतुत्वकथनम् । | २०१ |
| ७१३ | संसर्गाभावविचारः । | " |
| ७१४ | विशेषणाभावादावनुगतहेतुत्वसंभवाद्दाहवैजात्याङ्गीकारे बाधप्रदर्शनम् । | २०१ |
| ७१५ | प्रतिबन्धकाभावस्य कारणतावच्छेदकत्वमङ्गीकुर्वतां मुरारिमिश्राणां मतम् । | २०१ |
| ७१६ | उक्तमतखण्डनम् । | " |
| ७१७ | शक्तिसाधकानुमानप्रयोगाणां पूर्वपक्षिमतेन प्रदर्शनम् । | २०२ |
| ७१८ | उक्तानुमानानामप्रयोजकत्वाभिप्रायेण खण्डनम् । | २०२ |
| ७१९ | तृणादीनां वह्नौ कारणत्वादेकशक्तिमत्त्वाङ्गीकारेण शक्तिसिद्धिप्रदर्शनं पूर्वपक्षमतेन । | २०२ |
| ७२० | पूर्वपक्ष्यैकदेशिमतखण्डनं पूर्वपक्षिमतेन । | २०२ |
| ७२१ | तृणाद्यानन्त्यादनन्तशक्तिकल्पने गौरवमित्यभिप्रायेणोक्तपूर्वपक्षनिरासः । | २०२ |
| ७२२ | अत्र तटस्थाशङ्कापरिहारः । | २०२ |
| ७२३ | व्रीहिप्रोक्षणादिजन्याऽऽधेयशक्तिस्वीकारे पूर्वपक्षिमतेन युक्तिप्रदर्शनम् । | २०३ |
| ७२४ | उक्तयुक्तिखण्डनद्वाराधेयशक्तिनिरासः । | २०३ |
| ७२५ | यद्वेत्यादिनोत्तरान्तरम् । | २०३ |
| ७२६ | स्वमतेनाधेयशक्तिनिराकरणप्रकारः । | २०३ |
| ७२७ | नैयायिकमतेन शक्तिपदार्थनिर्वचनम् । | २०४ |
| ७२८ | अथवेत्यादिना शक्त्यपरपर्यायस्य कारणत्वस्य निर्वचनम् । | २०४ |
| ७२९ | कारणत्वस्य लक्षणान्तराणां कथनम् । | २०४ |
| ७३० | त्रिविधान्यथासिद्धिप्रदर्शनम् । | " |
| ७३१ | कुसुमाञ्जलिप्रकाशोक्तपञ्चविधान्यथासिद्धानामेष्वेवान्तर्भावकथनम् । | २०५ |
| ७३२ | अनन्यथासिद्धनियतपूर्ववर्तित्वरूपकारणत्वस्य खण्डनम् । | २०५ |


CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



## (३३) मुक्तिवादप्रकरणे ।


| | विषयः | पृ० |
|---|---|---|
| ७३३ | अनुमानपरमप्रयोजनस्यापवर्गस्य लक्षणम् । | २०५५ |
| ७३४ | उक्तलक्षणमोक्षस्य पुरुषार्थत्वाक्षेपः । | २०५६ |
| ७३५ | उक्ताक्षेपसमाधिः । | २०५७ |
| ७३६ | मतान्तरेण दुःखप्रागभावासहवृत्तिदुःखसाधनध्वंसस्य मुक्तित्वम् । | २०५९ |
| ७३७ | उक्तमुक्तौ दुःखप्रागभावसत्त्वे आक्षेपः । | २०६० |
| ७३८ | उक्ताक्षेपपरिहारः । | २०६१ |
| ७३९ | उक्तमुक्तौ दुःखप्रागभावस्वासत्त्वव्यवस्थापनम् । | २०६२ |
| ७४० | दुःखात्यन्ताभावस्यैव मुक्तित्ववादिनामन्येषां मतम् । | २०६३ |
| ७४१ | प्राभाकरमतेनात्यन्तिकदुःखप्रागभावस्यैव मोक्षत्वप्रदर्शनम् | २०६५ |
| ७४२ | उक्तप्राभाकरमतखण्डनम् । | ,, |
| ७४३ | वेदान्तिमतेन दुःखाभावस्य पुरुषार्थत्वे आक्षेपः । | २०६६ |
| ७४४ | उक्ताक्षेपसमाधानम् । | ,, |
| ७४५ | अवेद्यतया दुःखाभावस्यापुरुषार्थत्वमित्याशङ्कासमाधानम् | २०६७ |
| ७४६ | दुःखाभावरूपमुक्तिसाधकानुमानप्रयोगप्रदर्शनम् । | २०६८ |
| ७४७ | उक्तमुक्तौ श्रुतिप्रमाणकथनम् । | ,, |
| ७४८ | आचार्यमतेना'शरीरं वा' इत्यादिश्रुतिप्रमाणकथनं तदर्थकथनं च । | २०६९ |
| ७४९ | लीलावतीकारमतेन मुक्तिपदार्थस्य खण्डनम् । | २०७० |
| ७५० | वेदान्त्येकदण्डिमतोक्तापवर्गस्य खण्डनम् । | २०७१ |
| ७५१ | त्रिदण्डिवेदान्तिनां मुक्तेर्निरसनम् । | २०७२ |
| ७५२ | मतान्तरोक्तमुक्तिपदार्थस्य खण्डनम् । | ,, |
| ७५३ | उक्तमुक्तौ सर्वाश्रमिणामधिकार इति सप्रमाणनिरूपणम् । | २०७३ |
| ७५४ | ज्ञानवत्कर्मणोपि मुक्तौ हेतुत्वकथनम् । | २०७४ |
| ७५५ | ज्ञानकर्मणोस्तुल्यतया मुक्त्यर्थत्वे गीतादिप्रमाणप्रदर्शनम् । | २०७५ |
| ७५६ | आरादुपकारकं कर्म संनिपत्योपकारकं तत्त्वज्ञानमेवेत्याचार्यमतप्रदर्शनम् । | २०७७ |
| ७५७ | समुच्चयवादिमतेनाचार्यमतखण्डनम् । | ,, |

Digitized by Arya Samaj Foundation Chennai and eGangotri




| | विषयः | पृ० |
|---|---|---|
| ७५८ | अत्र वदन्ति इत्यादिना तत्त्वज्ञानमात्रादेवापवर्गइति स्थापनम् । | २०७८ |
| ७५९ | कर्मणामपि तत्त्वज्ञाननैरपेक्ष्येण मुक्तिहेतुत्वमित्यभिप्रायेणाक्षेपः । | २०७९ |
| ७६० | उक्ताक्षेपसमाधिः । | २०७९ |
| ७६१ | कर्मस्थलेऽपि तत्त्वज्ञानस्यावश्यकत्वात्तत एवापवर्ग इति व्यवस्थापनम् । | ,, |
| ७६२ | मुक्तिवादस्योपसंहारः । | २०८१ |

७६२ विषयसंख्या २०८४ पत्र संख्या

Digitized by Arya Samaj Foundation Chennai and eGangotri



(प्रका० ) *ईश्वराननुमानाच्चेति* । यद्यपि मन्वादिशरीरारम्भक-द्व्यणुकादिकर्तृत्वेनेश्वरानुमानं स्यादेव । तथापीश्वरस्याप्यावश्यकत्वा-त्किं मन्वादिनेति भावः । विश्वतश्चक्षुः-विश्वविषयकसाक्षात्कारवान्, विश्वतोमुखः-विश्वविषयकवचनवान् । विश्वतोबाहुः-विश्वविषयक-प्रयत्नवान्, विश्वतस्पात् विश्वव्यापी, बाहुभ्यां-धर्माधर्माभ्यां, संपतत्रैः-परमाणुभिः, संधमति-संयोजयति । किमर्थमित्यत आह द्यावाभूमी सं-जनयन् । द्यावेत्यूर्द्धलोकसप्तकं भूमीत्यधोलोकसप्तकमुपलक्षितम । संद्वयं व्यवहिताश्चेति सूत्रेण धमजननाभ्यामन्वीयते । स्मृतिविरोधेन श्रुतेर-न्यपरत्वमाशङ्क्य तद्विरोधमेव दर्शयति *उत्तम इति* ।

॥ इत्यनुमानखण्डावशिष्टांशचिन्तामणिव्याख्यानप्रकाशे ईश्वरवादः ॥

(चि०)स्यादेतत् ईश्वरवत कार्येणैव शक्तिरप्यनुमी-यते, तथाहि यादृशादेव करतलानलसंयोगादाहो जायते तादृशादेव सति प्रतिबन्धके न जायते, अतो यदभावात् कार्य्याभावस्तद्ध्रुवादावभ्युपेयं तेन विना तदभावाय-त्तदाहाभावानुपपत्तेर्व्यतिरेकमुखेन शक्तिसिद्धिः । न चा-दृष्टवैगुण्यम्, दृष्टसाद्गुण्ये तदभावात्, तस्य तदर्थत्वात् । अन्यथा दृढदण्डनुन्नमपि चक्रं न भ्राम्येत् । अथादृष्ट-विलम्बादपि विलम्बो यथा वन्ध्यास्त्रीसंप्रयोगे परमाणु-कर्म्मणि अध्ययनतुल्यत्वेऽपि एकत्र फलाभावे चेति चेन्न । अदृष्टविलम्बो हि न तन्नाशानुत्पादौ, मण्यपसा-रणानुपदं दाहाभावप्रसङ्गात् । किञ्च नियमतो मणिसद्भा-वे कार्य्याभावस्तदभावे कार्यमिति दृष्टत्वात् मण्याद्यभाव एव कारणम्, अन्यथा कदाचित् मण्याद्यभावेऽपि तदभावान्न कार्य्यं स्यात्, बन्ध्यासंप्रयोगे तु दृष्टव्य-भिचाराददृष्टविलम्बादेव विलम्बः । अदृष्टञ्च क्वचित् साक्षाज्जनकम्, अन्यथा परम्परया हेतुरपि न स्यात् । न च समप्रज्ञयोः समञ्च(१) निरपवादमभ्यस्यतोरेकः प्रग-

(१) निरन्तरमिति पाठान्तरम् ।

Digitized by Arya Samaj Foundation Chennai and eGangotri



लभो नापर इति दृश्यते । न च सर्वोत्पत्तिमतामदृष्टं नि
मित्तकारणम्, अगम्यागमनसाध्ये सुखे तदभावा
तद्धि नोऽधर्मात् सुखत्वात् नापि धर्मात् । तेन(१
अगम्यागमनमुत्पाद्य सुखमुत्पादनीयम्, तथा च
गम्यागमनकारणत्वेन न स धर्मः, श्येनापूर्ववन्निषिद्धफल
कत्वेनानर्थकत्वात्। दाहप्रतिकूलादृष्टादेव दाहाभाव इ
चेन्न । तस्योत्तेजकाभावसहितमण्यजन्यत्वे तत्राऽदाह
र्थिनोऽप्रवृत्तिप्रसङ्गात् । तज्जन्यत्वेऽपि तदुत्पादक
देव दाहाभाव इति किमदृष्टेन, प्रथमोपस्थितत्वादुपर्ज
व्यत्वाच्च । प्रतिबन्धकाभावहेतुत्वस्य तेनाभ्युपगमा
अदृष्टोत्पत्तौ शौचाचमनादेः साधारणस्याप्यन्वय
स्यात्, अशुचेरेव तदुत्पत्तौ शौचे सति तदभावापत्ते,
तिपक्षसन्निधापकादृष्टस्यैव प्रतिबन्धकत्वे सति मण्यप्र
गेऽपि दाहानापत्तिः अग्रिमकाल एव सन्निधिदर्शनेन त
सिद्ध्यभावात् । अस्तु तर्हि उत्तेजकाभावसहकृतप्रति
न्धकाभावस्यान्वयव्यतिरेकाभ्यां हेतुत्वम् । एवं केवल
त्तेजकसद्भावे उभयसत्त्वे उभयाभावे च विशिष्टभावो
नुगतो हेतुः । प्रतिबन्धकत्वञ्च कारणीभूताभावप्रतियो
गित्वं, तच्च मण्याद्यभावत्वेन न तु प्रतिबन्धकाभावत्वे
ति नान्योन्याश्रयः । अत एव प्रतिबन्धकत्वाभिमतमण्य
दीनामभावकूट एव कारणं तेन मणिसद्भावे मन्त्रा
भावेऽपि न कार्य्यम् । अनतिरिक्ताभाववादिमते च व्य
वहारार्थं तत्स्थानाभिषिक्तस्य हेतुत्वम् । न चाभावो
कारणम्, भावचक्तद्ग्राहकतौल्यात् । दृष्टश्च कुड्यसंयो
भावस्य गतौ, अनुपलम्भस्याभावविज्ञाने, विहिताक

(१) तद्धिनाऽधर्मात्सुखं स्यात् न धर्मात्...एतेनेति पाठान्तरम्।

Digitized by Arya Samaj Foundation Chennai and eGangotri



णस्य प्रत्यवाये, निर्दोषत्वस्य वेदप्रामाण्ये जनकत्वमिति प्राञ्चः ।

मैवम् । विशिष्टं हि नार्थान्तरं येन तदभावोऽनुगतः स्यात्, किन्तु विशेषणविशेष्यसम्बन्धा इति तेषां प्रत्येकाभावस्य हेतुत्वे क्वचित् विशेषणमण्यभावः क्वचिदुत्तेजकाभावरूपविशेषणाभावः-क्वचिदुभयं कारणमिति व्यभिचारान्नैकमपि हेतुः स्यात् ।

(प्रका०) प्रसङ्गादाह *स्यादेतदिति* । *कार्येणैवेति* । यथा अनुमयित इति नैयायिकदिशा उपदर्शिताया अर्थापत्तेः पृथक्त्वेन स्वयं स्वीकारादिति ध्येयम् । नन्वेवं कार्येण न तदुन्नयनं किन्तु कार्याभावेनेत्यत आह *व्यतिरेकेति* । व्यतिरेकनिरूपकतया तत्प्रयोजकमित्यर्थः। तस्य-अदृष्टस्य, तदर्थत्वात्-दृष्टसाहुप्यार्थत्वात्,तथा च दृष्टसाहुप्यमेवादृष्टसाहुप्ये मानमिति भावः । *परमाण्विति* । खण्डप्रलये परमाणुकर्मणि सत्यपि यथा न द्व्यणुकारम्भकसंयोग इत्यर्थः । पूर्वादृष्टस्य नाशादग्रिमस्योत्पादकाभावाद्दाहो न स्यादित्याह *मण्यपसारणेति । न च मण्यपसारणेनैव तदाऽदृष्टमुत्पद्यत इति वाच्यम् । तस्य विहितनिषिद्धेतरत्वेन तदजनकत्वादिति भावः । *मण्याद्यभाव एवेति* । इदं चादृष्टकारणतानिरासमात्राभिप्रायेणापाततः, वस्तुतोऽस्यापि न कारणत्वमित्यग्रे वक्ष्यति । तदभावात्-अदृष्टाभावात् । वन्ध्येत्युपलक्षणम् । परमाणुकर्मणीत्यपि द्रष्टव्यम् । नन्वदृष्टं दृष्टोपसंहारद्वारैव सर्वत्र जनकं न तु साक्षादित्यत आह *अदृष्टं चेति । *अन्यथेति* । द्वारे तस्य साक्षाज्जनकत्वं स्वीकार्यमेव तत्रापि द्वारान्तरापेक्षायामनवस्थानादिति भावः । *नचेति* । तथाच दाहेपि तदेव जनकमिति भावः । *श्येनेति* । चोदनालक्षणोऽर्थो धर्म इत्यर्थपदेन श्रेयस्कारार्थकेन इयेनापूर्वमनर्थरूपं व्यावृत्तं तस्य निषिद्धशत्रुवधजनकत्वेनाश्रेयस्करत्वात् , तद्वदयमपि न धर्म इत्यर्थः । *दाहप्रातिकूलेति* । नियताग्निसाध्यदाहप्रतिकूलमेवादृष्टमुत्पाद्यत इति नाग्न्यन्तरजन्यदाहप्रतिबन्ध इति भावः । दोषान्तरमाह-*अदृष्टेति* । *अशुचेरिति* । वामागमादौ तथा दर्शनादिति भावः । उभयसत्त्वे-उत्तेजकप्रतिबन्धकसत्त्वे । *तच्चेति* । कारणत्वमित्यर्थः । मणिसद्भावे-उत्तेजकाभावविशिष्टमणिसद्भावे ।

(चि०)स्यादेतत् प्रतियोगिभेदादिवत् प्रतियोगितावच्छे-

Digitized by Arya Samaj Foundation Chennai and eGangotri



दकविशेषणभेदेऽप्यभावो भिद्यते, अन्यथा पृथिव्यादिन्र
यप्रत्येकरूपाभावेऽवगतेऽपि वायौ रूपसंशयो न स्यात् ।
एवञ्च यथा केवलदण्डसद्भावे दण्डपुरुषसद्भावे द्वयाभावे
च विशेषणविशेष्योभयाभावप्रयुक्तः केवलपुरुषाभावो
ऽबाधितानुगतव्यवहारबलात् प्रतीतिसिद्धः तथा वि
शेष्यस्य प्रतिबन्धकस्याभावे विशेषणस्योत्तेजकाभा
वस्याभावे द्वयाभावे च केवलप्रतिबन्धकाभावो विशे
ष्यविशेषणोभयाभावव्यापकोऽनुगत एव दाहकारण
मस्तु । अथ विशेषणाद्यभावादेव केवलपुरुषाभावव्य
वहार एकशक्तिमत्त्वादिति चेन्न । अनुगतव्यवहारस्या
नुगतज्ञानसाध्यत्वात् शक्तेश्चातीन्द्रियत्वात् । अथोत्ते
जकप्रयोगकाले मणेः कोऽभावः ? न तावत् प्राक्प्रध्वंसा
भावौ, तयोः प्रतियोग्यसमानकालत्वात् । न च श्या
मोऽयमासीदित्यत्र यथा श्यामध्वंसप्रयुक्तः श्यामघटत्वेन
पक्वघटस्य ध्वंस एव तथोत्तेजकाभावध्वंसप्रयुक्त उत्तेजका
भाववत्त्वेन मणिध्वंस एवेति वाच्यम् । ध्वंसस्यानन्तत्वे
उत्तेजकापनयेऽपि दाहप्रसङ्गात् । नाप्यत्यन्ताभावः, त
स्य कादाचित्कत्वाभावादिति चेत् न । यथा दण्डोपनयाप
नयदशायां केवलपुरुषाभाव उत्पादविनाशवान् अन्य
थाऽबाधितकेवलपुरुषाभावतदभावव्यवहारयोरुपपादयि
तुमशक्यत्वात्, तथोत्तेजकोपनयापनयशृङ्खलायां प्र
तिबन्धकाभावोऽपि तथैव स्वीकरणीयः तुल्यन्याय
त्वात् । यदि च संसर्गाभावत्रयवैधर्म्यात्तत्र नाऽन्तर्भा
वति, तदा तुरीय एव संसर्गाभावोऽस्तु, न हि कूलस्य
विशेषबाधे सामान्यबाधो, विशेषान्तरमादायापि तस्य
सम्भवात् । अन्यथा कूलस्थानादिसंसर्गाभाववैधर्म्येण

Digitized by Arya Samaj Foundation Chennai and eGangotri



ध्वंसोऽपि न सिद्ध्येत् । व्यवहारानुपपत्तिश्च तुल्यैव । सोऽयमस्माकं समोत्रकलहो न तु शक्तिवादः ।

(प्रका०) *प्रतियोगीति* । यद्यपि प्रतियोगिभेदस्थले प्रतियोगितावच्छेदकभेदस्यावश्यकत्वात्तद्भेदादेव भेदस्तथापि यथा प्रतियोगिभेदोऽभावभेदव्याप्यस्तथा प्रतियोगितावच्छेदकभेदोपीत्यर्थः । *एवञ्चेति* केवलदण्डसद्भावे उभयाभावाद्दण्डपुरुषसद्भावे विशेषणाभावाद्दण्डपुरुषोभयाभावे च विशेष्याभावाद्दण्डाभावविशिष्टपुरुषाभाव इत्यर्थः । *प्रयुक्त इति* । विशेषणादिविरहान्यतरव्याप्त इत्यर्थः । *अनुगतेति* । यद्यपि शब्दप्रयोगरूपे व्यवहारे व्यभिचारः नानार्थशब्दानुगमेपि विषयानुगमात्, तथापि व्यवहारशब्देन ज्ञानमेव विवक्षितम् । न चैवमन्वयः । ज्ञानेन विषयिणा विषयस्योपलक्षणात् । तथा चानुगतज्ञानस्यानुगतविषयसाध्यत्वादित्यर्थो द्रष्टव्यः । ननु शक्तिरेवानुगता तद्विषयोस्त्वित्यत आह *शक्तेश्चेति* । श्यामध्वंसप्रयुक्तः=तन्नियतः, न तु तज्जन्यः समसमयत्वादिति ध्येयम् । न तु घटत्वेन, घट आसीदिति प्रत्ययाभावादिति भावः । *सोयमिति* । उत्पादविनाशवान् तुरीयसंसर्गाभावोऽस्तु नोभयथापि शक्तिसिद्धिरिति भावः ।

(चि०) अस्तु वा ध्वंस एवासौ, संसर्गाभावविभागे जन्याभावत्वेन ध्वंसस्य विभजनात् । न चैवं विनाशवत्त्वेन प्रागभाव एव सः, परिभाषाया अपर्य्यनुयोज्यत्वात् । यद्वाऽत्यन्ताभाव एवासौ, तस्य नित्यत्वेऽपि कादाचित्कप्रतीतिकार्य्यानुदयौ प्रत्यासत्तिकादाचित्कत्वात् । प्रत्यासत्तिश्च विशेषणाभावो विशेष्याभाव उभयाभावश्च, तदैव विशिष्टात्यन्ताभावसत्त्वादिति । तन्न । यदि ह्यतीतविशेषणावच्छेदेन विद्यमानस्यैव विशेष्यस्य ध्वंसः स्यात् तदा क्षणरूपातीतविशेषणावच्छिन्नत्वेन प्रतिक्षणं घटस्य विनाशः स्यात् इति क्षणभङ्गापत्तिः । किञ्च विद्यमानस्य विनष्टत्वेनाप्रतीतेः शिखा विनष्टा पुरुषो न विनष्ट इति विपरीताबाधितप्रत्ययाच्च न विशेषणाभावेऽपि विशेष्यध्वंसः । श्यामोऽयमासीत्

Digitized by Arya Samaj Foundation Chennai and eGangotri



केवलोऽयमासीत् पुरुष इत्यादौ "सविशेषणे ही"ति न्यायेन विशेष्यवति श्यामकैवल्यादिध्वंस एव प्रतीयते, ध्वंसस्य ध्वंसानुपपत्तेश्च न विद्यमानस्य ध्वंसः। एतेनोत्तेजकसद्भावे सत्युत्तेजकाभावविशिष्टमणेरुत्पन्नध्वंसस्य उत्तेजकापनयसमये ध्वंसो जातोऽध्वस्तश्च ध्वंसः कारणमिति न विफल उत्तेजकापनय इत्यपास्तम् । विद्यमानध्वंसस्य च ध्वंसाभावात् । न च ध्वंसान्यः संसर्गाभावो विशिष्टाभाव इति वाच्यम् । उत्पन्नाभावस्य विनष्टप्रत्ययहेतुतया ततोऽपि विद्यमानस्य विनष्टत्वप्रत्ययापत्तेः। नापि विशिष्टाभावोऽत्यन्ताभावः, तथाहि स एव क्वचित् विशेषणाभावसहितः क्वचिद्विशेष्याभावसहितो दाहकारणमिति अननुगमस्तदवस्थ एव, विशेषणविशेष्याभावयोः प्रत्यासत्तित्वावच्छेदकानुगतधर्माभावात् ।

(प्रका०) ननु तुरीयसंसर्गाभावस्वीकारे विभागव्याघात इत्यपरितुष्यन्नाह *अस्तु वेति*। ननु विनाशिनि ध्वंसपदपरिभाषैव सन्दिग्धेत्यरुचेराह *यद्वेति*। *यदि ह्यतीतेति*। यद्यपि विशेष्यतावच्छेदकघटत्वाद्यवच्छिन्नघटादिप्रतियोगिकः प्रतिक्षणं ध्वंसो नेष्यते तादृशक्षणभङ्गपात एव च दोषावहस्तथापि विशेष्यस्य प्रत्यभिज्ञायमानत्वात्समवाय्यसमवायिनाशाभावाच्च न घटादेर्विनाशः, किन्तु विशेषणस्यैव । न च विशेषणनाशसामग्र्येव विशेष्यनाशिका, नित्यमात्रापलापापत्तेः । अत एव श्यामोयमासीदिति प्रत्ययो न त्वयमासीदिति प्रत्यय इति भावः । *ध्वंसस्येति*। तथा चोत्तेजकापगमेपि दाहापत्तिः । उत्तेजककालोत्पन्नस्य प्रतिबन्धकध्वंसस्य तदाप्यनाशादिति भावः । ध्वस्तस्येति क्वचित्पाठः । स च सुगम एव । उत्पादाविनाशशीलस्तुर्यः संसर्गाभाव एव विशिष्टाभाव इति निरस्यति *नचेति* अत्यन्ताभाव एवासाविति पक्षे परिहरति *नापीति* । अत्यन्ताभावस्य नित्यत्वात्सदैव दाहापत्तिरिति प्रत्यासत्तिसहितस्य तस्य हेतुत्वं वाच्यम्, प्रत्यासत्तिश्च विशेषणभावादिरित्यननुगम इत्याह *स एवेति*।

Digitized by Arya Samaj Foundation Chennai and eGangotri



(चि०) अथ विशिष्टविरोधित्वं विशेषणविशेष्याभावयोरनुगतं तदवच्छेदकमस्ति तयोश्च सत्त्व एव विशिष्टात्यन्ताभावसत्त्वादिति चेत्, तर्हि विशिष्टविरोधित्वेनानुगतेन तयोरेव हि विशिष्टाभावत्वेन दाहव्यवहारादौ जनकत्वमस्तु कृतं तदुपजीविनाऽतिरिक्तविशिष्टाभावेन। अथोत्तेजककाले विद्यमानात्यन्ताभावानुवृत्तावप्युत्तेजकापनयने उत्तेजकाभावव्यक्तिर्या जाता तदवच्छिन्नमणेरभावो न तत्रेति तदा न कार्योदयः तत्तदुत्तेजकाभावविशिष्टमणेरभावकूटस्य जनकत्वादिति चेन्न। तत्तदुत्तेजकाभावानामननुगतत्वेनानुगताविशिष्टाभावव्यवहारानुपपत्तेः, उत्तेजकाभावत्वेनानुगमेऽतिप्रसङ्ग एव।

अथ विशेषणविशेष्याभावयोर्विशिष्टविरोधित्वमनुगतकारणतावच्छेदकं यत्र तदन्यतराभावस्तत्र न विशिष्टं यत्र विशिष्टं तत्र न तयोरभाव इति सहानवस्थाननियमस्य विरोधस्यानुभवसिद्धत्वादिति चेन्न। सहानवस्थाननियमो न परस्परविरहरूपतया विशेषणविशेष्याभावस्य प्रत्येकं विशिष्टाभावतया तत्प्रत्येकाभावाभावस्य विशिष्टत्वापत्तेः, तथा च विशेष्यविशेषणयोः प्रत्येकं विशिष्टत्वापत्तिः तदभावस्य तत्त्वात्। न चोभयाभावाभाव उभयं विशिष्टम्। एवं ह्यभावद्वयं विशिष्टाभावो न तु प्रत्येकाभावरूप इति प्रत्येकाभावाद्विशिष्टाभावव्यवहारो न स्यात्। नापि परस्पराविरहव्याप्यत्वं तदाक्षेपकत्वं वा, विशेषणविशेष्याभावस्य विशिष्टाभावत्वेन तदव्याप्यत्वात् तदनाक्षेपकत्वाच्च, अभेदे तयोरभावात्। एतेनान्यदपि विशिष्टव्यवहारावि-

Digitized by Arya Samaj Foundation Chennai and eGangotri



रोधित्वादिनानुगतत्वमपास्तम् । केनाप्यनुगतेन रूपेण विशेषणविशेष्याभावस्य विशिष्टाभावत्वे प्रत्येकाभाववस्य विशेषणविशेष्यान्यतरमात्रस्य विशिष्टत्वापत्तेः, तदभावाभावस्य तत्त्वादित्युक्तत्वात्, तस्माद्विशेषणविशेष्याभावो विशेषणावच्छिन्नविशेष्याभावो न विशिष्टाभाव इति ।

( प्रका० ) *अथेति* उत्तेजककाले विद्यमाने योऽत्यन्ताभावस्तदनुवृत्तावपीत्यर्थः । *उत्तेजकाभावत्वेनेति* तद्धुत्तेजकाभावविशिष्टव्यभावत्वेन हेतुत्वं, तथाच पूर्वानुवर्त्तमानतादृशाभावादुत्तेजकापनयकाले दाहापत्तिः, कारणतावच्छेदकावच्छिन्नयात्किञ्चित्त्वे एव कार्योत्पत्तेरित्यर्थः । *तर्हीति* ।

पूर्वोक्त इष्टापत्तिमाशङ्कते *अथेति* । *विशेषणविशेष्याभावस्येति* अतिरिक्तविशिष्टाभावानभ्युपगमादिति भावः ।

( चि० ) अत्रोच्यते । विशेषणविशेष्ययोः सम्बन्धाद्विशिष्टव्यवहार इति तयोः सम्बन्धाभावाद्विशिष्टाभावव्यवहार इति घटतदभावव्यवहारावेव घटसत्त्वासत्त्वाभ्याम् । न हि तयोरसम्बन्धे विशिष्टव्यवहारः, नवा तदभावे सति न विशिष्टाभावव्यवहारः । यस्य च यत्र सम्बन्धः स एव तत्र तस्य वैशिष्ट्यम्, स च सम्बन्धाभावो विशेषणाभावाद्विशेष्याभावात् उभयाभावात् सर्वत्राविशिष्ट एकस्तेषां व्यापकोऽनुगतविशिष्टाभावव्यवहारकारणम्, इह दण्डी पुरुषो नास्तीत्यत्र तथा दर्शनात् । अत एव दण्डमात्रसद्भावे दण्डपुरुषसद्भावे उभयाभावे च कैवल्यपुरुषयोः सम्बन्धाभावः सर्वत्रास्तीति अनुगतः केवलपुरुषभावव्यवहारः । एवञ्च प्रतिबन्धकोत्तेजकाभावयोः सम्बन्धाभावो दाहकारणम् । स च प्रतिबन्धकाभावे प्रतिबन्धकोत्तेजकसद्भावे उभयाभावे चास्ति

Digitized by Arya Samaj Foundation Chennai and eGangotri



सर्वत्र प्रतिबन्धकोत्तेजकाभावयोः सम्बन्धो नास्तीति प्रतीतेः । नन्वेवं यत्र प्रतिबन्धकोत्तेजकाभावौ तत्रापि दाहः स्यात् अधिकरणाभावयोरतिरिक्तसम्बन्धाभावादिति चेन्न । तदभावेऽपि स्वरूपसम्बन्धस्याभावात् सर्वत्र स्वरूपसम्बन्धादेवाधिकरणाभावयोर्विशिष्टत्वप्रतीतेः । तथापि प्रतिबन्धकोत्तेजकाभावावेव स्वरूपसम्बन्धः तयोरभावश्च प्रतिबन्धकाभाव उत्तेजकश्च दाहकारणं, तथा चोभयाभावे उत्तेजकासत्त्वे परं दाहः स्यात्, उत्तेजकवति च प्रतिबन्धके दाहो न स्यादिति चेन्न । अधिकरणाभावावेव स्वरूपसम्बन्धः, तयोर्घटवद्भूतलचत्वरीयतदभावयोरपि स्वरूपसत्त्वे घटवति घटाभावव्यवहारापत्तेः किन्तूपहितस्वभावत्वं, तच्च सम्बन्धान्तरं विनाविशिष्टप्रत्ययजननयोग्यत्वम् । न च घटवद्भूतलचत्वरीयतदभावयोर्विशिष्टप्रत्ययजननयोग्यत्वमस्ति, घटवति कदापि घटाभावप्रत्ययानुदयात्, तदिहापि प्रतिबन्धकोत्तेजकाभावयोर्विशिष्टप्रत्ययजननयोग्यत्वं स्वरूपसम्बन्धः, अन्यथोत्तेजकवति प्रतिबन्धके चत्वरीयोत्तेजकाभावविशिष्टप्रत्ययापत्तेः । तादृशस्वरूपसम्बन्धाभावश्च प्रतिबन्धकाभावे प्रतिबन्धकोत्तेजकसद्भावे उभयाभावे चाविशिष्ट एव ।

यद्वा अदण्डपुरुषस्याभावे दण्डी पुरुषो न प्रतियोगी तस्यादण्डत्वाभावात् किन्तु तदन्यः, तस्य चाभावो दण्डिसद्भावेऽपि दण्डमात्रसत्त्वे उभयासत्त्वे चाविशिष्ट इति तस्मात् केवलपुरुषाभावव्यवहारोऽनुगतः । तदुक्तं "न हि दण्डिनि सति अदण्डानामन्येषां नाभावः, किन्तु दण्डाभावस्यैवेति युक्तम्, अन्यथा तत्राऽन्येषामिति

Digitized by Arya Samaj Foundation Chennai and eGangotri



पदस्य व्यर्थत्वापत्तेः, तथा केवलप्रतिबन्धकाभावे उत्तेज
कसहकृतः प्रतिबन्धको न प्रतियोगी तस्य केवलत्वाभा
वात् किन्तु तदन्यः, तदन्यस्य च केवलप्रतिबन्धकस्या
भावे उत्तेजकसहितप्रतिबन्धकसत्त्वे उत्तेजकमात्रसत्त्
उभयासत्त्वे वा विशिष्ट एवेति नाऽननुगमः, उत्तेजकापन
ये च केवलप्रतिबन्धकोऽस्तीति न तदभाव इति दो
न भवती"ति ।

(प्रका०) *सम्बन्धाभावादिति* । ननु विशेषणविशेष्यसम्बन्
स्य तदुभयमात्रवृत्तित्वाद्भूतलादौ तत्सम्बन्धाभावाद्दण्डिनि सत्य
दण्डीह नास्तीति व्यवहारापत्तिरिति चेत् । न । यादृशेन हि सम्बन्धे
यत्र यद्विशिष्टव्यवहारस्तादृशसम्बन्धाभावस्यैव तद्व्यवहारहेतुत्व
ण्डपुरुषसंयोगस्तु नैतद्व्यवहारहेतुः, तस्य भूतलावृत्तित्वेन तत्रेद
स्तीति व्यवहारानापत्तेः, किन्तु परम्परासम्बन्धविशेषः, तथा च
दभाव एव विशिष्टाभावव्यवहारहेतुरिति फलबलेन तथा कल्पनादि
*सम्बन्धान्तरं विनेति* । संयोगादावतिव्याप्तेराह *सम्बन्धेति*
असम्भववारणायाह-*अन्तरेति* । ननु स्वात्मविषयकज्ञाने स्व
त्मना समं विषयाविषयिभावः सम्बन्धः स्वरूपसम्बन्ध एव वाच्
तत्र चेदमव्यापकं तत्र समवायस्यैव सम्बन्धान्तरस्य सत्त्वादिति चे
उद्देश्यव्यवहारप्रयोजकसम्बन्धान्तरं विनेत्यर्थात् । न च समवायो
षयत्वव्यवहारप्रयोजकः । घटादिविषयकज्ञानस्य स्वात्मनि विषय
व्यवहारप्रयोजकत्वप्रसङ्गात् । ननु घटाभावभ्रमानुपपत्तेः, योग्यता
फलबलकल्प्यतया तत्र विशिष्टज्ञानोत्पत्त्या योग्यतावश्यंभावात् । न
प्रत्ययपदं प्रमापरम्, सम्बन्धसत्त्वे तस्यापि प्रमात्वात्, अन्यथा स
न्धाभावेन तस्याप्रमात्वं तदप्रमात्वे च तत्र सम्बन्धाभाव इति पर
राश्रयात् । किञ्च अतीन्द्रियाभावस्वरूपसम्बन्धेऽव्याप्तेः, तत्र स
न्धस्य विशिष्टप्रत्ययाजनकत्वात् तत्प्रत्ययस्यानुमित्यादिरूपत्वेन
षयाजन्यत्वादिति चेन्न । विशिष्टप्रत्ययजननयोग्यतावच्छेदकरूप
च्छिन्नस्वरूपस्य सम्बन्धत्वात्, योग्यतावच्छेदकाभावे योग्यत्वस्या
भावात् । योग्यतावच्छेदकं चात्यन्ताभावे प्रतियोगिदेशान्यदेशत्वम्,
गभावादौ च प्रतियोगिदेशत्वे सति प्रतियोगिकालान्यकालत्वम्, अन्
न्याभावे प्रतियोगितावच्छेदकदेशान्यदेशत्वम् । न चान्यत्वमन्योन्याभा

Digitized by Arya Samaj Foundation Chennai and eGangotri



वस्त्वं तत्र च मत्वर्थायोगं इति वाच्यम् । तत्रापि तद्देशान्यत्वस्य स्वरूपत्वात् । न चैवमनवस्था वस्त्वनवस्थायाः प्रामाणिकत्वेनादोषात्, प्रत्ययानवस्थायाश्चासत्त्वात्, उक्तावच्छेदकोपलक्षितस्वरूपस्यैव प्रत्ययविषयत्वे तस्य तदविषयत्वात् । एवञ्चोक्तावच्छेदकावच्छिन्नस्वरूपाभावे यत्राभावधीस्तत्र भ्रमः । एतेनातीन्द्रियस्वरूपसम्बन्धाव्याप्तिरप्यपास्ता । न चोक्तावच्छेकस्य प्रत्ययाविषयत्वे विषयाभावात्कथं भ्रमत्वप्रमात्वे इति वाच्यम् । एकत्रोक्तावच्छेदकावच्छिन्नस्य सम्बन्धत्वेन विद्यमानसम्बन्धाविषयत्वादन्यत्र तदनच्छिन्नत्वेन तस्य विद्यमानसम्बन्धाविषयत्वात् ।

ननु यत्किञ्चित्सम्बन्धाभावो न विशिष्टाभावोऽतिप्रसङ्गादिति विशेषणविशेष्योभयप्रतियोगिकसम्बन्धाभावस्तथा वाच्यः, तदभावश्च क्वचिद्विशेषणविशेष्योभयप्रतियोगित्वरूपविशेषणाभावात् क्वचिद्विशेष्यसम्बन्धाभावादित्यननुगमस्तदवस्थ एव । इयानेव विशेषो यत्पुरुषादौ विशेष्ये दण्डादिर्विशेषणं सम्बन्धे च विशेषणविशेष्योभयप्रतियोगित्वम् । ननु दण्डपुरुषोभयप्रतियोगिकसम्बन्धत्वमेकं प्रतियोगितावच्छेदकं तदवच्छिन्नाभाव एक एवेति नाऽननुगम इति चेत् । तर्हि दण्डावच्छिन्नपुरुषत्वमेकं प्रतियोगितावच्छेदकं तदवच्छिन्नाभावोऽप्यनुगत एवेति किं सम्बन्धाभावस्य विशिष्टाभावत्वोपवर्णनेन । न च विशेष्ये विद्यमाने न तदभाव इति वाच्यम् । विशेषणावच्छिन्नानामन्येषामेवाभावाभ्युपगमेन दोषाभावात् । अत एवानुपदमेव वक्ष्यति "न हि दण्डिनि सती"त्यादि । किञ्च अन्यत्र यथा तथाऽस्तु प्रकृते चोत्तेजकाभावमणिसम्बन्धस्य तदुभयस्वरूपतया तदभावोऽननुगत एव । न च तदुभयं न स्वरूपसम्बन्धः, किन्तु तादृशविशिष्टप्रत्ययजननयोग्यत्वमतिरिक्तमेव तथेति वाच्यम् । विशिष्टबुद्धिविषयस्य सम्बन्धत्वाद्विशिष्टप्रत्ययघटितस्य तस्य विशिष्टबुद्ध्याविषयत्वात्, अत एव सम्बन्धस्य सम्बन्धिभिन्नत्वनियमेन स्वरूपसम्बन्धः परैर्नाङ्गीक्रियते । अत एव समवायसिद्धिः, तत्तत्स्वरूपाणामनन्तत्वेन स्वरूपसम्बन्धेनार्थान्तराभावात्, अन्यथा तेनैवार्थान्तरं स्यात् । न च सम्बन्धत्वस्य मिलितवृत्तित्वेन सम्बन्धत्वावच्छिन्नाभावस्यानुगतत्वमिति वाच्यम् । एवं विशेषणावच्छिन्नविशेष्याभावस्यापि विशिष्टाभावत्वे दोषाभावादित्युक्तम् । अपि च यदि सम्बन्धाभावो विशिष्टाभावस्तदा इह दण्डी पुरुषो नास्तीत्यत्र नञर्थप्रतियोगित्वेन सम्बन्ध एव भासेत । न चैवं, दण्डावच्छिन्नपुरुषस्यैव तत्त्वेन प्रतीतेः । अन्यथा घटाभावोऽप्यतिरिक्तो न

Digitized by Arya Samaj Foundation Chennai and eGangotri



सिद्धेत्, घटतदधिकरणसम्बन्धाभावादेव तद्व्यवहारसम्भवा
यदि च सम्बन्धस्य तत्र प्रतियोगित्वेनानुल्लेखात्तद्ज्ञानं विनापि घटत्व
वच्छिन्नघटज्ञानादेव तदभावज्ञानाच्च न तदभावेनान्यथासिद्धिः, त
प्रकृतेऽपि तुल्यमित्यपरितोषं हृदि निधायाह यद्वेति। अयं च विशेषण
वच्छिन्नविशेष्यप्रतियोगिताकोऽत्यन्ताभावः न तु ध्वंसो न वा विद्यमा
प्रतियोगिक इति न क्षणिकत्वशङ्का। न च तस्य नित्यत्वेन प्राग
कार्यापत्तिः, समयविशेषावच्छेदेन संसर्गित्वादिति ग्रन्थकृतैवाभि
नादिति।*दण्डी पुरुष इति*। तत्काले दण्डवानित्यर्थः। किन्तु तद
तत्काले दण्डाभाववानित्यर्थः। नहीति। युक्तमिति योजना। अन्यो
ति। विशेषणावच्छिन्नप्रतियोगिको यदि नाभावः, किन्तु विशेषणप्र
योगिक एव तदाऽन्येषामिति पदस्य विशेष्यवाचिनोऽनुपादाना
त्तेरित्यर्थः।

यद्वा यदि तत्कालीनदण्डाभाववानेव न प्रतियोगी, तदा अन्यद
लीनदण्डाभावमादाय तत्र स्थितदण्डिनोऽप्यदण्डत्वेनाभावप्रतियो
त्वादन्येषामिति व्यर्थमित्यर्थः।

(चि०) ननु न प्रतिबन्धकाभावः कारणम् एकदण्ड
न्वये घटोत्पत्तिवत् प्रतिबन्धकसत्त्वेऽपि तदन्यप्र
तिबन्धकाभावेऽपि(१) कार्य्यानुदयात्, न हि यावत् का
णतावच्छेदकावच्छिन्नं तावदन्वयेऽपि कार्यमिति
न्न। प्रतिबन्धकाभावत्वेन न हेतुत्वमन्योन्याश्रयात् वि
न्तु मण्याद्यभावत्वेनेत्युक्तत्वात्, तत्त्वेऽपि वा घ
दण्डसलिलादिवत्प्रतिबन्धकाभावकूटस्य दाहहेतुत्वात्

यद्वा प्रतिबन्धकत्वावच्छिन्नप्रतियोगिक एवाभा
वः कारणम्, स च यावद्विशेषाभावनियत इति न प्रति
बन्धकसत्त्वेऽपरप्रतिबन्धकाभावेऽपि कार्य्योदयः। प्रतिब
न्धकस्य च संसर्गाभावो हेतुः, तेन तत्सत्त्वे तदन्योन्या
भावेऽपि न कार्यम्। अन्वयव्यतिरेकाभ्यां व्याप्तिका
णत्वयोर्ग्रहे संसर्गाभावस्य त्वयाऽपि हेतुत्वाङ्गीकारात

(१) प्रतिबन्धकान्तराभावेपीति पाठान्तरम्।

Digitized by Arya Samaj Foundation Chennai and eGangotri



अन्यथा सामग्रीव्यापकयोः सत्त्वे तदन्योन्याभावे कार्यव्याप्याभावापत्तौ कार्यकारणव्याप्यव्यापकभावे व्याघातात् । किञ्च तथापि प्रतिबन्धकाभावे शक्तिरस्तीति तत्सत्त्वे तदन्योन्याभावमादाय शक्तिसत्त्वप्रसङ्गः । न च स दुर्वचः, न वा प्रागभावादित्वेनाऽननुगमव्यभिचारौ, प्रतियोग्यधिकरणयोः संसर्गमारोप्य यो निषेधः स संसर्गाभावः । भूतलं घटसंसर्गो नेत्यत्र भूतले घटसंसर्गस्य संसर्गो नारोप्यते किन्तु तादात्म्यम् ।

( प्रका० ) ननु कार्यानुत्पादप्रयोजकत्वं प्रतिबन्धकत्वं प्रयोजकत्वं च यस्मिन्सतीत्यादिगर्भं न तु पूर्ववर्त्तित्वगर्भमिति नान्योन्याश्रय इत्यत आह-*तत्त्वेपि वेति* ।

नन्वेवमन्योन्याश्रयाभावेन तत्सामान्याभाव एक एव लाघवाद्धेतुरस्तु न तु यावद्विशेषाभावा इत्यपरितोषात्तदेव सिद्धान्तयति *यद्धेति* । *संसर्गाभाव इति* । अत्रापि यत्रोत्तेजकमस्ति तत्रोत्तेजकाभावावच्छिन्नात्यन्ताभावमात्रं हेतुरन्यत्र ध्वंसादिसाधारणतत्संसर्गाभावत्वमावश्यकमिति भावः । यो निषेधः, ज्ञायत इति शेषः ।

( चि० ) वयन्तु ब्रूमः । यत्र प्रतियोगिनमधिकरणे समारोप्य निषेधावगमः स संसर्गाभावः, यत्र चाधिकरणे प्रतियोगितावच्छेदकमारोप्य निषेधावगमः सोऽन्योन्याभावः । भूतलं न घट इत्यत्र भूतलस्य घटत्वावगमात् घटत्वमेव च घटतादात्म्यम् । आरोपस्य हेतुत्वे किं मानमिति चेत्, मा भूत्तावदन्यत्, नेदमिह नेदमिदमित्यबाधितविलक्षणव्यवहारस्यैव तत्र मानत्वादिति(१)। ननु प्रतिबन्धकात्यन्ताभावो न हेतुः, तस्मिन् सत्यपि कार्याभावात् । न हि करादौ मण्यत्यन्ताभावः तत्संयोगात्यन्ताभावो वा, मणेः स्वावयववृत्तित्वात् संयो-

( १ ) हार एव तत्र मानमिति पाठान्तरम् ।

Digitized by Arya Samaj Foundation Chennai and eGangotri



गस्य चाव्याप्यवृत्तित्वात्। अतएव न तत्प्रध्वंसप्राग्
भावौ हेतू, तयोः करादाववृत्तेः गुणकर्म्मादेश्च प्रतिबध्य
त्वानापत्तेश्च, तस्य जन्यधर्म्मानाश्रयत्वेन तत्र तयोः
भावात्, न चान्यः संसर्गाभावोऽस्तीति चेन्न। संसर्गाव
च्छिन्नप्रतियोगिकस्याभावविशेषस्य सति प्रतिबन्धकेऽभा
वात्। स च समयविशेषावच्छेदेन संसर्गितया अत्यन्ताभा
एव, तथैवान्वयव्यतिरेकावधारणात्। अथैवं प्रागभाव
प्रध्वंसस्थले समयविशेषावच्छिन्नात्यन्ताभावेनैवोपप
त्तौ न तयोः सिद्धिः, अत्यन्ताभावो ह्यव्याप्यवृत्तिः तस्य
चैकत्र भावाभावे क्वचिद्देशोऽवच्छेदकः क्वचित् काल
इति चेन्न। तत्र विद्यमानताविरोधित्वेनैव कपाले न घ
इति प्रतीतिवैलक्षण्यात्, नत्वेवं भूतले घटाभावप्रतीतिः।

अन्ये तु भविष्यति घटो घटो नष्ट इति विलक्ष
णप्रतीत्या अत्यन्ताभावेनैकेन समर्थयितुमशक्यत्वात्
अन्य एवायं संसर्गाभाव इत्यप्याहुः॥

(प्रक०) नन्वभेदारोपादिस्थले तादात्म्यमपि संसर्ग एवेत्यन्यो
न्याभावेऽतिव्याप्तिः, किञ्च संसर्गस्यारोप्यत्वे रजतत्वादेरिव त
त्संसर्गोऽपि भासेत, न चैवमित्यपरितुष्यन्नाह *वयं त्विति*। *प्रति
योगिनामिति*। अधिकरणविषयकप्रतियोग्यारोपजन्यज्ञानविषयाभा
इत्यर्थः। सः—निषेधः। अन्योन्याभावेऽतिव्याप्त्यभावमन्योन्याभा
वमिन्नत्वं लक्षणान्तरं च दर्शयितुमन्योन्याभावलक्षणमप्याह—*यत्र चे
ति*। अधिकरणविषयकप्रतियोगितावच्छेदकारोपजन्यनिषेधधीवि
षय इत्यर्थः।

नन्विदमुभयलक्षणमतीन्द्रियसंसर्गाभावान्योन्याभावयोरव्याप्तं त
द्विषयकज्ञानस्यानुमित्यादिरूपतयाऽऽरोपाजन्यत्वात्। न च योग्यता
रस्कारात्तथात्वम्, तादृशारोपजननयोग्यतावच्छेदकं हि नाभावप्रतीति
त्वमतिप्रसङ्गादिति संसर्गाभावविषयत्वादिकं तथा वाच्यम्, तथा च
ऽऽत्माश्रयः। न च प्रागभावादिविषयत्वमेव तथा, प्रागभावत्वादेरपि सं
र्गाभावघटितत्वात्। एवञ्च जन्यत्वस्याऽपि प्रागभावगर्भतया तस्य

Digitized by Arya Samaj Foundation Chennai and eGangotri



संसर्गाभावगर्भत्वादन्योन्याश्रयोपि । किञ्च योग्यताया अनिर्वचनेऽप्रत्यक्षे योग्यध्वंसेऽप्यव्याप्तिरिति ।

अत्र वदन्ति । प्रतियोग्यारोपपूर्वकनिषेधावगमविषयतावच्छेदकत्वं संसर्गाभावत्वम् । एवमग्रेपीत्युभयं लक्षणम् । स्वरूपं तु विषयतावच्छेदकं संसर्गाभावत्वादि, तच्च स्वाभावाभावत्वं अस्वाभावाभावत्वं तेन नोक्तसर्वदोषावकाशः । अस्ति च घटस्य योऽभावस्तदभावो घटो घटान्योन्यान्याभावस्याभावो घटत्वमिति । न च संसर्गाभावस्य योऽन्योन्याभावस्तदभावो न संसर्गाभाव इति स्वसंसर्गाभावाभावो लक्षणार्थो वाच्य इति पुनरन्योन्याश्रयत्वमिति वाच्यम् । स्वाभावाभावत्वमित्यत्र वस्तुतो यद्यपि संसर्गाभावाभाव एव पर्यवसितस्तथापि संसर्गाभावत्वं न तत्र प्रविष्टम्-अभावत्वेनैव संसर्गाभाव उपस्थित इति न काचिदनुपपत्तिः । अन्योन्याभावे स्वप्रतियोगिकाभावमात्राभावत्वाभावादिति सर्वं सुस्थमिति ।

अत्रेदं चिन्त्यम् । स्वभावाभावत्वं न संसर्गाभावत्वम्, अन्योन्याभावेऽतिव्याप्तेः । तथाहि स्वं घटान्योन्याभावस्तदभावो घटस्तदभावश्च तदन्योन्याभावः । ननु घटान्योन्याभावाभावो न घटः, किन्तु घटत्वमिति चेन्न । घटो घटान्योन्याभावो नेति प्रतीत्या घटे घटान्योन्याभावान्योन्याभावो विषयीक्रियते, स च घटस्वरूप एव अभावप्रतियोगिकस्याभावस्याधिकरणानतिरेकात् । न च स्वसंसर्गाभावाभावत्वं तत्त्वमिति वाच्यम । आत्माश्रयात् ।

केचित्तु अखण्डयोः संसर्गाभावत्वान्योन्याभावत्वयोरुभाभ्यां लक्षणाभ्यामुपलक्षणम् । न च तयोः पदार्थान्तरतापत्तिः, सामान्यान्तर्भावात् । सामान्यं हि द्विविधं उपाधिर्जातिश्च । तत्रोपाधिर्द्विविधः-सखण्डोऽखण्डश्चेत्युपाधावन्तर्भावात तत्तेदन्ते इवेति, तथाच रत्नकोशे तरणिमिश्रैरुक्तम्-"एवमभावत्वध्वंसत्वादिकं बोध्यमित्याहुः ।

*नेदमिहेति* । ननु संसर्गाभावान्योन्याभावरूपाविषयवैलक्षण्येन ज्ञानवैलक्षण्यं तस्माच्च व्यवहारवैलक्षण्यमित्यन्यथासिद्धं तत्रारोपहेतुतां व्यवस्थापयतीति चेत् । मैवम । यदि नारोपे हेतुस्तदा भूतले घटसंसर्गाभावान्योन्याभावसत्त्वे कदाचिन्नेदमिह कदाचिन्नेदमिदमिति व्यवहारवैलक्षण्यानुपपत्तेरित्यर्थात् । प्रतियोगिज्ञानानुपलब्ध्यादीनां कारणानां तौल्ये कार्यवैचित्र्यस्याकस्मिकतापत्तौ कारणवैचित्र्यस्य कल्पनीयत्वे पारिशेष्यादारोपहेतुतायामेव विश्रामादिति भाव इत्याहुः ।

*गुणेति* । उक्तप्रतिबन्धकाभावस्य तत्रासत्त्वेन तत्र प्रतिबन्धो न

Digitized by Arya Samaj Foundation Chennai and eGangotri



स्यात् यत्रैव कदाचित् प्रतिबन्धकाभावस्तत्रैवान्यदा प्रतिबन्धकसत्त्वा-
दिति भावः । प्रतिबन्धकत्वानापत्तेरिति पाठे अन्यस्येति शेषः।
तथाच गुणादेः प्रतिबन्धकत्वमन्यस्य न स्यादिति गुणादेः प्रतिबध्य-
त्वं न स्यादित्येवार्थः पर्यवस्यतीति ध्येयम् । *संसर्गेति* । यद्यपि
संसर्गस्याव्याप्यवृत्तित्वात्तदवच्छिन्नाभावोपि तथैव, तथाच सोपि
तत्रास्त्येव, तथापि व्याप्यवृत्तितादृशाभावस्य हेतुत्वमिति भावः। एवं
विद्यमानताविरोधित्वेनेत्यर्थः । अन्यत्र विद्यमानेपि घटे तथा प्रतीति-
दर्शनादिति भावः ।

( चि० ) एतेन विशेषणाभावविशेष्याभावतदुभ-
याभावघटितं सामग्रीत्रयमेवास्तु हेतुः दाहे च जातित्र-
यकल्पनामिति प्रत्युक्तम्। अनुगतहेतुसत्त्वात् दाहवैजात्य-
स्य योग्यानुपलब्धिबाधितत्वाच्च। व्यक्तियोग्यतयैव जा-
तियोग्यत्वेन योग्येऽयोग्यजात्यभावात् । ननु प्रहरं मा
दहेत्यादौ सावधिमन्त्रपाठे मन्त्रविनाशे दाहः स्यात्। न
च सङ्कल्पविषयकालविशेष एव तत्र प्रतिबन्धकः, स-
ङ्कल्पनाशसमयस्य स्वतोऽविशेषात्। न च उद्देश्यत्वमेव
तत्र विशेषः, तस्य विनाशात् । न चोद्देश्यध्वंसोऽपि
हेतुः, तस्य यामादूर्ध्वमपि सत्त्वात्। न च मन्त्रपाठजनि-
तमदृष्टमेव तत्र प्रतिबन्धकं तत्कालदाहाप्राप्तिफलना-
श्यत्वेन नाग्रे दाहप्रतिबन्ध इति वाच्यम् । प्रतिबन्धकम-
न्त्रपाठस्यानिषिद्धत्वेनाविहितत्वेन चादृष्टाजनकत्वात्
दाचारस्य विगीतत्वेन श्रुत्याद्यननुमापकत्वादिति चेत्। मै
वम् ।उद्देश्यत्वज्ञानाहितसंस्कारविषयकालस्य प्रतिबन्धक-
त्वात्। ननु प्रतिबन्धमकुर्वतामप्रतिबन्धकत्वेन शक्तिमत
पकुर्वतां मन्त्रादीनां न प्रतिबन्धकत्वमतः शक्तिसिद्धिः।
न च कार्य्यानुत्पाद एव प्रतिबन्धः तज्जनकत्वमेव प्रति-
बन्धकत्वमिति वाच्यम् । कार्य्यानुत्पादो हि तत्र न तत्प्रा-
गभावो न वा तदुत्तरकालसंसर्गः तस्य मन्त्राद्यजन्य-

Digitized by Arya Samaj Foundation Chennai and eGangotri



त्वात् इति चेन्न । मन्त्रादीनामप्रतिबन्धकत्वात् तत्प्रयोक्तारस्तु प्रतिबन्धकाः ते च किञ्चित्करा एव । मन्त्रादौ च कार्ये कारणोपचारात् स्वार्थिककन्प्रत्ययाद्वा तथा व्यपदेशः । प्रतिबन्धश्च सामग्रीविरहः । मन्त्राद्यभावघटितसामग्रीविरहश्च मन्त्रादिरेव, तदभावाभावस्य तत्त्वात् ।

( प्रका० ) *योग्य* इति । रत्नत्वस्यापि योग्यवृत्तेर्योग्यत्वमेव, पदविशेषवाच्यत्वज्ञानार्थं तत्रोपदेशापेक्षेति भावः । *मन्त्रविनाशेति* । मन्त्रस्याशुविनाशितया प्रहराभ्यन्तरेऽपि दाहः स्यादित्यर्थः । सङ्कल्पस्य विशेषणत्वमालंब्य दूषयति *सङ्कल्पनाश इति* । तथाच सङ्कल्पस्येच्छात्मकत्वात्तदभावे विशिष्टाभावोऽक्षत एवेति भावः । *विगीतत्वेनेति* । यद्यपि विगीतत्वं निषिद्धत्वमेवेत्यनिषिद्धत्वेनेत्यनेन प्रागुक्तेन विरोधः, तथापि शिष्टप्रवृत्त्यविषयत्वं तदभिप्रेत्यैतदुक्तमिति ध्येयम् ।

यद्यप्येवं श्रुत्यनुमापकस्यानिषिद्धत्वरूपाविगीतत्वस्य न क्षतिः, तथापि भोजनाद्याचारे व्यभिचारवारणायालौकिकत्वमपि विशेषणम् । इदं तु मन्त्रौषध्यादिवल्लौकिकमेवेति भावः । यद्वा शिष्टाचारत्वस्यैतदनुमानान्तर्गतत्वस्यैव क्षतिरिति भावः । *उद्देश्यत्वेति* । ज्ञानमस्थिरमिति तद्विशिष्टाभावः प्रहराभ्यन्तरेऽपि स्यादिति संस्कारेत्युक्तम् । यत्किञ्चित्संस्कारविषयत्वं च प्रहरान्तरेऽपीत्यत उक्तमुद्देश्यज्ञानाहितेति । स च ज्ञानविषयमात्र इति नोक्तदोषः । ननु रोगादिना संस्कारनाशे विशिष्टाभावसम्भवात्प्रहराभ्यन्तरेऽपि दाहः स्यात्, यत्र च संस्कारोदयो न तत्र वा का गतिरिति चेत् । न । तत्र दाहप्रतिबन्ध इत्यस्यैवासिद्धेः । यत्र च दाहप्रतिबन्धस्तत्राऽनन्यगतिककार्यदर्शनात्संस्कारोऽपि कल्प्यते कार्योन्नेयधर्माणां यथाकार्यमुन्नयनादिति साम्प्रदायिकाः ।

वयं तु ब्रूमः सङ्कल्पविषय एव कालः प्रतिबन्धकः । सङ्कल्पस्य न विशेषणत्वं, किन्तु स्वविषयीभूतकालोपलक्षकत्वम्, यथा मङ्गलस्यासन्नसमयसमाप्तिफलकत्वे आसन्नसमयस्य स्ववृत्तिसमाप्त्युपलक्षकत्वम् । इयानेव विशेषो—यत्तस्याधाराधेयसम्बन्धेन तथात्वमस्य च विषयविषयिभावसम्बन्धेनेति न कश्चिद्विशेष इति । प्रतिबन्धकत्वान्यथानुपपत्त्या तत्सिद्धिं निराकर्त्तुमुत्थापयति *नन्विति* । कर्त्तरि ण्वुलो विधानादिति भावः । *तस्येति* । यद्यपि क्षेमसाधारणजन्यत्वमत्रापि

Digitized by Arya Samaj Foundation Chennai and eGangotri



सम्भवति तथापि सत्त्वघटितजन्यत्वाभिप्रायेणेदमुक्तमिति ध्येयम् 'स्वार्थिकाः क्वचिल्लिङ्गवचनान्यतिवर्त्तन्त' इति न्यायादौषधं प्रतिबन्धः मिति नपुंसकलिङ्गत्वमिति भावः । ननु भवेदेवं यदि मन्त्रादीनां तिबन्धकत्वं भवेदत आह *प्रतिबन्धश्चेति* । सामग्रीविरहः-सामग्र घटककारणविरहः ।

( चि० ) नव्यास्तु प्रतिबन्धकाभावो न कारणं वा शक्तिः, किन्तु तत्तत्कालीनदाहाविशेषं प्रति तत्त त्कालप्रतिबन्धेतरवह्नेः कारणत्वमिति प्रतिबन्धकाभाव कारणतावच्छेदको न तु कारणं दण्डत्ववत्, आकाशा दौ त्वेकव्यक्तिके न यथा कारणत्वं क्वचित् प्रतिबन्धेऽप्यन्य त्र शब्दोत्पत्तेः किन्तु भेर्य्यादेस्तथा कारणत्वमिति तत्प्रतिबन्धे शब्दोत्पत्तिर्नेत्याहुः ।

तन्न । वह्निप्रतिबन्धकाभावयोरन्वयव्यतिरेकतौल्ये नोभयस्यापि कारणत्वात्, न त्वेकस्यवच्छेदकं विनिगमक भावात् । किञ्च यस्मिन् सत्यपि यदभावात् कार्य्याभाव स्तस्य कारणत्वमायाति न तु तदवच्छेदकत्वम् । न हि कार्याऽयोगव्यवच्छेदः कारणत्वं, किन्तु नियतपूर्वसत्त्वं तच्च सहकारिविरहप्रयुक्तकार्य्याभावेऽप्यक्षतम् । अन्य था चक्रसहितदण्डत्वेन कारणत्वे सहकार्य्युच्छेदः। यस्य यद्धर्म्मस्वभावगम्यैव नियतपूर्ववर्त्तित्वस्वभावगम्यते तस्य तद वच्छेदकं दण्डत्वमिव, सहकारी तु न तथा ।

( प्रका० ) यद्वा व्यसज्यवृत्तिप्रतियोगिकाभावमभ्युपगम्य मुर रिमिश्रमतमाह *नव्यास्त्विति* । *भेर्यादेरिति* । इदं तु समाधि सौकर्य्यादुक्तम् । वस्तुतस्तु तत्कालप्रतिबद्धेतरवह्नेरिव तत्तत्कालतत्तद्दे प्रतिबद्धेतराकाशस्य जनकत्वं सम्भवति, अन्योन्याभावस्याव्याप्यवृत्ति त्वाभ्युपगमेन तत्प्रणयनात् (?)। प्रतिबन्धकात्यन्ताभावस्यैवाच्छेदक त्वस्वीकाराद्वा तस्याव्याप्यवृत्तित्वात्, अन्यथा वह्निभेर्यादेरपि कालान्त रे कार्यानुत्पत्त्यापत्तिः प्रतिबद्धेतरत्वाभावादिति । यद्वा तत्काल प्रतिबद्धा अन्ये वह्न्यादयः प्रसिद्धास्तदन्यवह्नित्वं तत्र जनकतावच्छे

Digitized by Arya Samaj Foundation Chennai and eGangotri



दककोटिप्रविष्टम् । आकाशे तु न तथेत्यनेनैवाभिप्रायेणतदुक्तमिति । *उ-
भयस्यापीति* । नन्वेवमन्वयव्यतिरेकतौल्येन दृढत्वदण्डयोर्द्वयोरपि
जनकत्वापत्तिः । न च दण्डस्य चक्रादिसमवधानं साक्षात्सम्बन्धेन
दृढत्वस्य च परम्परासम्बन्धेन तदिति विनिगमकमिति वाच्यम् । वह्नि-
प्रतिबन्धकाभावयोरपि तुल्यत्वात् । किञ्चैवं विनिगमनया परम्परास-
म्बद्धस्यालोकरूपादेरपि प्रत्यक्षादेर्हेतुत्वं न स्यात्, किन्त्ववच्छेदकत्व-
मेव स्यात् दृढत्ववत् । अपि च यस्मिन्सत्यपीति नियमादेव दार्ढ्यहे-
तुत्वमेव दण्डे सत्यपि दार्ढ्याभावेन कार्याभावात् । न चादृढेनाप्यनेकेन
रज्जुवद्धेन घटोत्पत्तिदर्शनाद्विवक्षितविवेकेन भ्रमिजनकत्वमेव दार्ढ्यं
तस्य च न घटजनकत्वं जनकत्वस्याजनकत्वादिति वाच्यम् । भ्रमिज-
नकत्वस्य घटजनकत्वे विरोधाभावात् । जनकत्वस्य तज्जनकविरोधः,
आत्माश्रयात् । किञ्च भ्रमिजनकतायामेव दण्डस्य किमवच्छेदकं न ता-
वद्दण्डत्वमेव अदृढादपि भ्रम्युत्पत्त्यापत्तेः । न च दृढदण्डत्वं तथा,
अवच्छेद्यभ्रमिजनकत्वातिरिक्तस्य दृढत्वस्याभावात्, भावे वा घटज-
नकं तदेवास्तु । अपि च "अन्यं प्रतीति" न्यायेन दण्डस्यान्यथासिद्धा-
पत्तिः, कुम्भकारपितृवत् । न चान्यमुदासीनं प्रतीति विवक्षितं भ्र-
मिस्तु जनिकैवेति वाच्यम् । एवं कुम्भकारपितुरपि जनकत्वं स्यात् कु-
म्भकारस्यापि जनकत्वेनोदासीनत्वाभावात्, तस्मादत्र समाधानं चि-
न्त्यम् । विपक्षे बाधकमाह *नहीति* । तस्य प्रवृत्तिपूर्वमनिश्चये कार-
णे कार्यार्थिनो प्रवृत्त्यापत्तिरिति भावः । *अन्यथेति* । कार्यायोगव्य-
वच्छेदस्यैव कारणत्व इत्यर्थः । ननु तथापि प्रतिबन्धकाभावो न
कारणं प्रतिबन्धकसमानकालीनकार्ये प्रत्युत्तेजकरूपविशेषसामग्रीक-
ल्पनेनैव सामञ्जस्ये तद्धेतुताग्राहकान्वयादेरन्यथासिद्धिरिति चेन्न ।
यत्र प्रतिबन्धके नोत्तेजकं तत्र प्रतिबन्धकाभावस्य कारणत्वकल्पना-
दन्यत्रापि हेतुत्वेन तत्त्वेन तत्रावच्छेदकान्तरकल्पनौचित्यात्, न तु
विशेषसामग्र्यन्तरकल्पनं गौरवात् । किञ्च उत्तेजकमननुगतमिति न
दाहहेतुः । तत्तदुत्तेजकयावद्भावविशिष्टमण्याद्यभाव एवानुगत इति
स एवानुगतो हेतुः । अत एव पक्षतायां अनुमितिहेतुत्वम्, अन्यथा
सिद्ध्युत्तरानुमितित्वावच्छिन्ने सिषाधयिषाविशेषसामग्री सामान्यसा-
मग्रीपरामर्शमात्रमिति तस्या अहेतुत्वात् । नन्वेवं संशयोत्तरप्रत्यक्षत्वा-
वच्छिन्ने विशेषदर्शनरूपसामग्र्यन्तरं न कल्प्येतेति चेत् । न इष्टत्वात्,
विशेषादर्शनसहकृतसंशयाभावस्यैव हेतुत्वादिति केचित् ।

(चि०) ननु मा भूत् अर्थापत्तिः शक्तौ मानमनु-

Digitized by Arya Samaj Foundation Chennai and eGangotri



मानन्तु स्यात् । तथाहि स्थिरोऽवयवी जनकदशाविशि-
ष्टो वह्निरजनकदशाव्यावृत्तभावभूतधर्मवान् जनकत्वात्
कुण्ठकुठाराक्तीक्ष्णकुठारवत् दाह्यासंयुक्तवह्नेर्दाह्यसंयु-
क्तवह्निवच्च प्रतिबन्धकसत्त्वे संयोगादेरजनकदशावर्ति-
त्वेन तदतिरिक्तातीन्द्रियभावभूतधर्मसिद्धिः। यद्यपि श-
क्तेर्भावहेतुजन्यत्वेन नाजनकदशाव्यावृत्तत्वं, तथाप्युक्त
विशिष्टायास्तथात्वम्। यद्वा धर्मेऽतीन्द्रियत्वं विशेषणम्
न च दृष्टान्तासिद्धिः, तुल्याधारत्वेऽपि लोहविशेषघटित-
ठारे विलक्षणच्छिदाक्रियारूपकार्यबलादतीन्द्रियतीक्ष्ण-
त्वसिद्धेः। अथ वा तथाभूत एव वह्निः कार्यानुकूला-
तीन्द्रियद्विष्ठधर्मसमवायी जनकत्वात् आत्मवत्
अतीन्द्रियत्वञ्च यद्यपि न साक्षात्कारविषयत्वम् अ-
नित्यसाक्षात्कारविषयत्वं योगजधर्माद्यजन्यसाक्षात्का-
विषयत्वं वा, परं स्वं वा प्रत्यसिद्धेः, संयोगादिपञ्चकजन्य-
ज्ञानाविषयत्वमैन्द्रियकाणामपि। तथापि संयोगाद्यन्यत-
रप्रत्यासत्तिजन्यसाक्षात्कारविषयत्वमुभयवादिसिद्धम्
अन्यतरत्वञ्च तदन्यान्यत्वम्। नचाभावातीन्द्रियत्वं, तस्य
सिद्धेः। न च वह्नौ स्थितिस्थापकेनार्थान्तरं, तत्र तदभावात्
क्रियाया वेगेनादृष्टवदात्मसंयोगेन वोत्पत्तेः। न चात्म-
त्वं नित्यत्वं वोपाधिः, स्पर्शैकत्वादिमति द्व्यणुके साध्या-
व्यापकत्वात्। यद्वा पिण्डीभूतो वह्निः दाहानुकूलाद्रि-
ष्टातीन्द्रियभावभूतधर्मवान् दाहजनकत्वात् आत्मवत्
न चात्मत्वमुपाधिः, अदृष्टत्वस्य दाहानुकूलत्वेनादृष्टे सा-
ध्याव्यापकत्वात्। अथ वा करवह्निसंयोगः कार्यानुकूला-
तीन्द्रियधर्मसमवायी जनकत्वात् आत्मवत् द्व्यणुकवच्च
न चात्मत्वं द्रव्यत्वं वोपाधिः, द्व्यणुकैकत्वस्पर्शादि-
साध्याव्यापकत्वात्। यद्वा प्रतिबन्धकदशायां प्रत्यक्ष

Digitized by Arya Samaj Foundation Chennai and eGangotri
2669



सकलदाहहेतुसमवहितो दाहाजनको वह्निर्जनकदशावृत्तिकार्य्यानुकूलभावभूतधर्म्मशून्यः अजनकत्वात् कुण्ठकुठारवत् । यद्वा तथाभूतो वह्निः दाहजनकदशावृत्तिदाहानुकूलभावभूतधर्म्मशून्यः दाहाजनकत्वात् दाह्यासंयुक्तवह्निवत् । अनुकूलत्वञ्च कार्य्याभावप्रयोजकाभावप्रतियोगित्वं कारणतदवच्छेदकसाधारणं, दृढदण्डत्वेन कारणत्वे दृढत्वाभावादापि कार्य्याभावदर्शनादिति ।

( प्रका० ) ननु शक्तिरूपसाध्याप्रसिद्धेर्नानुमानं स्यादित्यत आह *तथाहीति* । अवयवी प्रत्यक्ष इत्यर्थः । अन्यथा वह्नित्वस्य परमाण्ववृत्तित्वेनाव्यावर्त्तकतापत्तेः । अत्र च प्रतिबन्धकसमवधानदशायां यादृशसंयोगवान्वह्निः प्रतिबन्धकाभावकालेपि तादृशदाह्यसंयोगवानेव वह्निः स्थिरपदेन विवक्षित इति न दाह्यसंयोगेनार्थान्तरम् । ननु यावदजनकदशायां व्यावृत्तत्वं शक्तेर्नास्ति यत्किञ्चिदजनकदशाव्यावृत्तत्वं दाह्यसंयोगादेरपीत्यर्थान्तरमित्यपरितोषादाह *यद्वेति* । न चैवं भावभूतपदं व्यर्थम्, दुरदृष्टाभावादेरतीन्द्रियस्य वारणाय तदुपगमात् । भाट्टमतेऽनुपलब्धिगम्यतयाभावमात्रस्यैवातीन्द्रियत्वाद्वा ।

वस्तुतस्तु संयोगाद्यन्यतमप्रत्यासत्तिजन्यसाक्षात्काराविषयत्वमभावमात्र एवेत्यनुपदमेव स्फुटम् । ननु लोहविशेषस्यैव सातिशयच्छिदाजनकत्वादतीन्द्रियतैश्ये मानाभावः, अतिरिक्तपदार्थापत्तेश्चेत्यस्वरसादाह *अथ वेति* । कार्यानुकूलत्वं स्वनिमित्तकारणककार्यानुकूलत्वं विवक्षितं, तेन कर्मानुकूलस्थितिस्थापकेन नार्थान्तरं कर्मणि तु वह्निः समवायिकारणमिति नोक्तदोषः । वह्नौ स्थितिस्थापकाभावपक्षे कार्यानुकूलपदमुद्देश्यसिद्ध्यर्थम् । अदृष्टवदात्मसंयोगोष्णस्पर्शप्रतिबन्धकाभावादिनार्थान्तरवारणायाद्विष्ठादिविशेषणम् । यद्यपि गुरुमतेऽभावोऽधिको नास्त्येवेति समवायपदमधिकं, तथापि परस्यार्थान्तरं स्यादेवेति तद्वारणाय तदुपात्तमिति ध्येयम् ।

*ऐन्द्रियकाणामिति* । वस्तुतस्तु संयोगादिपञ्चकजन्यज्ञानस्याप्रसिद्धेः साध्याप्रसिद्धिर्द्रष्टव्या । *तथापीति* । यद्यपि जन्यान्तं व्यर्थं तदजन्यसाक्षात्कारस्य व्यावर्त्यस्याप्रसिद्धेः, तद्रहितं च न्यायनयेऽप्रसिद्धं तथापि विशिष्टाभावे न वैयर्थ्यमिति ध्येयम् । अत्र संयोगादीत्यर्थः । तेनात्ममनोयोगस्य योगिप्रत्यक्षादावपि जनक-

Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



त्वान्न परं प्रत्यसिद्धिरिति मन्तव्यम् । *न चाभावेति* । उक्ता तीन्द्रियत्वस्य तत्रापि भावादिति भावः । *तस्येति* । गुरुमतेति रिक्तस्य तस्यासिद्धेरित्यर्थः । नैयायिकमते च परिभाषिकस्य निरु क्तस्यातीन्द्रियत्वस्याभावे वृत्तावपि न काचित्क्षतिः । तमादायार्थान्त रशङ्कायाः समवायिपदेनैव वारणादिति भावः । परमाणौ साध्याव्या तेराह *यद्वेति* । यद्वा कार्यस्य विशेषरूपेण सिद्ध्यर्थमाह—यद्वेति अदृष्टत्वस्य धर्मत्वादेरित्यर्थः । *अनुकूलत्वेनेति* । कारणतदवच्छे दकसाधारणस्य तस्य तस्याग्रे निरुक्तत्वादिति भावः । यद्यपि तन्मते धर्मत्वादिकं न कारणतावच्छेदकं किन्तु शक्तिरेव, तथापि न्यायनये धर्मत्वादिकमादाय तन्मते शक्तिमादाय साध्यमस्त्येवादृष्टे, उपाधिस्तु नेत्युभयसिद्धसाध्याव्यापकत्वमिति भावः । अद्विष्ठपदानुपादानात्सा ध्ये लाघवं स्थितिस्थापकेन नार्थान्तरत्वशङ्कापीति मनसि कृत्वाह— *अथवेति* । कार्यानुकूलत्वं स्वकार्यानुकूलत्वं तदप्युद्देश्यसिद्धये संयोगत्वेनार्थान्तरवारणायातीन्द्रियेति । उक्तातीन्द्रियत्वस्य प्रतिब न्धकाभावेपि सत्त्वात्परमतेऽर्थान्तरशङ्का माभूदित्यत उक्तं समवा यीति । *जनकत्वादिति* । न चाभावे व्यभिचारः, समवायगर्भ साध्यस्य तत्रासत्त्वादिति वाच्यम् । परैरभावानङ्गीकारात् । ननु तथापि समवाये व्यभिचारः । न च तत्रापि शक्तिसमवायोस्त्येवेति वाच्यम् अनवस्थानादिति चेन्न । निमित्तकारणतातिरिक्तकारणताश्रयत्वस्य हे त्वर्थत्वात् । तच्च यत्किञ्चित्कार्यं प्रत्येव विवक्षितं न तु दाहलक्ष प्रतीति नासिद्धिरिति ध्येयम् । अत्र साध्ये हेतौ च दाहपदप्रक्षेपे बह्निपक्षकानुमान इवानुमानान्तरमपि ग्रन्थकृदभिमतं लेखकप्रमा दान्न प्रचरतीति ध्येयम् । अत एवैतदन्तर्भावेनैव वक्ष्यति—'अग्निमच तुर्षु बहिरिन्द्रियाप्रत्यक्षत्वमुपाधिरिति, अन्यथा तदसङ्गतत्वापत्ते रिति वक्ष्यते । *न चात्मत्वमिति* । न च द्रव्णुकादौ साध्याव्याप्ति रिति वाच्यम् । दाहजनकत्वरूपपक्षधर्मावच्छिन्नसाध्यव्यापकत्वादिति भावः । शुद्धसाध्यव्यापकमाह *द्रव्यत्वमिति । द्व्यणुकेति* । नन्वेक त्वत्वस्पर्शत्वजातौ नातीन्द्रिये द्व्यणुकैकत्वत्वद्व्यणुकरूपस्पर्शत्वोपाधी च समवेतौ तथाच तत्र साध्यासत्त्वान्न साध्याव्याप्तिरिति चेत् ।

अत्र केचित् । अतद्गुणसंविज्ञानबहुव्रीहिणा गुरुत्वधर्मादिकमुक्तं त साध्याव्यापकत्वमस्त्येवेत्याहुः ॥

अन्ये तु धर्मांशस्याविवक्षितत्वेन तत्समवायित्वस्य तन्निरूपितस मवायाश्रयत्वार्थकतया समवायिद्व्यणुकमादायैव तत्र साध्यसत्त्वमिति

Digitized by Arya Samaj Foundation Chennai and eGangotri



दन्ति । शक्तिवदुपाधिरपि समवैति, अन्यथोपाधिरसंबद्धः स्यात्तन्मते विशेषणताया अनभ्युपगमादित्यप्याहुः ।

नन्वनुकूलत्वं यदि जनकत्वं तदा शक्तावेतदभ्युपगमेऽपसिद्धान्तः । अथावच्छेदकत्वं तदा दृष्टान्तासिद्धिः, आत्मन्यदृष्टरूपतादृशधर्मस्य जनकत्वादित्युभयसाधारणं तदाह *अनुकूलत्वं चेति० ।

( चि० ) उच्यते । साध्यं विनाप्युभयसिद्धप्रतिबन्धकाभावादेव जनकत्वादिहेतुसम्भवात् विपक्षबाधकाभावेनानुमानानामप्रयोजकत्वम् । यदि च सहचारदर्शनव्यभिचारादर्शनोपाध्यनुपलम्भमात्रादेव व्याप्तिग्रहस्तदा शक्तिसिद्ध्यनन्तरं तेनैव हेतुना शक्त्यतिरिक्तत्वप्रक्षेपेण शक्त्यतिरिक्तदाहानुकूलातीन्द्रियधर्म्मसिद्धिः । एवं तत्तदतिरिक्तत्वस्य प्रक्षेपात्तेनैव हेतुनाऽनन्ततादृशधर्म्मसिद्धिप्रसङ्गः । द्वितीयादितादृशधर्म्मं विनापि प्रथमानुमितशक्त्यैव जनकत्वाद्युपपत्तेर्न तादृशानन्तधर्मसिद्धिरिति चेत्, हन्तैवं शक्तिं विनापि तदर्थसिद्धेः किं शक्त्या । यद्धीश्वरानन्त्यवन्न शक्त्यानन्त्यमित्युक्तम् । तदबोधात् । कार्य्यमात्रे हि कर्तृत्वेन कारणत्वं न त्वीश्वरत्वेन द्विकर्तृकत्वादिना वा, गौरवात्, घटे त्वार्थः समाजः । एवञ्च जनकदशाव्यावृत्तत्वेनैव प्रयोजकत्वं न तु भावभूतत्वेनेति गौरवात् । अपि च भावकार्य्यमात्रस्य समवायिकारणजन्यत्वेन शक्तेरपि तथात्वात् शक्त्यनुकूला शक्तिरपरा समवायिकारणे मन्तव्या एवं सापि समवायिकारणजन्येति तदनुकूलशक्तिस्वीकारे शक्त्यनवस्था । किञ्च प्रथमानुमानेऽजनकत्वं न स्वरूपायोग्यत्वम्, वह्नौ कुठारे च तदभावात्, किन्तु कार्य्यानुपधानम् । तथा च तदुपधानदशायामपि वह्नौ शक्तिः कुठारे तैक्ष्ण्यमिति बाधो दृष्टान्तासिद्धिश्च, लौहविशेषाणामेव सातिशयच्छि-

Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



दाजनकत्वमतो नातीन्द्रियतैक्ष्ण्यप्रसिद्धिः । अग्रिमच बहिरिन्द्रियाप्रत्यक्षत्वमुपाधिः तुल्ययोगक्षेमत्वेऽपि न्दिग्धोपाधित्वेन दूषकत्वात् । अपिच जनकत्व केवलान्वयित्वेन व्यतिरेकाप्रसिद्ध्या नान्वयव्यतिरेकी न च जनकत्वाभावस्य शक्तावेव प्रसिद्धिः, अन्यो श्रयात् । न च गुरुवचनपरम्परात एव वाक्यार्थतया त प्रसिद्धिः त्वन्नये सिद्धार्थस्याप्रमाणत्वात् । न च परार्द्धे ख्यायां साध्यजनकत्वव्यतिरेकयोः प्रसिद्धिः, अप्रत्य क्षायाः शब्दैकवेद्यायास्तस्याः प्रत्यक्षेण साध्यहेतुव्य तिरेकयोर्ग्रहीतुमशक्यत्वात् । एतेन पण्डापूर्वेऽपि त प्रसिद्धिरपास्ता ।

(प्रका०) *उभयसिद्धेति* । तथाच प्रतिबन्धकाभावस्यैव दा दिप्रयोजकत्वं कल्प्यते धर्मकल्पनाया एव लघुत्वादिति तात्पर्यार्थ *घटे त्वार्थः समाज इति* । ईश्वरकर्तृकत्वस्य न्यायप्राप्तत्वात्कुलाल र्तृकत्वस्य घटत्वावच्छेदेन अन्वयव्यतिरेकसिद्धत्वादिति भावः । *सत्तसाध्यक वायिकारण इति* । यद्यपि निमित्तकारणेऽपि शक्तिरस्त्येवेति तद्गा प्यनवस्था भवत्येव, तथाप्येककार्यमात्रे समवायिकारणजन्यत्वं परो मन्यते तन्मते कारणस्येव कार्यस्यापि समवायस्य तथाभावाभावात् थापि समवेतकार्यं प्रति तथात्वं स्वीकार्यमेवेति भावः । न चेयमनवस्था प्रामाणिकी प्रमाणाभावात । न कार्यान्यथानुपपत्तिरेव मानं, तस्या भयसिद्धप्रतिबन्धकाभावेनैवोपपत्तेः । न चाभावो न कारणं भावा द्ग्राहकतौल्यात् । एवञ्च गुणादिनिष्ठशक्तौ गुणादीनां समवायिकार त्वापत्तौ द्रव्यत्वापत्तिरित्यपि दूषणं द्रष्टव्यम् । न च नित्यैव शक्ति कार्येति वाच्यम् । 'अनित्ये भावहेतुर्जाति'तत्सिद्धान्तात् । किञ्चैवं प्रति द्धवहेरपि दाह्यापत्तिः । न चोद्भूता शक्तिस्तदा नास्तीति वाच्यम् उद्भूतत्वमपि यदि नित्यं तदा स एव दोषः । अथानित्यं, तदा त ननानुकूला शक्तावपि शक्तिः स्वीकार्या । एवं तत्राप्युद्भूतत्वजन नुकूलं शक्त्यन्तरमित्यनवस्थापत्तेः, उद्भूतत्वस्यैव शक्तिस्थानाप षेचनीयतया नित्यशक्तौ मानाभावश्चेति भावः । प्रथमानुमान इत्यु लक्षणम् । अजनकत्वगर्भद्वितीयानुमानेपीति द्रष्टव्यम् । ननूद्भू

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

Digitized by Arya Samaj Foundation Chennai and eGangotri



त्वविशिष्टा शक्तिरजनकदशाव्यावृत्तेति पूर्वपक्ष एवोक्तमिति न बाध
इति चेन्न । नित्यानित्यविकल्पेन पूर्वोक्तेनोद्भूतत्वे मानाभाव इत्ये-
तदवष्टम्भेनैतस्योक्तत्वात् ।

वस्तुतः प्रतिबन्धकाल एव परं शक्तौ नोद्भूतत्वं तथा च सहका-
र्यन्तरविरहप्रयुक्तं यदा वह्नौ कार्यानुपधानं तदा उद्भूतत्वविशिष्टाया-
स्तस्याः सत्त्वाद्बाध एवेति भावः । अतीन्द्रियत्वगर्भे साध्ये प्रागुक्तं
दृष्टान्तासिद्ध्युद्धारं परिहरति *लोहेति* । *अग्निमेति* । यद्वा धर्मे-
ऽतीन्द्रियत्वमित्यादिचतुर्थीत्यर्थ इति केचित् । तन्न । कुठारे साध्या-
व्यापकतापत्तेः । तदनुमाने कुठारस्यैतद्दृष्टान्तत्वेन तत्र साध्यसत्त्वात् ।
अप्रत्यक्षेण च लोहविशेषाणामित्यनेन तत्र साध्याभावव्यवस्थितेर्नैवमिति
वाच्यम् । एवं साध्यव्यापकताग्रहस्थलाभावादेव नोपाधिः । न चा-
मेव तथेति वाच्यम् । अदृष्टादेरजनकदशावृत्तित्वेन तत्र साध्यासत्त्वा-
त् । न च जनकदशावृत्तिपरमाण्वादिसंयोगमादाय तत्रापि साध्यस-
त्त्वमिति वाच्यम् । एवं हि तादृशसंयोगमादाय घटादावपि साध्यस-
त्त्वेनोपाधेः साध्याव्यापकत्वात् । न च गुरुत्वाभावरूपपक्षधर्मावच्छि-
न्नसाध्यव्यापकत्वमिति वाच्यम् । सौरालोकादावपि तादृशपरमाणु-
संयोगसत्त्वेन साध्याव्यापकत्वात् । तस्मात्पूर्वोक्तसंयोगपक्षकदाहघटि-
तः । *सत्तसाध्यकानुमानेन सह चतुष्टयमभिमतम् । न चात्र स्थितिस्थापकवति
वृक्षादौ साध्याव्याप्तिरिति वाच्यम् । कार्यानुकूलेत्यस्य स्वनिमित्तकका-
र्यानुकूलेति विवक्षया स्थितिस्थापकस्य तथात्वेन वृक्षादौ तथाऽस-
त्त्वात् । कार्यपदस्य वह्निकार्यपरत्वाद्वा । तथा च तादृशसाध्यमात्मन्येव,
तत्र चोपाधिरस्त्येवेति न साध्याव्याप्तिरिति भावः ।

अपरे तु चतुर्षु मध्ये कार्यानुकूलेत्यादिघटितानुमानत्रयेऽयमुपावि-
रित्यर्थ इत्याहुः ।

*अपिचेति* । तन्मते चान्वयव्यतिरेक्येव गमक इति भावः ।
*सिद्धिरिति* । शक्तिसिद्धिरित्यर्थः । तथा चैतदनुमानेनैव न शक्ति-
सिद्धिर्येनान्योन्याश्रय इति भावः । परार्द्धसङ्ख्यायामित्युपलक्षणम् ।
परममहत्त्वपरमाणुपरिमाणादावपि द्रष्टव्यम् । *अप्रत्यक्षाया इति* । ननु
प्रत्यक्षमेव न व्याप्तिग्राहकम्, अतीन्द्रियानुमानस्थले तदभावात् ।
तथा च मानान्तरेण साध्यहेतुप्रतियोगिकव्यतिरेकव्याप्तिग्रहोऽस्त्विति
चेत् । अत्र प्रत्यक्षाभिप्रायेणैतदुक्तम् । वस्तुतोऽन्यथोपपन्नतया सर्वमे-
वानुमानमप्रयोजकमित्याहुः ।

वस्तुतो मानान्तरशब्दः सिद्धार्थत्वात् नानुमानम् । कार्यानुकूला-

Digitized by Arya Samaj Foundation Chennai and eGangotri



तीन्द्रियधर्माभावानुमानं हि जनकत्वाभावेनैव लिङ्गेन वाच्यं, जन
त्वसत्त्वे तादृशधर्मसत्त्वस्यावश्यकत्वात् । जनकत्वाभावानुमानं च
दृशधर्माभावेन तादृशधर्मस्य जनकतावच्छेदकस्य सत्त्वे जनकत्व
प्यावश्यकत्वात् । एवञ्च हेत्वभावेन साध्याभावः साध्याभावेन हे
भावोऽनुमेय इति व्यक्तोऽन्योन्याश्रय इति भावः । यद्वा तदनुमान
साध्यसाधनाभावव्याप्तिग्रहमन्तरेण न स्यात्तद्ग्रहश्च न तदुभयव्याप्
कप्रसिद्धिं विना तदुभयव्यतिरेकश्च साध्यसाधने एवेति साध्या
धनव्याप्तिग्रहे तदुभयाभावव्याप्तिधीस्तस्यां च सत्यां तदुभयव्याप्ति
रित्यन्योन्याश्रय इति भावः । न चान्वयव्याप्तिधीर्न व्यतिरेकव्याप्ति
हेतुरिति नान्योन्याश्रय इति वाच्यम् । तथाप्यन्वयव्याप्त्यग्रहा
तदनुपपत्तेरिति भावः । *एतेन पण्डेति* । न च पण्डापूर्वादौ स्व
ससाक्षात्कारजनकत्वेन जनकत्वाभाव एव नेति वाच्यम् । अतीं
यत्वेन योगिज्ञानस्य विषयाजन्यतया च साक्षात्काराजनकत्वात् ।
न्मते ध्वंसस्याधिकरणादिरूपतया तदसाध्यत्वाच्चेति भावः ॥

( चि० ) स्यादेतत् तृणारणिमणीनां वह्नौ कार
त्वादेकशक्तिमत्त्वमुपेयम्, एकजातीयकार्य्ये ए
जातीयकारणत्वनियमात् । वह्न्यवान्तरजातीये ते
प्रत्येकं कारणत्वमिति चेन्न । वह्निजातीयत्वस्याकस्मि
तापत्तेः, कारणगतैकरूपमपहाय कार्य्यगतबहुतररू
कल्पने गौरवात् । तृणारणिमणिप्रभववह्निष्ववान्त
जातेरनुपलब्धिबाधितत्वाच्च । यत्र च तत्तादिन्धनप्र
ज्यं प्रदीपदारुदहनादौ वैजात्यमनुभूयते तत्र कारणेष
कशक्तिमत्त्वमपि नास्ति । किञ्च गोमय-वृश्चिकप्रभ
वृश्चिकादिषु वैजात्यकल्पने तत्प्रभववृश्चिकेष्वपि वैजा
कल्प्यम्, एवं तत्प्रभवत्वं तत्प्रभवेष्वपीति वैजात्या
न्त्यं विजातीयकारणानां विजातीयकार्य्यजनकत्वनि
मात् । न च तयोर्नैको वृश्चिको, बुद्धिव्यपदेशयोरवि
षात् । यदि विजातीयेष्वेककार्यशक्तिसमवा
न कार्य्यविशेषात् कारणविशेषः तदभावात्तदभावः

CC-0. Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



प्यनुमीयेत तदभावेऽपि तज्जातीयशक्तिमतोऽन्यस्मादपि तदुत्पत्तिसम्भवादिति चेत्, वह्निवृश्चिकादावेवमेतत् निरूपितनियतवह्न्यादिकारणकधूमादौ कुतो न तदनुमानम्। अन्यथा कार्यवैजात्येऽपि तृणस्य वह्निविशेष इव वह्नित्वेन धूमविशेष एव कारणत्वं न तु धूममात्रे। तृणादिप्रभवत्वग्रहानन्तरं वह्न्यवान्तरजातिग्रहवत् वह्नितदन्यजन्यत्वज्ञानानन्तरं धूमावान्तर-जातिग्रहो भविष्यतीत्यप्याशङ्क्येत। बाधकं विना धूमत्वेन वह्निकार्यतेति चेत्, तर्हि बाधकं विना धूमं प्रति वह्नित्वेन कारणतेत्यपि तुल्यम्।

यत्तु तृणत्वेन कारणत्वग्रहस्योपजीव्यत्वात्तद्रक्षार्थं वह्नौ जातिविशेष एव कल्प्यते इति। तन्न। वह्नित्वेन कार्यत्वग्रहात्तद्रक्षार्थं तृणादौ शक्तिकल्पनौचित्यात्। यथा चान्वयव्यतिरेकाभ्यां तृणफूत्कारयोः परस्परसहकारित्वं तथैव तच्छक्त्योरपि परस्परसहकारित्वेन वह्न्यनुकूलत्वं, तथैव कार्यदर्शनात्। एवं तृणारणिमणिफूत्कारनिर्मन्थनतरणिकिरणानां वह्न्यनुकूलशक्तिमत्त्वेन कारत्वेऽपि फूत्कारेण तृणादेव निर्मन्थनेनारणेरेव प्रतिफलिततरणिकिरणैर्मणेरेवाग्न्युत्पत्तिः, न तु मणिफूत्कारादिभ्यो, मणिफूत्कारशक्त्योः परस्परसहकारित्वविरहात्। यत्तु तृणफूत्कारादिस्तोमत्रये विशिष्टे शक्तिरिति। तन्न तृणत्वेन गृहीतकारणताभङ्गप्रसङ्गादिति।

(प्रका०) *तृणारणीति*। तथा च वह्नित्वप्रयोजकतया तृणादीनामेकानुगतशक्तिसिद्धावन्यत्रापि तदनुमानमिति भावः। ननु वह्निनिष्ठा जातिः प्रमाणसिद्धा, तथा च "धर्मिकल्पनात" इति न्यायात्तस्या एवावच्छेदकत्वं कल्प्यते न शक्तिरित्यत आह-*तृणारणीति*। तथा च जातित्रयमपि कल्प्यमेवेति तदपेक्षयैकशक्तिकल्पनमेव लघ्विति भावः।

Digitized by Arya Samaj Foundation Chennai and eGangotri



*यत्र चेति* । तत्रोक्तन्यायावतारादिति भावः । शङ्कते *यदीति* । जात्ये–वैजात्यपक्षे । इत्यप्याशंक्येतेत्यन्वयः । नन्वेवं तृणनिर्मन्थनाभ्य मप्यग्न्युत्पत्त्यापत्तिः, कारणतावच्छेदकावच्छिन्नघटितसामग्रीसत्त्वा त्यत आह *यथा चेति* । *तथैव तच्छक्त्योरपीति* । नन्वेवं का वैजात्यमावश्यकम्, एकजातीयकार्ये सहकारिनियमानुपपत्तेः । स फलविरोधेन परं स्यात् । स च कार्यतावच्छेदकभेदेन, स च प्रकृते कार्यवैजात्यं विना, एवञ्च नैकशक्तिमत्त्वेन जनकत्वमिति चेत् ।

अत्राहुः । तृणादीनां वह्नित्वावच्छिन्नं प्रत्येकशक्तिमत्त्वेन फूत्कार दीनां च तृणजन्यवह्नित्वाद्यवच्छिन्नं प्रति जनकत्वेनैव शक्तिसिद्धिस कारिनियमयोरप्युपपत्तिरिति ।

केचित्तु यथा प्रागभावत्वेन कार्यमात्रं प्रति कारणत्वेऽपि घटप्रागभ घो न पटं प्रति योग्यः । यथा वा जन्यविशिष्टज्ञाने विशेषणज्ञानत्वे कारणत्वेऽपि घटत्वज्ञानं पटत्वविशिष्टज्ञानं प्रति न स्वरूपयोग्यं त फूत्कारादीनामेकशक्तिमत्त्वेन कारणत्वेऽपि न तृणनिर्मन्थनादिभ्यो ह्न्युत्पत्तिरित्याहुः ।

तृणफूत्कारसम्बन्धतरणिकिरणमणिसम्बन्धादिष्वेकजातीयशक्ति मत्त्वं कारणतावच्छेदकम्, तथा च तदन्यतमसम्बन्धाभावे तृणनिर्मन्थ समवधानेऽपि नाग्न्युत्पत्तिरित्यप्याहुः ।

स्वैकदेशिमतं दूषयति *यत्त्विति* । *तृणत्वेनेति* । यद्यपि परम तृणत्वेन न कारणता किन्त्वेकशक्तिमत्त्वेन, अन्यथा तद्रक्षार्थं कार्य जात्यकल्पनापत्तेः । तथापि तृणादिप्रत्येकवृत्तित्वं लाघवात् । कारणत पदेन शक्तिरेवात्र विवक्षिता । तथा च तृणत्वावच्छेदेन गृहीतशक्तिभ प्रसङ्गादित्यर्थः । तृणादिशक्तेश्चैकजातीयत्वेनानुगमः । एकजातिप्रयो कं च तत्रादृष्टादिकम् । न च गौरवम्, प्रामाणिकत्वादिति भावः ॥

(चि०) उच्यते । तृणारणि–मणि–फूत्कारादिव्य क्तीनामानन्त्येन प्रतिव्यक्ति भावहेतुजनितानन्तशक्ति स्वीकारे गौरवं तावदनन्तव्यक्तिजन्यानन्तवह्नित्व्यक्ति जातित्रयकल्पने लाघवमिति तदेव कल्प्यते । न च जाति योग्यानुपलब्धिबाधः, गोमयवृश्चिकप्रभववृश्चिकयो रीषन्नीलत्वकपिलत्वव्यङ्ग्यवैजात्यस्य प्रत्यक्षसिद्धत्वात तृणजन्यनानावह्नित्व्यक्तिषु तृणजन्यत्वज्ञानानन्तरं मणि

Digitized by Arya Samaj Foundation Chennai and eGangotri



न्यव्यावृत्ताऽनुगतबुद्धिरस्ति जातिविषया । तृणजन्यत्वेनोपाधिनाऽसाविति चेन्न । बाधकं विनानुगतबुद्धेस्तद्ध्रुवजातिविषयत्वनियमात् । न च गोमयवृश्चिकप्रभववृश्चिकपरम्परायामननुगतजात्यापत्तिः, गोमयजन्यवृश्चिक-प्रभववृश्चिकेषु वृश्चिकप्रभवत्वजातेः सत्त्वात् । वह्निमात्रे च दाहस्पर्शवानवयवः तत्संयोगः पवनादिश्च कारणानि । न च तृणादिकं विनापि तदुत्पत्तिप्रसङ्गः, विशेषसामग्रीमादायैव सामान्यसामग्रया जनकत्वात् ।

(प्रका०) *प्रतिव्यक्तीति* । एतच्च 'अनित्ये भावहेतुजा' इति सिद्धान्तात् । नित्यशक्त्यभ्युपगमे च पूर्वोक्त एव दोषो द्रष्टव्यः। *जातीति* । नच मण्यादौ कारणे एवैकजातिः कल्प्यतां लाघवादिति वाच्यम् । प्रस्तरत्वादिना सङ्करापत्तेरिति भावः । *प्रत्यक्षसिद्धत्वादिति* । तथाच 'धर्मिकल्पनात' इति न्यायेन तस्या एव जातेरवच्छेदकत्वमात्रं कल्प्यते न तु शक्तिं कल्पयित्वा तदवच्छेदकत्वमिति भावः । एतदपि जातेः प्रामाणिकतया तदवच्छेदकत्वस्यैव लाघवादौचित्यमित्यभिप्रेत्योक्तम् ।

वस्तुतः कार्यतावच्छेदकाननुगमस्यादोषत्वाज्जात्यभावेऽपि तत्तद्वह्नित्वस्यैवावच्छेदकत्वसम्भवान्न शक्तिसिद्धिरित्यवधेयम् । तन्मते जातेः संस्थानमात्रव्यंग्यतया शक्तौ जात्यभावे कथमनुगम इत्यपि दूषणं बोध्यम् । वह्निवृत्तिजातौ योग्यानुपलब्धिबाधं निराकरोति *तृणजन्येति* अन्यथा विशुद्धमातापितृजन्यत्वेनैव ब्राह्मणानुगतबुद्धेस्तत्रापि जात्यभावः स्यादिति भावः। वैजात्यानन्त्यमुद्धरति—*गोमयेति* । यद्यपि गोमयवृश्चिकप्रभवयोर्वृश्चिकप्रभवयोर्वृश्चिकयोर्वैजात्यमस्ति तथापि वृश्चिकत्वमनुगतमप्यस्ति । तदेवाग्रिमवृश्चिके जनकतावच्छेदकमिति सर्वत्र वृश्चिकप्रभवत्वप्रयोज्यजातिमत्त्वमिति नानन्त्यमिति भावः । वह्निजातीयत्वाकस्मिकत्वप्रसङ्गं प्रागुक्तमुद्धरति *वह्निमात्र इति* । यद्यप्युदर्यवह्नेरनुद्भूतः स्पर्श इति लीलावत्यादौ व्यवस्थापनात्तत्र कथं वह्नित्वं प्रयोजकाभावात् तथापि भौमवह्निमात्र एव तत्प्रयोजकत्वमुक्तमिति भावः । केचित्तु लीलावतीग्रन्थ आपाततः । वस्तुतस्तत्रोद्भूतस्पर्श इत्याहुः ।

*पवनेति* । तदुत्कर्षेण वह्न्युत्कर्षदर्शनादिति भावः ।

( चि० ) ननु तृणारणिमणीनां वह्नौ कारणत्वग्रहे

Digitized by Arya Samaj Foundation Chennai and eGangotri



शक्तिवैजात्ययोरन्यतरकल्पनं तद्ग्रहश्च नान्वयव्यतिरेकाभ्यां, व्यभिचारात्। अथारणिमण्यभाववति स्तोमविशेषे तृणं विना वह्निव्यतिरेकः तृणान्वये वह्निरित्यन्वयव्यतिरेकाभ्यां तत्रैव स्तोमे तदितरहेतुसकलसमवधाने तृणान्वयेऽवश्यं वह्निरिति नियतान्वयेन रासभादिव्यावृत्तेन तृणादिकारणत्वग्रह इति चेन्न। तृणं विनापि वह्निरिति ज्ञाने सति वह्नि नियतपूर्ववर्त्तित्वस्य कारणत्वस्य ग्रहीतुमशक्यत्वात्। तृणाजन्ये वह्नौ मणेः कारणत्वग्रह इति चेत्। न। व्यभिचारेण वह्नौ तृणजन्यत्वाग्रहे तदजन्यत्वस्याप्यग्रहात् वह्निमात्रस्यैव तदजन्यत्वाच्च। न च मण्यजन्यत्वेन तृणजन्यत्वग्रहः, अन्योन्याश्रयात्। यत्तु यत्र कारणताग्राहकं नास्ति तत्र व्यभिचारस्तद्ग्रहपरिपन्थीति। तन्न। अबाधितनियतपूर्ववर्त्तित्वाभावग्रहे तद्ग्रहस्यासम्भवात् अभावप्रमायां भावज्ञानानुदयादिति। उच्यते। उक्तग्राहकैर्वह्निनिष्ठकार्य्यतानिरूपितकारणतावच्छेदकरूपवत्त्वं तृणस्य तृणनिष्ठकारणतानिरूपितकार्य्यतावच्छेदकरूपवत्त्वं वह्नेर्वाऽकार्य्याकारणव्यावृत्तं रूपं परिच्छिद्यते, न तु तृणत्वेन कारणत्वं वह्नित्वेन कार्य्यत्वं वा, तच्चोभयथापि सम्भवति वह्नित्वेन कार्य्यतया तदनुकूलशक्तिमत्त्वेन च तृणादीनां कारणतया वह्नित्वावान्तरजातिविशेषेण कार्य्यतया वा, तत्र च विनिगमकमुक्तमेव।

(प्रका०) तटस्थः शङ्कते *नन्विति*। ननु तृणजन्यत्वं तृणरूपादिप्रसिद्धं, तदभावश्च मणिजन्यवह्नौ सुग्रह इति तदवच्छेदेन मणिजन्यत्वं सुग्रहमित्यत आह—*वह्निमात्रस्येति*। व्यभिचारेण तृणस्याजनकत्वाद्वह्निमात्रस्यैव तृणाजन्यत्वादित्यर्थः। तथा च पुनः स एव व्यभिचार इति भावः।

Digitized by Arya Samaj Foundation Chennai and eGangotri



*उक्तग्राहकैरिति* । अन्वयव्यतिरेकाभ्यां नियतेनान्वयेन चेति कृत्वा बहुवचनोपपत्तिः । *अकार्याकारणेति* । ननु कारणत्वसंशये कथं तदवच्छेदकरूपवत्त्वनिश्चयः, तयोरेकनिश्चायकनिश्चेयत्वात्, किञ्च वह्निनिष्ठकार्यतायास्तृणनिष्ठकारणतायाश्चाग्रहे कथं तदवच्छेदकत्वेन ज्ञानं विशेषणज्ञानसाध्यत्वाद्विशिष्टज्ञानस्य । अपि च कार्यतावच्छेदकत्वं कार्यताद्याश्रयमात्रवृत्तित्वं, तद्ग्रहे च कार्यताद्याश्रयत्वमवश्यं विषयः । न च कार्यताद्यपि गृह्यत एवेति वाच्यम् । व्यभिचारेण तद्ग्रहस्याशक्यत्वादिति चेत् ।

अत्र वदन्ति । कार्यतादिकमप्यत्र गृह्यत एव । तेन नोक्तसर्वदोषावकाशः । न चोक्तव्यभिचारनिश्चये कथमव्यभिचाररूपनियमगर्भहेतुत्वग्रह इति वाच्यम् । समानप्रकारकविरोधिज्ञानस्यैव प्रतिबन्धकतया तृणत्वावच्छिन्नस्य वह्नित्वावच्छिन्ने व्यभिचारग्रहे तदवच्छिन्नस्य तदवच्छिन्ने हेतुत्वाग्रहेऽपि तदाश्रययोर्हेतुहेतुमद्भावग्रहस्याविरोधात् । अत एव यागं विनापि दानात्स्वर्गज्ञानेऽपि स्वर्गजनको याग इति धीः स्वर्गत्वसामानाधिकरण्येन यागजन्यत्वं विषयीकरोति, तदिदमाह—*ननु तृणत्वेन कारणत्वं वह्नित्वेन कार्यत्वं वेति* । यदि च कार्यकारणभाव एव न गृह्यते तदा न तु हेतुत्वं कार्यत्वं वेत्येव ब्रूयात् । न चैवं वह्नित्वावच्छेदेन व्यभिचारग्रहेपि वह्नित्वसामानाधिकरण्येन रासभजन्यत्वं गृह्यतामिति वाच्यम् । ग्राहकाभावात् । अत्र चारणिमण्यभाववतीत्यादिना ग्राहकस्योक्तत्वात् । न चैवं तृणनिष्ठकारणताप्रतियोगिककार्यताश्रयत्वं गृह्यत इत्येवास्तु किं तदवच्छेदकरूपवत्त्वपर्यन्तेनेति वाच्यम् । अग्निमविनिगमकगवेषणस्य सामान्यतावच्छेदकग्रहं विनाऽनुपपत्तेः । सामान्यतो दृष्टावतारं विना परिशेषानुदयादिति । यत्तु ससम्बन्धिकप्रत्यक्षज्ञाने सम्बन्धितावच्छेदकरूपवत्त्वज्ञानमावश्यकमिति तद्धियं विना न कार्यकारणभावग्रहः प्रत्यक्षेण, अत एव न शाब्दस्वर्गजनकत्वज्ञानप्रतिबन्धीति । तन्न । इयं वह्निव्यक्तिस्तृणजन्येति प्रत्यक्षेण तद्व्यक्तित्वादेरवश्यं भानात् । न च तस्यानवच्छेदकतया तदवच्छेदेन कार्यतावुद्धेर्भ्रमत्वापत्तिरिति वाच्यम् । कार्यतावुद्धाववच्छेदकत्वस्याप्यभानात् । भाने वा तदंशे भ्रमत्वेपि कार्यतांशे प्रमात्वादिति ॥

**( चि० ) अथ तृणारणिमणीनामभावत्रये न कार्यभावत्रयाभावे कार्यमित्यन्वयव्यतिरेकाभ्याम् अभावत्रयाभावत्वेन तृणादीनां कारणत्वमिति न व्यभिचारः**

Digitized by Arya Samaj Foundation Chennai and eGangotri



अभावाभावस्य भावपर्यवसन्नत्वादिति चेत् । अभाव-त्रयाणामभावः किं तृणादिप्रत्येकव्यापकोऽन्य एव उत तृणादि प्रत्येकमेव । आद्येऽभावस्य कारणत्वमिति किमायातं तृणादिकारणत्वे, द्वितीये तृणस्य नाराणिमण्यभावाभावत्वं तदुभयापत्तेः । एतेनाभावत्रये न कार्यं तदभावे कार्यमित्यन्वयव्यतिरेकाभ्यां तृणादिप्रत्येकस्य कारणत्वग्रह इति परास्तम् ।

(प्रका०) *अन्य एवेति । अभावत्रयप्रतियोगिको व्यासज्यप्रतियोगिताक इत्यर्थः । *अभावस्येति* । तथाच तृणोत्कर्षेण बह्वुत्कर्षोपि न स्यादिति भावः । *एतेनेति* । तृणस्य तदुभयत्वापत्येत्यर्थः । पूर्वं मिलितानां तृणादीनामभावत्रयाभावत्वेन हेतुत्वमाशङ्कितं इदानीं तु प्रत्येकस्येति न पौनरुक्त्यमित्याहुः ।

(चि०) स्यादेतत् । मा भूत् सहजशक्तिराधेयशक्तिस्तु स्यादेव, तथाहि व्रीहीन् प्रोक्षतीत्यत्र कालान्तरकार्यानुकूलोऽतीन्द्रियोऽतिशयः प्रोक्षणजन्योऽस्तीत्युभयवादिसिद्धम् । स व्रीहिसमवेतो न वेति संशये व्रीहिनिष्ठ एव वाच्यः, कथमन्यथा प्रोक्षितानामेव तेषां कालान्तरेऽवघातादौ विनियोगः । न च मन्त्रादिसहकृतत्वमेव व्रीहिषु विशेषः, तेषां चिरध्वस्तत्वात् ।

ननु कथं प्रोक्षितस्यैवावघातादौ अन्वयः 'व्रीहीनवहन्तीति' श्रुतेस्तन्मात्रान्वयेऽप्युपपत्तेः । अथ 'व्रीहिभिर्यजेत' 'व्रीहीन् प्रोक्षति' 'व्रीहीनवहन्ति' 'पुरोडाशैर्यजेते'त्यत्र यथा पुरोडाशे प्रकृत्यपेक्षायामवहतव्रीहीणामवयवानुवृत्तिद्वाराऽन्वयः, प्रोक्षणे च यागार्थमुपात्तव्रीहीणां, तथाऽवघाते व्रीह्याकाङ्क्षायां प्रोक्षितानामेवान्वयः, बाधकं विना शब्दानां सन्निहितविशेषपरत्वनियमात्, "व्यक्तिवचनानां सन्निहितविशेषपरत्वमिति" न्यायात्, अन्यथा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



प्रकरणादिसन्निहितत्यागे तदन्यसन्निधिकल्पने गौरवमिति चेत्। न, तर्हि एकस्य द्वयं यत्र प्रोक्षणं तत्रावघातो न तु प्रोक्षणविशिष्टे, यत्र रूपं तत्र रस इति वत्, तथा च प्रोक्षणस्य शब्देन कालान्तरकार्यजनकत्वाऽबोधनात् कथं तन्निर्व्वाहार्थमतिशयकल्पनम्। "प्रोक्षिता व्रीहयोऽवघाताय कल्पन्त" इति वाक्यशेषात् प्रोक्षणविशिष्टस्यावघाते कारणत्वबोध इति चेत्। अस्तु तावदेवम्, तथापि प्रोक्षिता इत्यत्र भूते क्तानुशासनादतीतप्रोक्षणे व्रीहावघातान्वयः, तथा चावघाते प्रोक्षणध्वंसः कारणं न तु प्रोक्षणमिति चेत्।

मैवम्। प्रोक्षणमवघातजनकं प्रमाणतस्तदर्थमुपादीयमानत्वात् अवघाते व्रीहिवत्। न चासिद्धिः, अप्रोक्षितेऽवघाताभावादवश्यमवघातार्थं प्रोक्षणोपादानात्। न च प्रोक्षणध्वंस एव व्यापारः प्रतियोगिनोऽहेतुत्वापातात्, अन्यथा यागादेरपि तथा स्यात्। फलस्य च नियतसमयोत्पत्तिकत्वमपूर्व्ववत् स्वभावादेव भविष्यति। न च प्रोक्षिता व्रीहयस्तथा, निरन्वयध्वस्तत्वेनोपलक्षणस्याहेतुत्वात्। कुरूणां क्षेत्रमित्यत्र तु कुरुज्ञानस्येतरव्यावृत्तक्षेत्रज्ञव्यवहारजनकत्वं न तु कुरोः, अन्यथा यागोपलक्षितो यज्ञदत्त एव स्वर्गं फलिष्यति किमपूर्व्वेण। न च देवदत्ताद्यशरीरं देवदत्तविशेषगुणजन्यं जन्यत्वे सति तद्भोगसाधनत्वात् तन्निमित्तस्रग्वदिति तत्सिद्धिः, जन्मान्तरीयैरदृष्टजनकत्वाभिमतैर्ज्ञानेच्छाप्रयत्नैः सिद्धसाधनात्। तस्मात् प्रोक्षणादयो भावभूतमतिशयं जनयन्त एव कालान्तरभाविकार्य्यजनकाः प्रमाणतस्तदर्थमुपादीयमानत्वात् रोगचिकित्सावत्, स चातिशयो लाघवात् फलसमा-



पुस्तकालय
गुरुकुल कांगड़ी

Digitized by Arya Samaj Foundation Chennai and eGangotri



नाधिकरण इति व्रीहिनिष्ठ एव, तेन तत्समवहितत्व व्रीहेः साक्षात्सम्बन्धात् पुरुषनिष्ठत्वेन च व्रीहिणो साक्षात्सम्बन्धाभावात् परम्परासम्बन्धे गौरवात् न साक्षात् व्रीहिसमवहितत्वं स्यात् । किञ्च यो यद्गतफलार्थितया क्रियते स बाधकं विना तद्गतमेव तद नुकूलमतिशयं जनयति रोगचिकित्सावत् । अथ प्रोक्षण पुरुषसमवेतातिशयजनकं कालान्तरभाविकार्यजनक त्वे सति विहितत्वात् यागवत्, अन्यथा विधिविरोधा दिति चेन्न । कृषिचिकित्सादिना व्यभिचारात् अप्रयोज कत्वाच्च तेन विनापि विधिसम्भवात् । अस्तु वा सकल व्रीहिनिष्ठ एक एव । न चैकव्रीहिनाशे तन्नाशापत्तिः । कि ञ्चिदाश्रयनाशस्य वृक्षादाविव कार्य्यानाशकत्वादिति ।

(प्रका०) उभयसिद्धत्वमेव स्थापयति *कथमिति* । तटस्थ आह नन्विति । अवघातेन व्रीहेर्नष्टत्वात्तदन्वयः पुरोडाशे न भवतीत्य आह—*अवयवेति* । *नन्विति* । तथाच तद्व्यापारत्वेनातिशय कल्प्य इति भावः ।

तटस्थशङ्कां परिहरति *मैवमिति* । भ्रमेणोपादीयमानेऽवघात जनके व्यभिचारादाह *प्रमाणत इति* । नन्वकारणे कारणकार व्यभिचारः । न च कारणाकारणसाधारणमनुकूलत्वमात्रं साध्यं तदा मध्यवर्त्तिघटितमित्यतिशयसिद्धिरिति वाच्यम् । एवं हि जनकीभूतव्र सजनकत्वेनापि साध्यस्य चरितार्थत्वे प्रतियोगिनाऽहेतुत्वापत्तेरिति व क्ष्यमाणविरोधादिति चेत् । न । वेदमूलकावघातोद्देश्यकोपादानविषय त्वादिति विशेषव्याप्त्यैव साधनादिति । वस्तुतो व्यक्तिवचनान्यायेन वघाते प्रोक्षितव्रीहेरन्वये प्रोक्षणस्य बाधकं विना विशेषणत्वं नोपप क्षणत्वमिति । *प्रतियोगिन इति* । अभावतत्प्रतियोगिनोरेकत्राजनक त्वादित्यर्थः । व्यापारं विनैव प्रोक्षणस्यावघातजनकत्वमस्त्वति शङ्क *न चेति* । *अहेतुत्वादिति* । प्रोक्षणस्य च हेतुत्वं साधितमि भावः । ननु यद्युपलक्षणमतीतमजनकं तदा ततो व्यावृत्तबुद्ध्यादिकं स्यादित्यत आह *कुरूणामिति* । तन्निमित्तेत्युपलक्षणं तद्भोगसाधनेत्या द्रष्टव्यम् । अन्यथा साधनवैकल्प्यापत्तेरित्यवधेयम् । *जन्मान्तरीयै

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



ति*। अतीतोपलक्षणस्यापि जनकत्वाभ्युपगमादिति भावः। एतावता ध्वंसातिरिक्तं व्यापारं सिद्धमुपसंहरति *तस्मादिति*। प्रमाणत इति*। कार्यापेक्षया चिरध्वस्तत्वे सतीति विशेषणम्, तेन साक्षाज्जनके न व्यभिचारः। अतिशयस्य भावत्वं च पक्षधर्मतावलल्भ्यं न तु साध्यतावच्छेदकप्रविष्टम्, तेन विघ्नध्वंसद्वारा समाप्तिसाधने मंगले मिथ्याज्ञानध्वंसद्वारा मुक्तिसाधने तत्त्वज्ञाने वा न व्यभिचारः। नन्वस्त्वतिशयः पुरुषसमवेत एव, तथाच नाश्रयशक्तिसिद्धिरत आह *स चेति*। *संस्कारत्वेनेति*। नचैवमनेकव्रीह्युपादानं न स्यादिति वाच्यम्। होमादिनिर्वाहार्थं तदुपयोगात्। ननु यत्र किञ्चिदवयवनाशात्सकलव्रीहिनाशेन खण्डव्रीहिणामुत्पत्तिस्तत्र का गतिरित्यस्वरसादाह *अस्तु चेति*। *किञ्चिदिति*। यावत्प्रत्यभिज्ञं वस्तुस्थितिरिति स्वमतावष्टंभेनेदम।

(चि०) उच्यते। अतिशयग्राहकमानाल्लाघवसहकृतात् स एक एव सिध्यति न नाना पुरुषनिष्ठश्च। तथाहि प्रोक्षणमपूर्वजनकं दृष्टद्वाराभावे सति कालान्तरभाविफलजनकतया विहितत्वात् यागतदङ्गवत्, कृष्यादौ दृष्टद्वारसम्भवात् न व्यभिचारो न वाऽप्रयोजकत्वम्। यागदानहोमादितदङ्गानामपूर्वजनकत्वे दृष्टद्वाराभावे सति कालान्तरभाविकार्यजनकतया विहितत्वस्यैव प्रयोजकत्वात् अन्यस्याननुगमात्। न च यो यद्गतफलार्थितया क्रियते स बाधकं विना तद्गतमेव तदनुकूलं फलं जनयतीति नियमः, शत्रुवधमुद्दिश्य प्रवर्त्तिते श्येनयागादौ व्यभिचारात् विपक्षे बाधकाभावाच्च। नापि यदुद्देशेन यत् क्रियते न तत्तत्र भाविकार्यानुकूलातिशयजनकमिति व्याप्तिः हविस्त्यागादिभिर्व्यभिचारात्।

ननु प्रोक्षितव्रीहिणाऽदृष्टस्य जनितत्वात् बर्हिष इव पुनरुपयोगान्तरं स्यात्, विनियुक्तविनियोगविरोधात् उपयोगे वा तज्जातीयान्तरमुपादीयेताऽविशेषात्। न।

Digitized by Arya Samaj Foundation Chennai and eGangotri



"व्रीहीनवहन्ती"त्यत्रोक्तन्यायेन प्रोक्षितस्यैव व्रीहेरन्वया-
त्। विधेर्दुर्लङ्घ्यत्वात्। यथा "बर्हिस्तृणोति" "बर्हिषि ह-
विरासादय"तीत्यत्र।

यद्वा विचित्राः संस्काराः केचिदुद्देश्यसहकारिण
एवाग्रिमकार्य्यकारिणः यथाऽभिचारसंस्कारो यं देह-
मुद्दिश्य प्रवृत्तस्तदपेक्ष एव तत्सम्बद्धस्यैव दुःखं जन-
यति, तथा प्रोक्षणसंस्कारा अपि उद्देश्यव्रीहिसहकृता
एवाग्रिमकार्य्यकर्त्तारः। यथा च कारीरीजनितसंस्कारा-
धारपुरुषसंयोगाज्जलमुचामदृष्टसमवधानं तथा प्रोक्षणज-
न्यादृष्टवदात्मसंयोगाद्व्रीहीणामुत्तरक्रियाविशेषाः, कर्म-
कर्त्तृसाधनवैगुण्यात्फलाभावस्तुल्य एव। आगमिकत्वात्
चाण्डालादिस्पर्शस्याहवनीयादिसंस्कारनाशकत्वश्रुतेर्व्य-
धिकरणस्याप्यपूर्वनाशकत्वम्। धर्मनाशे कर्म्मनाशा-
पारगमनवत् निषिद्धकीर्त्तनवच्च। किञ्च प्रोक्षणज-
न्यातिशयो व्रीहिनिष्ठो न नाना, आत्मवृत्तेरेकस्मा-
दप्युक्तन्यायेन कार्य्योपपत्तेः। नाप्येकः, एकाद्विनाश्र-
यनाशानां प्रत्येकमननुगमेन कार्य्यनाशे आश्रयमा-
त्रनाशस्य जनकत्वादेव व्रीहिनाशेन तन्नाशादपर-
प्रोक्षितव्रीहीणामनन्वयापत्तेः। अथ "व्रीहीन् प्रो-
क्षती"तीप्सितद्वितीयाश्रुतेः क्रियाजन्येष्टफलभागित्वं
व्रीहेरेवावगम्यते, न चापूर्वस्य व्रीहिवृत्तित्वम्, साक्षात्स-
म्बन्धस्यैवौत्सर्गिकत्वादिति चेन्न। धात्वार्थतावच्छेदकसं-
योगेन व्रीहिकर्मतोपपत्तेः। न च संयोगावच्छिन्न एव व्याप
रविशेषः प्रोक्षणार्थः, तथा च कथं प्रोक्षणसाध्यतयाऽन्व
य इति वाच्यम्। संयोगस्योपलक्षणत्वेनापदार्थत्वात्
अन्यथा ग्रामं गच्छतीत्यादौ का गतिः, का वा "सक्तून्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



प्रोक्षतीं"त्यादौ, तत्राधेयशक्त्यभावात् । किञ्च घटं साक्षात्करोतीत्यादौ क्रियाजन्यसंस्कारादीनां घटवृत्तित्वात् संस्कारस्य स्वरूपसम्बन्धेन घटवृत्तित्वं, वह्निमनुमिनोमीत्यादिवत्, प्रयोगसाधुरेव वा द्वितीयेति यदि, तदा प्रकृतेऽपि तथाऽस्तु । अथ प्रतिमादौ प्रतिष्ठाजन्यं न यजमानादृष्टं पूज्यत्वप्रयोजकं, भोगादिना तन्नाशेऽपि पूज्यत्वात् तत्सत्त्वेऽपि चाण्डालादिस्पर्शेनापूज्यत्वात् अन्यधर्मं प्रत्यन्यधर्मस्यानुपयोगाच्च । न च प्रतिष्ठाध्वंसस्तथा, तत एव उपजीव्यप्रतिष्ठाप्रयोजकत्वभङ्गापत्तेः । तस्मात् प्रतिष्ठाजन्याऽस्पृश्यस्पर्शादिनाद्या प्रतिमादिनिष्ठा शक्तिरभ्युपेयेति चेत्, प्रतिष्ठाविधिना प्रतिमादौ देवतासन्निधिरहङ्कारममकाररूपः क्रियते, स्वसादृश्यदर्शिनश्चित्रादाविव ज्ञानस्य नाशेऽपि संस्कारसत्त्वात् । अस्पृश्यस्पर्शादिना तु तन्नाशः । अचेतनदेवतापक्षे च यथार्थप्रतिष्ठितप्रत्यभिज्ञानस्यास्पृश्यस्पर्शादिविरहसहकृतस्य तथात्वं "प्रतिष्ठितं पूजयेदिति" विधिबलात्तत्प्रतिसन्धानस्यावश्यकत्वादिति प्राञ्चः ।

नव्यास्तु प्रतिष्ठाविधिनैव तवाधेयशक्तिवदपूर्वान्तरं जन्यते तददृष्टवदात्मसंयोगाश्रयस्य पूज्यत्वम् अस्पृश्यस्पर्शेन तन्नाशे चापूज्यत्वमित्याहुः ।

(प्रका०) यद्यप्यतिशयस्यैकत्वेनैव पुरुषनिष्ठत्वं सिध्यति । अन्यथा लाघवेनाश्रयनाशमात्रस्यैव कार्यनाशप्रयोजकत्वेनावयवनाशात्तन्नाशादुत्तरावयवान्तराणामुपयोगो न स्यात्तथापि प्रकारान्तरमाह *तथाहीति* । *दृष्टद्वारेति* । अत्र धर्मजनकत्वं साध्यम्, निषिद्धकर्मणि व्यभिचारवारणाय विहितत्वादित्युक्तम् । प्रायश्चित्ते व्यभिचारवारणाय कालान्तरेत्यादि । ननु दृष्टद्वाराभावे सतीत्यस्यादृष्टान्यद्वाराभावे सतीत्यर्थः, तथा चासिद्धिः, परमते शक्तेरेव द्वारत्वात् । न च प्रत्यक्षद्वाराभावे सतीति तदर्थः । औषधपानादौ व्यभिचारात् । न च तत्र विहितत्वाभावादेव

CC-0. Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



न व्यभिचार इति वाच्यम् । आयुर्वेदेन तस्यापि विहितत्वादिति चेत् । न । शब्दतदुपजीविप्रमाणमात्रप्रयोज्यधीविषयद्वारेतरद्वारस्य दृष्टद्वारपदेन विवक्षितत्वात् । न चौषधादौ व्यभिचारः । तदीयधातुसाम्यादिरूपातीन्द्रियद्वारविशेषे शब्दानुपजीविप्रमाणासम्भवादिति वाच्यम् । अन्वयव्यतिरेकादिमूलकप्रमाणस्यापि कदाचित्तत्र प्रसरादिति भावः । *कृष्यादाविति* । न च विहितत्वाभावादेव न व्यभिचार इति वाच्यम् । प्रत्येकवर्णोपायविभागविधिना वैश्यस्य कृषिविधिनादिति भावः । *शत्रुवधमिति* । एतच्च परमते । अस्मन्मते श्येनापूर्वस्य शत्रुनिष्ठत्वमेव फलोपपादकमपूर्वं फलाश्रये कल्प्यत इति वक्ष्यमाणयुक्त्या तथा व्यवस्थितेः । अत एव गयाश्राद्धापूर्वस्य पितृनिष्ठत्वम्, पञ्चमटीकायां तथा विभावनाच्च । स्वमतेन दोषमाह *विपक्षेति* । न च फलसामानाधिकरण्ये लाघवमेव विपक्षबाधकमिति वाच्यम् । नानात्वगौरवेन तल्लाघवानादरादिति भावः । *हविस्त्यागेति* । बहून्युद्देशेन हविस्त्यज्यते, न च तत्रातिशयो जन्यते इत्यर्थः । न च बहौ तदनुकूलसंयोगो जन्यत एवेति वाच्यम् । एवं हि प्रोक्षणेनापि व्रीहौ जलसंयोगजननात् सिद्धसाधनादिति भावः । पुरुषसमवेतातिशयस्य परम्परासम्बन्धेन स्वरूपसम्बन्धेन साक्षादेव वा व्रीहिनिष्ठत्वस्याप्युपपत्तेर्नातिरिक्तपदार्थकल्पनमिति तत्त्वम् । अथोत्पन्नतत्त्वज्ञानपुरुषकृतप्रोक्षणेन दोषाभावाददृष्टानुत्पादे शक्तिसिद्धिरिति चेन्न । तत्र फलानुत्पादात् । लोकसङ्ग्रहार्थं तदाचारणादिति भावः । *बर्हिष इति* । बर्हिर्यागस्येत्यर्थः । यथा तस्य जनितादृष्टस्य न पुनरुपभोगान्तरं तथा व्रीहेरप्यदृष्टजननोपगमे तन्न स्यादित्यर्थः । यद्वा व्यतिरेकदृष्टान्तोऽयम् । यथा बर्हिस्तृणाति इत्यादिविधिबलात्तस्य पुनरुपयोगस्तथाऽत्र न स्यादित्यर्थः । *उक्तन्यायेनेति* । व्यक्तिवचनन्यायेनावघाते प्रोक्षितस्यैवान्वये सर्वमिदमविरुद्धमिति भावः । ननु पुरुषे पातित्यादिदोषेणादृष्टमुत्पद्यते इति अगत्या व्रीहिनिष्ठातिशयः स्वीकार्य इत्यत आह *कर्तृकर्मेति* । एवं हि व्रीहिनिष्ठोपि स न स्यादित्यर्थः । पुरुषनिष्ठत्वे साधकमुक्त्वा व्रीहिनिष्ठत्वे बाधकमाह *किञ्चेति* । *कार्येति* भावकार्येत्यर्थः । *स्वाश्रयेति* । स्वसमवायिकारणेत्यर्थः । एवञ्च किञ्चिदाश्रयनाशे वृक्षादिनाशे प्रत्यभिज्ञानस्य तज्जातीयत्वं विषय इति भावः । *संयोगस्येति* । ननु फलस्योपलक्षणत्वे तत्तद्व्यापारमात्रस्यैव धात्वर्थत्वे त्यजिगम्योः पर्यायतापत्तिः । अवच्छेदकीभूतयोः फलयोर्विभागसंयोगयोर्धात्वर्थप्रवेशे स्पन्दमात्रस्यैवोभयधात्वर्थत्वात्, कर्ममात्रस्यैवोभयजन

Digitized by Arya Samaj Foundation Chennai and eGangotri



कत्वेन पतनादिवदवान्तरजातिमादायाप्यर्थभेदस्य दुरुपपादत्वादिति । अत्र वदन्ति । व्यापारे उपलक्षणीभूतस्यापि फलस्य प्रतीतौ विशेषणत्वमेव । इष्टसाधनताविधिपक्षे क्रियोपलक्षणस्यापि इष्टस्य ज्ञानविशेषणवत् । तदत्र फलविशिष्टो व्यापारो यदि वाच्यस्तदा शब्दात्फलविशिष्टव्यापारधीरपरथा फलोपलक्षितव्यापारधीरिति उभयथापि फलांशेपि शक्तिं क प्रतीत्य विशेषो येन पर्यायता । विशेषणत्वे प्रकृते कर्मत्वानुपपत्तिरिति । अस्तु वा प्रोक्षणजन्यापूर्वस्य साक्षात्स्वरूपसम्बन्धेनैव व्रीहिकर्मत्वं, साक्षाद्व्रीजन्यसंस्कारविषयतया घटादीनामिव, एवञ्च व्याप्यसंस्कार्यकर्मणो भेदोप्युपपद्यत इत्यभिप्रेत्याह *किञ्चेति* । *वह्निमिति* । न ह्यत्र कर्मणि द्वितीया, अनुमितौ वह्नेरकारकत्वात्, कर्मणश्च कारकविशेषत्वात् । किन्तु साधु विभक्तिस्तथात्रापीत्यर्थः । *न चेति । प्रतिष्ठितं पूजयेदिति निष्ठास्वरसादिति भावः । तत एव-तत्सत्वेपि चाण्डालादिस्पर्शेनापूज्यत्वादेवेत्यर्थः । देवताचैतन्यपक्षमालंब्य परिहरति *प्रतिष्ठाविधिनेति* । *अहङ्कारेति* । अहमियं प्रतिमा मदं शरीरमित्यादिज्ञानरूप इत्यर्थः । तन्विदं ज्ञानं विषयबाधाक्रान्तं स्यात्, नच तत्सम्भवति, विशेषदर्शनादित्यत आह *स्वसादृश्येति* । तथाच विशेषदर्शने सत्यप्याहार्यभ्रमोऽयमित्यर्थः ।

( चि० ) वयन्तु ब्रूमः । प्रतिष्ठितं पूजयेदिति विधिवाक्येन प्रतिष्ठायाः कारणत्वं न बोध्यते, किन्तु भूतार्थकानुशासनादतीतप्रतिष्ठे पूज्यत्वं बोध्यते, तथा च प्रतिष्ठाध्वंसः प्रतिष्ठाकालीनयावदस्पृश्यस्पर्शादिप्रतियोगिकानादिकालसंसर्गाभावसहितः पूज्यत्वप्रयोजकः स च प्रागभावोऽत्यन्ताभावश्च क्वचित् । कामिनीचरणाभिघातदोहदादिभिरशोकपुष्पोत्कर्षदर्शनादपि नाधेयशक्तिसिद्धिः, समयविशेषावच्छिन्नचरणदोहदादिसंयोगध्वंसस्यैव कारणत्वात् चरणाभिघाताद्याकृष्टभागान्तरजनितवृक्षादेव वा तदुपपत्तेः, कालान्तरे पुष्पाद्युत्कर्षात् वृक्षावयवोपचयावश्यम्भावेन वृक्षभेदावश्यकत्वात् । नापि ताम्रकांस्यादावस्तु भस्मसंयोगादिजन्यशुद्धिरूपा आधेयशक्तिः, तत्संयोगध्वंसस्य संयोगसमानकालीनास्पृ-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



श्यस्पर्शादिप्रतियोगिकयावदनादिसंसर्गाभावसहितस्य शुद्धिपदार्थत्वात् ।

भस्मादिसंयोगजनितः कांस्याद्युपभोक्तृनिष्ठः सं स्कार एव शुद्धिरित्यन्ये ।

( प्रका० ) ननु देवतायां सर्वज्ञत्वाभावेन व्यासङ्गदशायां व्यवहि तनानादेशे प्रतिष्ठायां कथमहङ्कारममकारौ संस्कारौ संस्कारनाशे व कथं पूज्यत्वं कथं वा ज्ञानसंस्कारयोरननुगतयोः पूजाप्रयोजकत्वमि प्रथमकल्पानुपपत्तिः । यत्र च व्यासङ्गवत्तन्न प्रत्यभिज्ञानं तत्र प्रतिष्ठि तत्प्रतिमापूजापि निष्फला स्यात् । प्रतिष्ठितं पूजयेदित्यादिना च प्रति ष्ठायास्तद्ध्वंसस्य वा हेतुत्वं बोध्यते न तत्प्रत्यभिज्ञानस्यापीति द्वितीय कल्पानुपपत्तिः । दृष्टेनैवोपपत्तावदृष्टकल्पनानुपपत्तिरिति तृतीयकल्प नुपपत्तिरित्यस्वरसादाह-*वयं त्विति* । ननु यत्र प्रतिमायां प्रतिष्ठ जाता दैवात्किञ्चिदवयवनाशादन्या प्रतिमा जाता तत्र प्रतिष्ठारू प्रतियोगिनोऽवृत्तेस्तद्ध्वंसस्यापि न वृत्तिः, प्रतियोग्यधिकर एव ध्वंसस्य वृत्तेः, तथाच तत्पूजा निष्फला स्यात् । न चेष्टा त्तिः, आचारविरोधात् । अन्यथा एतच्छङ्कया कस्यापि प्रवृत्ति स्यात् । न च तत्प्रतिमावृत्तित्वेन ध्वंसस्य न प्रयोजकत्वं किन्तु स्वरूपेण तच्च तत्रास्त्येवेति वाच्यम् । एवं हि तद्ध्वंसस्य प्रतिमान्तर पूज्यत्वप्रयोजकतांपि स्यादविशेषादिति चेत् ।

अत्राहुः । इयं प्रतिष्ठितेति बुद्धेः खण्डप्रतिमायामपि प्रमात्वव्यव हारात्तद्ध्वंसस्य तत्रापि वृत्तिरेव । प्रतिमान्तरे च तदभावात्तदभाव अत एव प्रोक्षितव्रीहीणां यत्किञ्चिदवयवनाशाच्छेषेऽपि खण्डव्रीहीण मुपयोगः । संस्कृता एते व्रीहय इति प्रतीत्या तत्रापि पुरुषसमवेत स्कारसम्बन्धसिद्धेः । अन्यथा सर्वमिदं तत्रापि तुल्यमिति । *प्रति ष्ठाकालीनेति* । अत्र स्वसमानाधिकरणेत्यपि विशेषणन्तेन तत्प्रतिष्ठ कालीनप्रतिमान्तरास्पृश्यस्पर्शप्रागभावाभावेन यावदर्थाभावान्नापूज्यत पत्तिः । ननु प्रतिष्ठोत्तरमपि पूज्यता न स्यात्प्रतिष्ठापूर्वकालीनास्पृश्यस्प र्शानां जाततया तत्प्रागभावाभावादित्यत आह प्रतिष्ठाकालीनेत्यभि विशेषणम् । नन्वेकस्पर्शानन्तरमग्रिमस्पर्शप्रागभावसत्त्वात्पूज्यता स्यात् त्यत आह-*यावदिति* । आदिपदमवयवविभागादिपरम् । स्फुटित तिमाया अप्यपूज्यत्वात् ।

नन्वनादिसंसर्गपदमत्रात्किञ्चित्करमिति चेत् । अत्राहुः । तावद

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



वसहितप्रतिष्ठाध्वंसस्य हेतुत्वे तावदभावा अपि हेतव इति ध्रुवम् । तथा चानादित्वानन्तर्भावे साद्यभावानामपि जनकत्वमिति बहूनां जनकत्वे गौरवमित्यल्पजनकत्वे लाघवेन सादिव्यावर्त्तनार्थमनादिपदोपादानम् । एवमन्योन्याभावव्यावर्त्तनार्थं संसर्गपदम् ।

अन्ये तु प्रतिष्ठाकालीनत्वेन प्रतिष्ठोत्तरकालीनत्वं विवक्षितम्, तदपि स्पर्शादिविशेषणं न त्वभावविशेषणम् । एवं प्रतिमायामस्पृश्यस्पर्शे जातेपि तद्ध्वंसान्योन्याभावावादाय पूज्यतापत्तिः । प्रतिष्ठोत्तरकालीनानां यावदस्पृश्यस्पर्शानामभावस्य तत्र सत्त्वात्, अनादिपदसंसर्गपदोपादाने तु नोक्तदोषः, तन्निष्ठास्पृश्यस्पर्शव्यक्तेरेवानादिसंसर्गाभावस्य तत्रासत्त्वात्, अत्यन्ताभावस्य प्रतियोग्यसमानाधिकरणत्वात्, प्रागभावस्य प्रतियोगितद्ध्वंसासमानकालीनत्वादित्याहुः । *समयविशेष इति* । स च विशेषः कार्य्यकोट्यो यदनन्तरं पुष्पमित्यर्थः । नन्वेवं चरणसंयोगस्य कारणीभूताभावप्रतियोगित्वेन प्रतिबन्धकत्वापत्तिः । न चेष्टापत्तिः, चिरसमयव्यापिसंयोगे सति पुष्पानुत्पत्त्यापत्तेरित्यपरितोषादाह—*चरणेति* । *तत्संयोगेति* । अत एवाम्लादिसंयोगो जलक्षालनेनापनीयत इति भावः ।

*संस्कार एवेति* । धर्मविशेष इत्यर्थः । अन्ये त्वित्यस्वरसोद्भावनम् । तद्बीजं तु दृष्टद्वारेणैवोपपत्तावदृष्टकल्पनानवकाश इति ।

( चि० ) अभिमन्त्रितपयःपल्लवादावपि समयविशेषावच्छिन्नाभिमन्त्रणध्वंस एव व्यथाद्यपनायकः तत्तन्मन्त्रदेवतासन्निधिरेव वा । कलमबीजादीनामापरमाण्वन्तभङ्गे तत्र चावान्तरजात्यभावे नियतकलमजातीयादिसिद्धिरपि परमाणुपाकजविशेषादेव, कार्य्यवृत्तिरूपादिसजातीयस्य पूर्वरूपादिविजातीयस्य परमाणौ पाकजरूपादेरुभयसिद्धत्वात् । यथाहि कलमबीजं यवादेर्जात्या व्यावर्त्यते तथा तत्परमाणवोऽपि पाकजैरेव । एवं माघकर्षणजनितात् परमाणुपाकपरम्पराविशेषादेव हैमन्तिकशस्योत्पत्तिः । एतेन लाक्षारसावसेकादयो व्याख्याताः । निमित्तविशेषजनितपाकजात्तत्फलविशेषः यथा हारितमांसं हरिद्रानलसाधितमुपयोगात् सद्यो



CC-0. Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



व्यापादयति नान्यथा साधितमित्यादि। यत्र च तोय-तेजोवायुषु न पाकजो विशेषस्तत्रोद्भवानुद्भवकठिनत्वा-दयो विशेषास्तत्तदुपनायकादृष्टविशेषादेव। तुलादौ चा-धिवासपूर्वकतुलारोहणसामग्री तुल्यस्य सत्यासत्यप्रति-ज्ञत्वसाहिता प्राचीनधर्म्माधर्म्मफले तज्जयभङ्गौ जन-यति। यद्वा अहं निष्पापः पापवान् वेति तुलाधिरूढ़ाभि-शस्तज्ञानविशेषसहिता सा तथा, तदाहुः--

तांस्तु देवाः प्रपश्यन्ति स्वश्चैवान्तरपुरुषः। इति।

अथ वा प्रतिज्ञाशुद्ध्यशुद्धी अपेक्ष्य तया धर्माधर्मौ जन्येते ताभ्याञ्च जयपराजयौ, सत्यासत्यप्रतिज्ञाभि-शस्ततुलारोहणस्येष्टानिष्टफलत्वेनार्थतो विधिनिषेधात् "अभिशस्तः सत्यप्रतिज्ञो विजयकामस्तुलामारोहेदसत्य-प्रतिज्ञो न तुलामारोहेदि"ति श्रुतेरुन्नयनात्। यद्वा तया देवतासन्निधिः क्रियते ताश्च कर्म्मानुरूपं लिङ्गमभि-व्यञ्जयन्ति।

(प्रका०)*समयविशेषेति*। न चैवं यागेऽप्यपूर्वे न कल्प्यामिति वाच्य-म्। तत्र विधिना कार्यकारणभावबोधनात्, अत्र तु न तथेति भावः। पा-कजविशेषे मानमाह *कार्येति*। ननु बीजापूरादौ लाक्षाद्यवसेका-त्कुसुमारुण्यं दृश्यते तत्र लाक्षारसस्य गलितत्वान्न कालान्तरीयकुसु-मारुणिमहेतुत्वं न वा स्वरूपात्तस्मात्तादृगुत्कर्षस्तथा च तत्प्रयोजकत्वे-नाधेयशक्तिः स्वीकार्येत्यत आह *एतेनेति*। *इत्यादीति*। "दश-रात्रोषितं कांस्ये सर्पिश्चापि विषायत" इत्यादि पदग्राह्यम्। कठिनत्व-तु तोये प्रतिबद्धवस्त्वमित्यर्थः। तुलादौ तुलाविधिजन्यामाधेयशक्ति-जयादिप्रयोजिकामाशंक्य निराकरोति *तुलादाविति*। तुल्यस्य-तुलनीयस्य। ननु तुलादिसामग्र्याः क्षणिकतया कालान्तरभाविजया-दिजनकत्वानुपपत्तिः पापिनोऽपि सभाक्षोभादिना पापवत्त्वज्ञानाभावे निष्पापत्वभ्रमे वा भङ्गानुपपत्तिश्चेत्यरुचेराह *अथवेति*। तया-तु-लाधिरोहणसमग्र्या। ननु दृष्टद्वारैवोपपत्तावदृष्टकल्पनानुपपत्तिः लौकिककियाया अपीष्टानिष्टफलकत्वेन तुलाधिरोहणेन श्रुत्युन्नयनासं-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



भवश्चेत्यपरितोषादाह । *यद्धेति* । अयं पापी निष्पापो वा तुलारूढ इति ज्ञानमेव तज्जन्यसंस्कारो वाऽत्र सन्निधिरित्यर्थः । *ताश्चेति* । देवता इत्यर्थः । *लिङ्गमिति* । नमनोन्नमनादिकमित्यर्थः ॥

( चि० ) कस्तर्हि शक्तिपदस्यार्थः ? कारणत्वम् । तच्च स्वस्वव्याप्येतरसकलसंपत्तौ कार्य्याभावव्यापकाभावप्रतियोगित्वम् ।

(प्रका०) *स्वस्वेति* । अत्र यत्र कार्यस्य घटादेरभावस्तत्र दण्डादेरभाव इति दैशिकी व्यापकता, कालिक्यां तु सामग्रीकाले व्यभिचारात्, एवञ्च दण्डसद्भावेपि चक्राद्यभावेन कार्याभावे व्यभिचार इति तद्वारणाय कार्याभावं विशिनष्टि संपत्ताविति । स्वेतरसकलसंपत्ताविति कृतेऽप्रसिद्धिः, दण्डेतरसकलमध्यपतितानां चक्रभ्रम्यादीनां संपत्तौ घटाभावाप्रसिद्धेरित्यत उक्तं स्वव्याप्येति । चक्रभ्रम्यादीनां च दण्डसमवधाननियतत्वेन दण्डव्याप्यतया तदितरसंपत्तिकालीनकार्याभावप्रसिद्धेर्नोक्तदोषः । एतेन यत्र स्वं स्वव्याप्यमप्यस्ति तत्रापि तत्सम्पत्तिरस्तीति तत्र कार्याभावाप्रसिद्धिरेवेत्यपास्तम्, क्वचित्कतादृशाभावप्रसिद्ध्यैव व्यापकत्वनिर्वाहात् । ननु तदितरसकलपदं तदितरकारणपरं तदितरमात्रपरं वा ? आद्ये आत्माश्रयः । अन्त्येऽसम्भवः । घटाद्युत्पत्तौ वेमादिसमवधानाभावादिति चेत् । न । कार्यप्रागभावव्याप्यप्रागभावप्रतियोगिसकलस्य विवक्षितत्वात् । कार्यनियतपूर्ववर्त्तिसकलस्य विवक्षितत्वाद्वा । कार्यत्वं च प्रागभावप्रतियोगित्वम् । न चान्यथासिद्धे दण्डरूपादावतिव्याप्तिः, तत्र स्वस्वव्याप्येतरदण्डादिसकलसंपत्तौ कार्याभावाभावेनोक्तरूपाभावात् । वस्तुतो नान्यथासिद्धत्वमत्रापि देयम्, अतो नोक्तदोषः । अन्यथा कुलालपित्रादौ प्रसङ्गतादवस्थ्यात् । चक्रभ्रम्यादीनां चक्रव्याप्यत्ववत्कुलालादीनां तद्व्याप्यत्वात् । यत्त्विदं कारणसामान्यलक्षणं तथा च कुलालपितृत्वेनान्यथासिद्धत्वेपि कुलालत्वेन तस्यापि घटजनकतयाऽतिव्याप्त्यभावः । न च कुलालपितृत्वेन जनकतापत्तिः । यस्य कार्याभावव्यापकाभावप्रतियोगित्वं तस्य हेतुत्वमित्येव लक्षणार्थत्वादिति । तन्न । दण्डचक्रादिजनके तथाप्यतिव्याप्त्यपरिहारात् । न हि तज्जनके दण्डावयवादौ दण्डत्वादिसम्भवः । कुलालमात्रादौ प्रसङ्गतादवस्थ्याच्च । ननु स्वस्वव्याप्येतरसकलसंपत्तौ स्वसंपत्तौ च स्वव्याप्याभावप्रयुक्तकार्याभावव्यापकत्वाभावात्स्वाभावस्यायुक्तमिदमिति चेन्न । तत्सम्पत्तिकालीनकार्याभावव्यापकाभावप्रतियोगिस्वस्व-

CC-0. Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



व्याप्यान्यतरकत्वस्य विवक्षितत्वात् । यत्तु स्वासमवधानकालीनत्वमपि कार्याभावविशेषणम् अतो नोक्तदोष इति । तन्न । आत्मादिहेतावव्याप्तेः । नन्वेवमप्यात्मादिहेतावव्याप्तिरेव कार्याभाववति देशे काले वा तदभावाभावादिति चेन्न । तत्समवधानसत्त्वेपि तदभावस्य केवलान्वयित्वेन तत्रापि तत्सत्त्वात् । तद्व्याप्यस्याभावप्रतियोगित्वेनान्यतरगर्भलक्षणस्य तत्रापि सत्त्वाच्च । न चैवमाकाशस्य घटादिहेतुतापत्तिः । अनन्यथासिद्धत्वेनैव वारणात् । तद्व्याप्येतरसकलसंपत्तौ घटाभावाप्रसिद्धेश्च । आत्मादौ च स्वव्याप्यहेत्वन्तरप्रत्यासत्त्यादिव्यतिरेकप्रयुक्तकार्याभावप्रसिद्धिसम्भवात् । अत एवात्मनः कपालगोचरप्रत्यक्षादिसम्बन्धेन घटकारणत्वम् । यत्तु यदवच्छिन्नाभावव्यापकाभावप्रतियोगितावच्छेदकावच्छिन्नस्य हेतुत्वरूपत्वम् । अस्ति चात्मत्वावच्छिन्नाभावस्य ज्ञानाभावव्यापकत्वेऽपि गुणत्वावच्छिन्नाभावं प्रति समवायित्वावच्छिन्नाभावस्य व्यापकत्वम् । अस्ति च दिक्कालयोस्तत्त्वावच्छिन्नाभावस्याव्यापकत्वेऽप्याधाराधेयभाववत्त्वेन तदभावस्यापि कार्याभावव्यापकत्वमिति । तन्न । एकघटसत्त्वे घटत्वावच्छिन्नाभावाभाववदात्मरूपसमवायिसत्त्वे समवायित्वावच्छिन्नाभावासंभवात् । यदि च केवलान्वयितया तदभावस्तदा आत्मत्वावच्छिन्नाभावोऽपि सुलभ एव ।

केचित्तु जन्यगुणमात्रं प्रति समवायितया कारणत्वेन तत्रापि तज्जातीयतयोक्तलक्षणसत्त्वादित्याहुः । तदपि चिन्त्यम् । उक्तरीत्या समवायित्वस्य कार्याभावव्यापकाभावप्रतियोगितावच्छेदकतया समवायित्वेन हेतुत्वमित्येव न स्यात् । अन्यथा प्रमेयत्वेनैव हेतुत्वापत्तौ तज्जातीयतया गुणादावतिव्याप्त्यापत्तेः । अत एव प्रमेयत्वादौ सामान्यप्रत्यासत्तिकरणे अव्याप्तिः, व्यतिरेकाप्रसिद्धेरित्यपास्तम् । तत्रापि स्वव्याप्यव्यतिरेकप्रयुक्तकार्याभावप्रसिद्धिसम्भवेनान्यतरत्वगर्भलक्षणसत्त्वात् । अन्यथा स्वव्याप्याप्रसिद्धैव लक्षणासिद्धिः स्यात् । यत्तु जन्यसाक्षात्कारं प्रति प्रत्यासत्तितया कारणत्वे इन्द्रियप्रत्यासत्तिर्द्रव्याप्येतरसकलसमवधाने इन्द्रियप्रत्यासत्तिव्यतिरेके सति सकलसाक्षात्कारासत्त्वात्तज्जातीयत्वेन तत्सत्त्वाच्चाव्याप्तिः, अत एवेश्वरज्ञानादौ नाव्याप्तिरिति । तन्न । पूर्वोक्तरीत्या प्रत्यासत्तित्वस्य कार्याभावव्यापकाभावप्रतियोगितानवच्छेदकतया तेन रूपेण हेतुत्वप्राप्तेश्च । न हि येन केनापि रूपेण तज्जातीयत्वं वाच्यम् । अतिप्रसङ्गात् । किन्तु अन्वयव्यतिरेकप्रतियोगितावच्छेदकेनैव । न च प्रत्यासत्तित्वं तथा, तदवच्छिन्नस्य व्यतिरेकाप्रसिद्धेरिति । यद्यपि प्रागभावेऽव्याप्तिः, तदितरसकलसंपत्तौ

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



कार्याभावाप्रसिद्धेः उत्पन्नस्य पुनरुत्पादेपि कार्यस्य सत्त्वात् । तथाप्युत्पत्तिविशिष्टकार्याभावो विवक्षितः, स च तत्राप्यस्ति । न चैवं गन्धं प्रति रसादिप्रागभावानामपि हेतुत्वापत्तिरिति वाच्यम् । अनन्यथासिद्धत्वेनैव वारणात् । न च सव्येतरविषाणयोः परस्परं कार्यकारणभावापत्तिः, तदितरसकलसंपत्तिकालस्य तत्सामग्रीकालत्वपर्यवसाने तत्कालीनपरस्पराभावव्यापकत्वात्परस्पराभावस्येति वाच्यम् । अग्रिमक्षण इति विशेषणात् । तत्सम्पत्त्यग्रिमक्षणे च कार्याभावाभावात् । यत्तु कार्यपदं तदीयकार्यपरमतो नोक्तप्रसङ्ग इति । तन्न । आत्माश्रयात्, संपत्तावित्यन्तवैयर्थ्यापत्तेश्च । न च दण्डावयवे घटाभावाद्व्यभिचारेणाव्यापकत्वमिति वाच्यम् । तत्र तत्रेतरसम्पत्त्यवच्छिन्नकार्याभावादित्येके । कार्याभाववति यत्संसर्गावच्छिन्नयदभावस्तत्संसर्गावच्छिन्नस्य हेतुत्वरूपत्वम् । अस्ति च घटाभावव्यापको यो दण्डसंसर्गाभावः स दण्डावयवेपीत्यन्ये । केचित्तु कार्याभावव्यापकाभावप्रतियोगित्वमित्यत्र बहुव्रीहिसमासेन कार्याभावव्याप्याभावप्रतियोगित्वमर्थः । कारणस्य कार्यव्यापकत्वेन तदभावस्य कार्याभावव्याप्यत्वौचित्यात् । एवञ्च चन्द्रोदयसमुद्रवृद्ध्योः परस्परं कार्यकारणभावापत्तिरतस्तद्वारणाय सम्पत्तावित्यन्तम् । न चैवमपि दोषतादवस्थ्यम् । अग्रिमक्षण इत्यस्य विवक्षितत्वात् । न हि तत्र तादृशाग्रिमक्षणे समुद्रवृद्धिव्यतिरेकश्चन्द्रोदयव्यतिरेकव्याप्तः । आत्मादिहेतौ प्रमेयत्वप्रत्यासत्यादौ च तज्जातीयत्वमादायैव लक्षणगमनम्, अन्यच्च पूर्ववदूह्यमित्याहुः ॥

(चि०) अथ वा यत्र कार्याभावव्याप्यता इतराभावावच्छिन्ना तत्कारणम् । बीजेऽङ्कुराभावव्याप्यता न बीजत्वेनावच्छिद्यते इतरसमवधाने सति बीजादङ्कुरसम्भवात्, किन्त्वितराभावेनावच्छिद्यते इतराभावे बीजस्याङ्कुराभावनियमात् । शिलाशकले त्वङ्कुराभावव्याप्यता शिलात्वेनैवावच्छिद्यते ।

(प्रका०) नन्विदं कारणत्वमतीन्द्रियघटितसकलसंपत्तिगर्भतया दुर्ग्रहं प्रत्यक्षस्याप्रवृत्त्या साध्याप्रसिद्ध्या मानान्तरस्याप्यप्रवृत्तेः, किञ्च अनन्यथासिद्धत्वकार्यनियतपूर्ववर्तित्वादेः प्रवेशे आवश्यके तावन्मात्रमेव लक्षणमस्तु लाघवात् अधिकांशस्य गुरुत्वात्, अत एवाग्रेपि तथैव लक्षणमित्यरुचेराह *अथवेति* । यत्र कार्याभावव्याप्यता इतरा-

Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



भावसहकारावच्छिन्ना तदवच्छिन्नं कारणं तदवच्छिन्नत्वं कारणत्वमि
ति यावत् । तेन यत्र दण्डाभावत्वं तत्र घटाभाव इति दण्डाभावत्वनि
ष्ठव्याप्तौ दण्डाभावस्यैवावच्छेदकतयाऽजनके दण्डाभावत्वादौ नाति
व्याप्तिः । न वा बीजत्वस्य कार्याभावव्याप्यस्य जनकत्वासम्भवादसम्भ
वः, तत्र दण्डाभावसहकृतत्वस्यानवच्छेदकत्वात्, बीजत्वाद्यवच्छिन्नस्य
जनकत्वाच्च । एवञ्चाग्रे बीजबीजत्वपदे बीजत्वबीजत्वत्वपरे । इतराभा
वेन-इतराभावसहकृतत्वेन । शिलायां-शिलात्वे, शिलात्वेन-शिला
त्वत्वेन ।

ननु कार्याभावस्तज्जन्यकार्याभावो वा तदभावमात्रं वा ? आद्ये आ
त्माश्रयः । अन्त्ये शिलायामप्यङ्कुरस्य संयोगवृत्त्या सत्त्वेन तत्रापीतरा
भावसहकृतशिलात्वस्य कार्याभावव्याप्यत्वात् । किञ्च घटकारणज्ञाना
दौ कार्याभावव्याप्यत्वं ज्ञानत्वत्वादिनैवावच्छिद्यते । दण्डाभावसादि
त्यस्य तत्र नीलधूम इव व्यर्थत्वादिति ।

अत्र वदन्ति । उत्पत्तिकालीनसम्बन्धावच्छिन्नकार्याभावव्याप्यत्व
विवक्षितं संयोगसम्बन्धस्योत्पत्त्यनन्तरकालीनतया तदवच्छिन्नाभाव
मादाय न शिलादौ प्रसङ्गः । उत्पत्तिकालीनसम्बन्धो द्वयमेव कारणतु
समवायश्च-तदवच्छिन्नाङ्कुराभावश्चेतराभावावच्छिन्ने स्वसमवायिनि
बीजादौ च । द्वयं च कारणमेव । न चैवं करणतागर्भत्वेनात्माश्रयः । स
म्बन्धत्वेन तज्ज्ञानादिति ।

*अत्रेदं चिन्त्यम्* । विषयविषयिभावसम्बन्धस्याप्युत्पत्तिकाली
नतया तदवच्छिन्नकार्याभावव्याप्यत्वस्येतराभावावच्छेद्यतया वह्न्यादे
रनुमितिजनकत्वापत्तिः । चरमकारणे कार्यत्वाभावादव्याप्तिश्च ।

वस्तुतस्तु बीजादङ्कुर इति प्रतीतिबलादवध्यवधिमद्भावलक्षण
स्वरूपसम्बन्धविशेष एव विलक्षणः कार्यकारणयोः । तत्सम्बन्धा
वच्छिन्नकार्याभावश्च कारणे इतराभावावच्छेदेन । स्वरूपायोग्ये तु
तादृशसम्बन्धाभावात्तदवच्छिन्नकार्याभावः स्वासाधारणशिलात्वादि
धर्मावच्छेद्यः । एवं च तादृशसम्बन्धावच्छिन्नकार्याभावव्याप्यत्व
यत्र स्वासाधारणधर्मेतरावच्छिन्नं तदवच्छिन्नं कारणमित्यत्र ता
त्पर्यम् । चरमकारणे च यद्यपीतराभावो नावच्छेदकः । तथा
प्युत्पादकाल एव तथा उत्पादानन्तरमेव कार्योत्पादेन तद
कार्याभावात् । यद्वा चरमकारणे परामर्शादावपि प्रतिबन्धका
भावविलम्बेन कार्योत्पत्तिविलम्बादित्यन्तराभावावच्छिन्नत्वमेव । य
दि च क्वचिन्न तथात्वं तदा तत्सजातीयत्वं लक्षणं बोध्यम् । न चा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



ण्यस्थदण्डे तद्दण्डत्वादिनैव तदवच्छेदादव्याप्तिरिति वाच्यम् । दण्डत्वमादाय लक्षणसत्त्वात् । एवञ्च घटकारणज्ञानत्वादावपि तत्सम्बन्धावच्छिन्नकार्याभावव्याप्यत्वं दण्डाद्यभावावच्छेद्यमेवेति न तत्राव्याप्तिरिति ध्येयम् । ननु दण्डरूपादावतिप्रसङ्ग इति चेत् । न । दण्डाद्वट इति वद्दण्डरूपाद्वट इति प्रतीत्यभावेन तादृशसम्बन्धावच्छिन्नकार्याभावसम्बन्धस्य दण्डरूपत्वेनैवावच्छेदात् । अत एव व्योमादावपि न घटकारणत्वप्रसङ्गः । अत्र च स्वभाव एव शरणम् । एवञ्चानन्यथासिद्धत्वेन विशेषणीयमतो नोक्तदोष इति कस्यचिद्व्याख्यानमनादेयम् । उक्तेनैवोपपत्तेरिति ॥

( चि० ) यद्वा अन्यासमवधानावच्छिन्नकार्य्यानुत्पत्तिव्याप्यत्वं कारणत्वम्, रासभादेः स्वत एव कार्य्याभावव्याप्यता अन्यासमवधानस्य वैयर्थ्येनानवच्छेदकत्वात् ।

अनन्यथासिद्धनियतपूर्ववर्त्तिजातीयत्वं वा तत्त्वम् । अन्यथासिद्धत्वञ्च त्रिधा । येन सहैव यस्य यं प्रति पूर्ववर्त्तित्वमवगम्यते, यथा घटं प्रति दण्डरूपस्य । अन्यं प्रति पूर्ववर्त्तित्वे ज्ञाते एव यं प्रति यस्य पूर्ववर्त्तित्वमवगम्यते, यथा शब्दं प्रति पूर्ववर्त्तित्वे ज्ञात एव ज्ञानं प्रत्याकाशस्य । अन्यत्र कृत्स्ननियतपूर्ववर्त्तिन एव कार्यसम्भवे तत्सहभूतत्वम्, यथा गन्धवति गन्धानुत्पादाद्गन्धं प्रति तत्प्रागभावस्य नियतपूर्ववर्त्तित्वकल्पनात् पाकजस्थले गन्धं प्रति रूपादिप्रागभावादीनामप्यन्यथासिद्धत्वम् । एतत्त्रितयव्यतिरेकानियतपूर्ववर्त्तित्वं कारणत्वम् । यागापूर्वयोस्तु यागपूर्ववर्त्तित्वेऽवगते न त्ववगम्यमाने, यत्र जन्यस्य पूर्ववर्त्तित्वेऽवगते जनकस्य पूर्वभावोऽवगम्यते तत्र जन्येन जनकस्यान्यथासिद्धिः, यत्र च जनकस्य तथात्वेऽवगते जन्यस्य पूर्वभावावगतिस्तत्र तद्द्वारा तस्य जनकत्वमेव, दण्डसंयोगभ्रमणयोस्तु युगपदेव पूर्वभावित्वग्रहः । स्वस्वानन्तरोत्पत्तिकसकलसमवधाने

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



सत्यपि यस्याभावात् कार्यं न जायते सति च जायते तज्जातीयं प्रति तदनन्यथासिद्धम्।

(प्रका०) *अन्यासमवधानावच्छिन्नेति*। अन्यासमवधानावच्छिन्नं कार्यानुत्पत्तिव्याप्यत्वं यस्य तदवच्छिन्नत्वं कारणत्वमित्यर्थः। उत्पत्तिगर्भतया पूर्वस्माद्भेदः। अत्रापि पूर्वोक्तसम्बन्धविशेषमादायोत्पत्तिव्याप्यत्वं भावव्याप्यत्वं वोध्यम्। उत्पत्तिश्च स्वसमानकालीनपदार्थप्रतियोगिकध्वंसानाधारसमयसम्बन्धः। ध्वंसत्वं च प्रागभावप्रतियोग्यभावत्वं प्रागभावत्वं च न प्रतियोगिजनकाभावत्वं येनान्योन्याश्रयः स्यात् किन्तु गन्धानाधारसमयानाधाराभावत्वम्। शेषं पूर्ववत्।

*अनन्यथासिद्धेति*। घटजातीयं प्रति रासभजातीयमनन्यथासिद्धमिति अत्रातिव्याप्तिवारणाय नियतपदम्। ननु नियतत्वं कालमपेक्ष्य देशमपेक्ष्य वा? नाद्यः। रासभेपि गतत्वात्। घटपदादिपूर्वकाले रासभजातीयस्य नियमेन सत्त्वात्। नान्त्यः। साक्षात्सम्बन्धेनादृष्टादेर्घटादिदेशापेक्षयाऽनियमात्। साक्षात्परम्परासाधारणसम्बन्धमात्रविवक्षया रासभेपि घटादिदेशनियतत्वेनातिप्रसङ्गादिति। नैवम्। साक्षात्परंपरासाधारणैकजातीयसम्बन्धेन देशनियतत्वस्य विवक्षितत्वात्। रासभादिकजातीयसम्बन्धेन घटादिदेशनियतत्वाभात्। घटादावेकजातीयसम्बन्धेनादृष्टादेर्नियतत्वादिति वदन्ति।

*अत्रेदं चिन्त्यम्*। कियत्सु घटेषु रासभस्याप्येकजातीयतत्सम्बन्धेन देशनियतत्वादतिप्रसङ्गः। कार्यतावच्छेदकावच्छेदेनादृष्टस्याप्यतथात्वम्। द्रव्यगुणाद्यनेककार्ये एकजातीयतत्सम्बन्धाभावादिति भक्षितबीजसङ्ग्रहाय *जातीयेति*। जातिपदं च कार्यपूर्ववर्त्तितावच्छेदकधर्मपरम्। अतो नाकाशाद्येकवृत्तिकारणत्वेऽव्याप्तिः। पूर्ववृत्तित्वं च प्रागभावावच्छिन्नसमयवृत्तित्वम्। प्रागभावश्च न विशेषणं येन प्रागभावेऽव्याप्तिः। किन्तु तदुपलक्षितकालविशेषवृत्तित्वं तच्च तत्रास्ति। कालस्य च स्थूलस्थैवाधिकरणतया हेतुत्वं-तस्य च पूर्वक्षणवृत्तित्वमस्त्येव। नत्वधिकरणतया हेतुत्वं तस्य च पूर्वक्षणवृत्तित्वमस्त्येव। नत्वधिकरणस्येति न तदव्याप्तिर्दोषः। प्रागभावत्वं च न प्रतियोगिजनकाभावत्वम्। अन्योन्याश्रयात्। नापि विनाश्यभावत्वं विनाशस्य प्रागभावगर्भतयान्योन्याश्रयात्। उत्पत्तिगर्भतया तन्निर्वचने तूत्पत्तेः स्वसमानकालीनपदार्थप्रतियोगिकध्वंसानाधारसमयसम्बन्धरूपत्वेऽन्योन्याश्रयात्। किन्तु गन्धानाधारसमयानाधाराभावत्वम्।

Digitized by Arya Samaj Foundation Chennai and eGangotri



ननु ध्वंसप्रागभावानात्मनि घटादावव्याप्तिः । न चात्र तदलक्ष्यमेवेति वाच्यम् । न प्रागभावलक्षणमिह प्रकृतं किन्तु कारणत्वलक्षणम् । तच्च सामान्यत एव लक्ष्यं तथैवोपक्रमात् । तथा च ध्वंसप्रागभावस्यालक्ष्यत्वे ध्वंसकारणसाधारणं न तल्लक्षणमिति चेत् । न । अभावपदस्य भावाभावसाधारणविरोधिपरत्वात् । यद्यप्येवं तद्वैयर्थ्यम् व्यावर्त्यभावात् । तथापि तत्तत्प्रतियोगिकाभावलाभार्थमभावपदम् । न हि प्रागभावसामान्यगर्भं कारणत्वम्, किन्तु तत्तत्प्रतियोगिकप्रागभावावच्छिन्नसमयवृत्तित्वं तत्कारणत्वम् । तथा च तादृशकालावृत्तिस्तदभावस्तत्प्रागभाव इति पर्यवस्यति । नच तादृशसमयाप्रसिद्धिः । गन्धत्वं स्वाधिकरणानधिकरणसमयवृत्तिकादाचित्कमात्रवृत्तिजातित्वाच्चेत्यवदित्यनुमानात्तत्सिद्धेः । ननु सिद्ध्यतु गन्धानाधारसमयः, तथापि प्रागभावस्य कथं तदनधिकरणत्वं ग्राह्यम् नहि तत्र प्रत्यक्षमागमो वा सम्भवति, अनुमानं तु सम्भवेत्तच्च प्रसिद्ध्युत्तरम् । तथा चानुमानप्रवृत्तौ प्रागभावत्वेन धीस्तस्यां चानुमानप्रवृत्तिरित्यन्योन्याश्रय इति चेन्न । तादृशनिर्णयवतोपि मीमांसकस्य भविष्यतीति बुद्धेर्निरुक्तातिरिक्तरूपेण प्रागभावस्यावश्यं तद्बुद्धिविषयत्वात्तेन रूपेण तद्बुद्धिविषयत्वेन वोपस्थितस्य प्रागभावस्य लिङ्गाभासादिनापि तादृशसमयानाधारत्वानुमितिसम्भवात्, गन्धस्यैव दृष्टान्तत्वाच्च । यद्वा कादाचित्कामावत्वेनैवोपस्थितस्य तस्य तदनुमानं ध्वंसांशे बाधादेवानुमानात्, तदनवतारे तदंशे भ्रमत्वेपि क्षत्यभावाच्च ।

ननु गन्धानाधारसमयो नास्तीति निर्णयवतो मीमांसकस्येष्टसाधनतालिङ्गककार्यताज्ञानेन प्रवृत्तिदर्शनान्नैतत्प्रागभावत्वगर्भं कारणत्वम्, किञ्च कारणत्वबोधकशब्दादिरेवैवं महाप्रलयकाले प्रमाणं स्यात्तस्य तद्गर्भत्वात्तथाच तदनभ्युपगमोपि तस्य व्याहन्येतेति चेन्न । गन्धानाधारेत्यादिना भविष्यतीति प्रतीतिनिर्वाहप्रयोजकस्य प्रागभावत्वस्योपलक्षणत्वात् अत एव मीमांसकं प्रति जनकत्वघटितस्य लिङ्गस्य नैयायिकेनोक्तावपि नान्यतरासिद्ध्यादिदोष इति वदन्ति । तच्चिन्त्यम् । तस्यैवानुगतस्य निर्वक्तुमशक्यात् । न चाखण्डमेव प्रागभावत्वं तेनोपलक्षितमिति वाच्यम् । उपाधेरखण्डत्वे जात्यपलापापत्तेः । जातेश्चाभावेऽनभ्युपगमात् ।

वस्तुतस्तु नेदं कारणत्वं प्रवृत्त्यनुकूलम् । तथा च स्वमते लक्ष्यतावच्छेदकतया कारणपदप्रवृत्तिनिमित्ततया वा निरुक्तं यस्मिन्सतीत्यादिना निरुक्तं क्षेमसाधारणतत्साध्यकत्वज्ञानमेव प्रवर्त्तकं । तदेव



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



विध्यर्थः। अन्यथा प्रागभावस्य प्रागभावाभावे तत्पूर्ववर्त्तित्वाभावेन तद्घटितजनकत्वाभावाद्दुःखप्रागभावार्थितया प्रायश्चित्तादौ प्रवृत्त्यभावापत्तेरित्यादिविधौ वक्ष्यते। तथाच नोक्तदोषः। एतेन गन्धानाधारगर्भवन्नीलानाधारगर्भतयापि तन्निर्वचनात्तद्गर्भे कारणत्वमपि भिद्येत। तथाच विनिगमकाभावादुभयगर्भेष्टसाधनताज्ञानस्य प्रवर्त्तकतायां प्रवृत्त्यननुगम इत्यपास्तम्। निरुक्तस्य प्रवर्त्तकतानभ्युपगमात्। यत्त्वाकाशपदात्कदाचिच्छब्दाश्रयत्वेन कदाचिदद्रव्यातिरिक्तद्रव्यत्वेनेति यत्कदाचिन्नीलाद्यनाधारत्वेनापि समयविशेषोपलक्षणान्न कापि क्षतिः। तत्समयविशेषावृत्त्यभावत्वावच्छिन्नसमयसत्त्वस्यैव हेतुतया च न प्रवृत्त्यननुगम इति निरुक्तमेव प्रवृत्त्यनुकूलमिति। तच्चिन्त्यम्। तत्समयानभ्युपगन्तुरेतज्ज्ञानं विनैवान्यज्ञानादेव प्रवृत्तिरित्यननुगमस्यैवमप्यपरिहार्यत्वात्, प्रायश्चित्तप्रवृत्त्यनुपपत्तेश्च। अत एव तत्समयाघटितस्यानुगतस्य प्रागभावत्वस्य निर्वक्तुं शक्यत्वेपि न प्रवृत्त्यनुकूलत्वमिति ध्येयम्। यत्तु गन्धानाधारसमयस्य महाप्रलयत्वे मानाभावः युगपन्नाशे मानाऽभावात्। तथा च यावद्गन्धनाशानन्तरमपि वस्त्वन्तरसत्त्वसम्भावनया तत्प्रागभावस्य गन्धानाधारसमयानाधारत्वसंशयेन तत्कारणे तद्गर्भकारणलक्षणाव्याप्तिसन्देहः, एवञ्च व्यर्थविशेषणतासन्देहात्तद्वारणाय विशेषणमप्यदेयमिति। तन्न। यावद्गन्धनाशो ह्यदृष्टाभावात्, अन्यथा संयोगविभागयोरन्योन्यनाश्यतयान्यतरावस्थितौ सर्वमुक्त्यनुपपत्तेः। तथा च सर्वादृष्टाभावात् कार्याभावो वाच्य इति युगपदेव सर्वनाश इत्याहुः। न चाकाशादेरवृत्तितया पूर्वकालवर्त्तित्वाभावादव्याप्तिरिति वाच्यम्। वर्त्तिपदेन समवधानवत्त्वस्योक्तत्वात्।

वस्तुतः कालस्य जगदाधारतया तत्रापि तद्वृत्तिः। ननु द्रव्यत्वेन रूपेण दण्डरासभयोर्नियतपूर्ववर्त्तित्वसत्त्वात्कारणत्वं स्यादिति चेन्न। तेन रूपेण तस्यान्यथासिद्धेर्वाच्यत्वात्। सामग्री च न कारणं, क्षणविशेषत्वात्। कालोपाधेश्चाधिकरणत्वेनैव हेतुत्वात्। न च कारणमेलकरूपायां तस्यामतिप्रसङ्गः। दण्डादीनां कारणत्वस्येष्टत्वात्। मेलकस्यातिरिक्तस्यानभ्युपगमात्। अभ्युपगमे वा दण्डरूपवदन्यथासिद्धत्वात्। पररूपरत्यासत्तिरूपस्येष्टत्वात्।

केचित्तु–स्वरूपसम्बन्धविशेषः कारणता प्रतियोगित्वादिवत्। तत्परिचायक एवायं धर्मविशेष उक्त–इत्याहुः।

ननु कारणत्वादन्येन रूपेण सिद्धत्वभावोऽनान्यथासिद्धत्वमित्यन्योन्याश्रयः। सिद्धिपदस्य चोत्पत्तिपरत्वे नित्यमात्रेऽतिव्याप्तिः। ज्ञप्ति-

Digitized by Arya Samaj Foundation Chennai and eGangotri



रत्वेऽसम्भवः । हेतोरपि प्रमेयत्वादिना ज्ञातेरिति योगार्थमपहाय रूढ-
मन्यथासिद्धिपदार्थमाह-*अन्यथेति* । यद्यपि कुसुमाञ्जलिप्रकाशे प-
श्चान्यथासिद्धिरुक्ता तथाप्यवच्छेदकजनकजनकयोरत्रैव प्रवेशान्न त-
त्सङ्ग्रहाय प्रकारद्वयमुक्तम् । अत एव कुसुमाञ्जलिमकरन्देपि तथैव वि-
भावितमस्माभिरिति । *येन सहैवेति* । तेन तदन्यथासिद्धमिति शे-
षः । ननु शब्दादिना दण्डपूर्ववर्त्तित्वग्रहं विनापि तद्रूपपूर्ववर्त्तित्वग्रह-
सम्भवान्नियमो सिद्धः । न च प्रत्यक्षेति विशेषणीयम्, अतीन्द्रियान्यथा-
सिद्धेऽव्याप्तेः । नियमाविवक्षायां दण्डरूपेणैव दण्डस्यान्यथासिद्ध्या-
पत्तेरिति चेन्न । रूपत्वमात्रस्यातिप्रसक्ततया दण्डरूपत्वेनैव पूर्ववर्तित्व-
ग्रहो वाच्यः । तत्र साहित्यनियमात् । न चैवं द्रव्यत्वादेरतिप्रसक्ततया
दण्डत्वेनैव दण्डस्य पूर्ववर्त्तित्वग्रहाद्दण्डत्वेन दण्डस्यान्यथासिद्धिर-
स्त्विति वाच्यम् । येन पृथगन्वयव्यतिरेकवता सहेत्यर्थात् । अत्रापृथग-
न्वयादिमत इत्यपि यस्येति विशेषणं देयम्, तेन दण्डेन दण्डसंयोगस्य
नान्यथासिद्धिः । एतद्विशेषणमहिम्नैव यत्रोभयोरुभयविशेषणावच्छेदेनै-
वान्वयाद्यनुविधानं तत्रैकेनापरस्य नान्यथासिद्धिः । यथोद्भूतरूपनेज-
सोरित्येके । यत्रोभयविशेषणावच्छेदेनैवान्वयाद्यनुविधानं तद्भिन्नत्वेन
विशेषणान्न तादृशस्थलेतिऽप्रसङ्ग इत्यन्ये । कुम्भकारपितापत्रैवान्त-
र्भवति कुम्भकारत्वेन तदनन्यथासिद्धस्येष्टत्वात्कुम्भकारपितृत्वेना-
न्यथासिद्धत्वं वाच्यम् । तत्र तत्साहित्यनियमात् । नन्वेवमुद्भूतरूपते-
जसोरिव दृढत्वदण्डयोरपि नैकेनापरस्यान्यथासिद्धिः स्यात् । उभयो-
रुभयविशेषणावच्छेदेनैवान्वयाद्यनुविधानात् । न च दृढत्वस्य चक्रभ्र-
मिजनकत्वस्यान्वयाद्यनुविधानमेव नेति वाच्यम् । तथासति दण्डत्वे-
नैव हेतुतापत्तौ दृढत्वस्यावच्छेदकतापि न स्यात् । किञ्च दण्डत्वेन दंडस्य
दण्डेन दण्डत्वस्यान्वयाद्यनुविधानमित्युभयोरुभयविशेषणावच्छेदेनैवानु-
विधानमिति नैकेनापरस्यान्यथासिद्धिः स्यात् । अपि च कुम्भकारपितृ-
त्वेनान्यथासिद्धस्यापि कुम्भकारत्वेनैव दण्डरूपत्वेनान्यथासिद्धस्यापि
रूपत्वादिनाऽन्यथासिद्धिरस्तु न तु तदतिप्रसक्तमिति चेत् । तत्किमतिप्र-
सक्तत्वमप्यपरान्यथासिद्धिः । तथा चानन्यथासिद्धत्वनियतपूर्ववर्त्ति-
त्वयोरप्रतिक्षेपे किं तेन । किञ्च फलानुपहितवृत्तित्वस्यातिप्रसक्तत्वस्य
दण्डत्वादिसाधारणत्वात्, अतादृशस्य चाभावात् । न च फलानुपहि-
तनित्यवृत्तित्वेन तथात्वम्, रूपत्वेन नित्यरूपस्यापि घटजनकत्वाविरो-
धात्, उक्तरूपयोरप्रतिक्षेपात् । जन्यरूपत्वेन वा हेतुत्वमस्तु । न च
तेन रूपेणान्यत्र क्लृप्तेत्यत्रान्तर्भवतीति वाच्यम् । तर्हि दण्डरूपत्वेना-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



पि तथास्तु किमुक्तान्यथासिद्ध्येति चिन्त्यम् । *अन्यं प्रतीति* । ननु शब्दोऽष्टद्रव्यातिरिक्तद्रव्याश्रितोऽष्टद्रव्यानाश्रितत्वे सति गुणत्वादित्यनेनाकाशसिद्धौ शब्दपूर्ववर्त्तितामज्ञात्वापि ज्ञानादिकं प्रति तस्य पूर्ववर्त्तित्वं ज्ञायत एवेति चेन्न । तेनापि विपक्षबाधकतया शब्दकारणतामुपजीव्यैवाकाशसिद्धेरित्याहुः । न चैवं संयोगादिकमपि प्रत्याकाशस्यान्यथासिद्धत्वप्रसङ्गः । आकाशत्वेनेष्टत्वात् । द्रव्यत्वेन शब्दपूर्ववर्त्तितामज्ञात्वापि पूर्ववर्त्तित्वग्रहात् । नन्वेवं यागादेरपूर्वेऽन्यथासिद्ध्यापत्तिः । स्वर्गं प्रति पूर्ववर्त्तित्वे ज्ञात एव तस्य तं प्रति तद्धेतुत्वादिति चेन्न । साक्षादिति पूर्ववर्त्तित्वे विशेषणादित्याहुः ।

तत्पूर्ववर्त्तित्वानुपपादकं यस्य पूर्ववर्त्तित्वं गृह्यत इत्यर्थादित्येके ।

न च परत्वादिपूर्ववर्त्तित्वग्रहानन्तरमन्यकार्ये दिक्कालयोस्तद्ग्रह इत्यन्यथासिद्धिः । तद्ग्रहं विनाप्यधिकरणत्वेन कार्यमात्रपूर्ववर्त्तित्वग्रहात् कुम्भकारपितुरत्राप्यन्तर्भावः । ननु कुम्भकारपितृत्वेन तथात्वेऽपि चैत्रत्वादिना तस्यानन्यथासिद्धत्वमस्त्वति चेन्न । तेनापि रूपेण कुम्भकारजनकत्वं ज्ञात्वैव तस्य घटं प्रत्यन्वयादिग्रहात् । तदानीं तद्देशे तस्य सत्त्वानियमेन कुम्भकारद्वारैव घटनियतपूर्ववर्त्तित्वग्रहात् । नन्वन्यं प्रति पूर्ववर्त्तित्वे ज्ञात एवेत्यत्र येन केनचित्सर्वेण वा ? नाद्यः । दण्डादावतिप्रसङ्गात् । नान्त्यः । शब्दनित्यत्वानित्यत्वसन्देहेऽपि शब्दकारणतामुपजीव्य शब्दाश्रयत्वेनाकाशसिद्धौ ज्ञानादिपूर्ववर्त्तिताग्रहसम्भवात् । निरुपाधित्वादेरपि विपक्षबाधकत्वसम्भवात् । वस्तुतः शब्दनित्यत्वनिर्णयवतो मीमांसकस्य तत्पूर्ववर्त्तित्वमज्ञात्वैव ज्ञानादिपूर्ववर्त्तित्वग्रह इति नियमासिद्धिः । किञ्च द्रव्यत्वेनैवाकाशस्य स्वसंयोग इव ज्ञानादौ हेतुत्वमस्तु । न च ग्राहकाभावेन तेन रूपेण नियतपूर्ववर्त्तित्वाग्रह इति वाच्यम् । ग्राह्यसत्त्वे ग्राहकाभावासम्भवात् । न च तेन रूपेणान्यत्रेत्यत्रान्तर्भवतीति वाच्यम् । तथा सत्याकाशत्वेनापि तथात्वापत्तेः । अपि च एवं शब्दसाक्षात्कारं प्रत्यपि तस्यान्यथासिद्ध्यापत्तिः । न च शब्दपूर्ववर्त्तितामज्ञात्वापीन्द्रियत्वेन तत्पूर्ववर्त्तिग्रह इति वाच्यम् । श्रोत्रत्वेन तथाप्यन्यथासिद्ध्यापत्तेः । तस्याकाशघटितत्वादाकाशस्य च शब्दपूर्ववर्त्तित्वग्रहं विना सिद्धेरनभ्युपगमादन्यथा ज्ञानेपि तस्यान्यथासिद्धत्वं न स्यात् । एवं च पाञ्चभौतिकशरीरं प्रत्यपि तदन्यथासिद्धं स्यात् । किञ्च ईश्वरज्ञानादेः क्षितिपूर्ववर्त्तित्वे ज्ञात एव घटपूर्ववर्त्तिताग्रहात्तत्राप्यन्यथासिद्ध्यापत्तिः । न च कार्यमात्रे कर्तृमात्रस्यैकदैव पौर्वापर्यग्रहान्नैव मिति वाच्यम् । प्रकृतेपि कार्यमात्रे विभुमात्रस्यैकदैव

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



पौर्वापर्यग्रहस्य शब्दादिना सम्भवादन्यथासिद्धभावापत्तेः । शब्दस्यापि वर्णध्वनिभेदेन नानात्वादन्यतरपूर्ववर्त्तित्वग्रहेणापि सम्भवेन नियमाभावात् । तत्र शब्दत्ववदत्राप्यनुगतपक्षतावच्छेदकस्यान्यतमत्वादेर्वा विशेषणस्य सम्भवादिति चिन्त्यम् । *अन्यत्रेति* । एतच्च प्रायिकम् । अवश्यकल्प्यं यल्लघुनियतपूर्ववर्त्ति तत्समवधाननियतत्वं तत्त्वमित्यत्र तात्पर्यम् । तेन गुणेन दोषाभावस्य महत्त्वेनानेकद्रव्यत्वस्यान्येषां च गुरूणां पदार्थानामन्यथासिद्धिर्भवति । अतः पञ्चम्या हेतुत्वाभिधानादात्माश्रय इत्यपास्तम् । पूर्ववर्त्तिन इत्यत्रावधौ पञ्चमीत्यन्ये । अत एव च रासभादेरपि यथाश्रुतान्यथासिद्ध्यन्तर्भावेऽनन्यथासिद्धपदेनैव तद्व्यावृत्तेः नियतपदं व्यर्थमित्यपास्तम् । निरुक्तस्य रासभेऽसत्त्वात् । नन्वेवं दण्डरूपाकाशादेरप्यत्रैवान्तर्भावे तद्ग्राहकान्यथासिद्धेरानर्थक्यम् । किञ्च अवश्यकल्प्यत्वं नियतपूर्ववर्त्तित्वमात्रेण कारणतया वा? नाद्यः । गन्धं प्रति रूपविशेषप्रागभावस्यापि तथात्वेन तेन गन्धप्रागभावस्यान्यथासिद्ध्यापत्तेः । नान्त्यः । आत्माश्रयात् । अपि च सहकारिणोः परस्परेणान्यथासिद्ध्यापत्तिः । द्वयोरप्यवश्यकल्प्यलघुनियतपूर्ववर्त्तित्वेन तत्समवधाननियतत्वात् । न च पृथगन्वयाद्यननुविधायित्वे सतीत्यपि विशेषणम्, तद्धि पृथगन्वयादिग्रहाविषयत्वं समनियतत्वं वा? नाद्यः । रूपप्रागभावस्यापि शब्दादिना तादृशग्रहाविषयत्वेन तथात्वापत्तेः । नान्त्यः । आलोकरूपादेरीश्वरज्ञानादेश्चैवमपि परस्परमन्यथासिद्ध्यापत्तेः । एतेनावश्यकल्प्यपूर्ववर्त्तिन एव कार्यसम्भवे तन्नियतसहभूतत्वमित्यर्थः, पञ्चमी चावधित्वे न तु हेतुतायामित्यपास्तम् इति चिन्त्यम् । ननु येन सहैवेत्यन्यथासिद्धिर्यागेऽपीत्यत आह । *यागेति* । अपूर्वानुपस्थितावपि विधिना यागकारणत्वबोधनान्न तु तेन सहेत्यर्थः । तदेवाह *तत्त्ववगम्यमान इति* । नन्वेवमपूर्वेण यागवत्कुलालेन पितान्यथासिद्धो न स्यादित्यत आह–*यत्रेति* । कुलालं प्रति पूर्ववर्त्तित्वे ज्ञात एव घटं प्रति कुलालपितृत्वेन पूर्ववर्त्तित्वग्रहात्तेन सोऽन्यथासिद्ध इत्यर्थः । नन्वेवं कुलालपितृवद्यागोऽपि अन्यथासिद्धः स्यादित्यत आह *यत्र चेति* । पूर्वोक्तरीत्या तत्रोक्तान्यथासिद्धेरभावादित्यर्थः । नन्वेवं चक्रभ्रमणेन दण्डसंयोगस्यापि कुलालपितृवदन्यथासिद्धिः स्यादत आह *दण्डेति* । तत्र द्वयोरपि समवधानसम्भवेन स्वातन्त्र्येणापि नियतपूर्ववर्त्तिताग्रहसम्भवेन अन्यं प्रति पूर्ववर्त्तित्वे ज्ञात एवेत्यवधारणासम्भवादिति भावः । *स्वस्वेति* । स्वं कारणत्वेनाभिमतं दण्डादि तदनन्तरोत्पत्तिकं तत्संयोगादि तदितरसकलसमवधाने सतीत्यर्थः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



क्वचित्स्वस्वानन्तरोत्पत्तिकसकलसमवधाने सतीति पाठः। तत्र स्वप. दमन्यपरम् ॥

(चि०) अनन्यथासिद्धनियतपूर्ववर्त्तित्वं कारणत्व. मित्यन्ये। तन्न। ईश्वरतद्बुद्ध्यादीनामसङ्ग्रहात्। तद्व्यतिरे. कस्य तत्समवधानव्यतिरेकस्य वाऽभावात्। कार्य्यस्या. न्यथानुपपद्यमानताव्यवस्थाप्यत्वं वाऽनन्यथासिद्ध. त्वम्। नन्वेवमतिरिक्तशक्तौ साधकबाधकप्रमाणाभावा. न्नित्यं संशयः। न च साधकाभावस्य बाधकत्वम्, बाधका. भावस्य साधकत्वादिति चेन्न। साधकाभावेन बह्वावन्यत्र सिद्धातीन्द्रियधर्माभावसाधने लाघवं बाधकाभावेनातीन्द्रियधर्मसाधने च गौरवमिति साधकाभावात्तदभाव एव सिद्ध्यतीति ॥

इति शक्तिवादः।

---

(प्रका०) *ईश्वरेति*। एतच्चोपलक्षणम्। यस्याभावादिति पञ्चम्या हेतुत्वार्थकत्वादात्माश्रयः। यदभावनियतः कार्याभाव इति विवक्षया स्वसत्त्वे स्वानन्तरोत्पत्तिकव्यतिरेकेण यत्र कार्याभावस्तत्र व्यभि चारः। द्वितीयपाठे दण्डानन्तरोत्पत्तिकचरमकारणसमवधाने चक्रा द्यभावात्कार्याभावाप्रसिद्धेस्तत्राव्याप्तिः। उक्तानन्यथासिद्धत्वस्यैव कारणतारूपत्वसम्भवे शेषवैयर्थ्यमुभयत्रेत्यपि द्रष्टव्यम्। *साधकाभावे नेति*। यद्यप्येकत्र गुरुलघुविषयतासम्भवे लाघवं सहकारि, अन्यथ मानान्तरेण लाघवावतारसम्भवे गुरुमात्रस्यासिद्धिप्रसङ्गात्। तथापि यत्रैवैकसिद्धिरपरसिद्धिविरोधिनी तत्रैव लाघवावतारस्य गुरुसिद्धिप्र तिबन्धकत्वमित्याहुः ॥

इति शक्तिवादः ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

# अथ गङ्गेशोपाध्यायकृतपरिशिष्टचिन्तामणौ

# मुक्तिवादः ।

(चि०) परमप्रयोजनत्वनुमानस्यापवर्गः, "आत्मा वा अरे श्रोतव्यो मन्तव्यो निदिध्यासितव्यः ( साक्षात् कर्त्तव्यः )" इति श्रुतेः । स च समानाधिकरणदुःखप्रागभावासहवृत्तिदुःखध्वंसः ।

(प्रका०) ननु निःश्रेयसानुकूलतया प्रमाणतत्त्वविवेचनमत्र प्रतिज्ञातं, न चानुमानस्य तद्धेतुत्वे मानमित्यत आह *परमेति* । वह्न्यर्थिप्रवृत्यादिकमपि तत्प्रयोजनमतः परमेत्युक्तम् । यद्यपि श्रुतिर्न साक्षादपवर्गहेतुतामाह, तथापि "दुःखेनात्यन्तं विमुक्तश्चरती"त्यर्थवादसमभिव्याहृतः तथात्वेन बोध्या । यद्यपि मन्तव्य इत्येव प्रकृतोपयोगि तथापि पक्षज्ञानाभावे मननासम्भव इति श्रोतव्य इत्युक्तम् । तस्याशुविनाशिनो द्वारापेक्षायां निदिध्यासितव्य इत्युक्तम् । यद्यपि 'द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्य' इत्येवमाकारा श्रुतिस्तथापि 'अग्निहोत्रं जुहोति यवागूं पचती'ति वददृष्टद्वारकत्वाकल्पनाच्छाब्दक्रमलङ्घनेनार्थक्रमोपादाने पर्यवसितार्थपरतया साक्षात्कर्त्तव्य इति व्यत्ययेन व्युत्क्रमेण च निर्दिष्टमिति ध्येयम् । ननु 'दुःखेनात्यन्तं विमुक्तश्चरती'त्यादिना दुःखात्यन्ताभावोऽपवर्गत्वेन श्रूयते तस्यासाध्यत्वान्नानुमानप्रयोजनत्वमित्यत आह *सचेति* । तथा च तदसहवृत्तित्वमेव श्रुतावात्यन्तिकत्वम्, इदानीन्तनदुःखध्वंसातिव्याप्तिवारणाय दुःखप्रागभावासहवृत्तित्वे सतीति ध्वंसविशेषणं दुःखप्रागभावासमानकालीनेत्यर्थः । संसारिदुःखप्रागभावसमानकालीनतया शुकादिमुक्तावव्याप्तेराह–समानाधिकरणेति प्रागभावविशेषणं स्वसमानाधिकरणेत्यर्थः । संयोगादिप्रागभावसमानकालतया दोषतादवस्थ्यादाह–आद्यं दुःखपदम् एतच्चैकविंशतिप्रभेददुःखपरम् अतश्चरमभोगरूपदुःखप्रागभावसमानदेशकालतयोपान्त्यदुःखध्वंसे नातिव्याप्तिः । अत एव प्रागभावपदमप्यर्थवत् । चरमदुःखध्वंसस्तु वर्त्तमानोप्यचिरमनुभूयत इति सिद्धान्तेन भोगरूपदुःखसमानदेशकालतयासम्भववारकत्वात् । केचित्तु दुःखप्रागभावासमानवृत्तित्वं दुःखविशेषण-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



मतो नोपान्त्यदुःखध्वंसेऽतिव्याप्तिरित्याहुः । रूपध्वंसादावतिव्याप्तेराह चरमदुःखपदं मुख्यदुःखपरम् । न च तत्र समानाधिकरणदुःखप्रागभावाप्रसिद्धेर्न प्रसङ्गः विषयत्वेन रूपादेरपि दुःखत्वात् । ननु सुखान्तमुक्तावव्याप्तिः 'ते नराः सुखमृत्यव' इति श्रुतेर्मरणस्य दुःखाव्याप्तत्वसम्भवात् । न च तत्सुखपूर्वकालीनदुःखध्वंस एव मुक्तिः । तत्राप्युक्तलक्षणाव्याप्तेः । तत्सुखज्ञानस्यापि दुःखतया तत्प्रागभावसमानकालत्वात् । मुक्तस्य सुखोत्पत्त्यसम्भवादिति चेन्न । 'ते नरा' इत्यादिश्रुतेरन्यापेक्षया मरणे दुःखाभाव इत्यत्र तात्पर्यात् । नचानुपपत्तिं विना नमुख्यार्थत्याग इति वाच्यम् । दुःखविशेषहेतुरोगादिसत्त्वे दुःखोत्पादस्याव श्यकत्वात् । ननु मरणे दुःखं मे माभूदिति कामनया प्रयोगस्नातो यत्र मृतस्तत्र का गतिरिति चेन्न । तत्र हि कामनैव बाधिता, अन्यथा यत्र मुक्तौ सुखं मम भवत्विति कामनया स्नातस्तत्र का गतिः । यदि च तत्र कारणबाधात्सुखं बाधितमिति कामनाबाधस्तदा दुःखसामग्रीसत्त्वे तदभावोपि बाधित इति चिन्त्यम् । न च भोजकादृष्टं विना कथं दुःखोत्पत्तिरिति वाच्यम् । अदृष्टान्तरस्य भोगेन क्षीणत्वेप्यवश्योत्पन्नसमानमरणदुःखभोजकादृष्टस्य सत्त्वात् । न चैवमीश्वरस्यापि शरीरत्यागकाले दुःखोत्पत्तिरिति वाच्यम् । अदृष्टादिकारणबाधेन बाधादिति संक्षेपः ॥

(चि०) ननु नासौ पुरुषार्थः, अतीतदुःखध्वंसस्य सिद्धत्वात् अनागतदुःखस्य ध्वंसयितुमशक्यत्वात् वर्त्तमानस्य पुरुषप्रयत्नं विनैव विरोधिगुणसाध्यत्वात्, अतीतदुःखवत् हेतूच्छेदे पुरुषव्यापारः प्रायश्चित्तवादिति चेत् न । तत्र किं हेतूच्छेदस्य सुखदुःखाभावेतरत्वेन स्वतोऽपुरुषार्थत्वात् अनागतानुत्पादमुद्दिश्य क्रियमाणत्वाच्च यथा तत्र दुःखानुत्पादः पुरुषार्थस्तथेहापीति विवक्षितम्, अथानुत्पादस्य प्रागभावत्वेनासाध्यत्वात् फलान्तरस्याभावाच्चानन्यगतिकतया कण्टकनाशवद्दुःखसाधननाश एव स्वतः पुरुषार्थस्तथेहापीति वा, उभयथापि दुःखध्वंसस्यापुरुषार्थत्वमेव, न च तयोरपि पुरुषार्थत्वमिति वक्ष्यते ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



नैवम् । दुःखान्तरध्वंसस्याऽयत्नसाध्यत्वेऽपि तादृशदुःखध्वंसस्य मिथ्याज्ञानोच्छेदद्वारा पुरुषप्रयत्नाधीनतत्त्वज्ञानसाध्यत्वात्, तथाहि तत्त्वज्ञानात् सवासनमिथ्याज्ञानाभावे दोषानुत्पत्तौ प्रवृत्त्यभावेऽदृष्टानुत्पत्तौ जन्माभावे तादृशदुःखध्वंसो भवति । अथ चरमदुःख उत्पन्ने तद्ध्वंसस्तज्ज्ञानादेव भविष्यति तदनुत्पादे तत्त्वज्ञानादपि न स्यादिति चेन्न । प्रतियोगिवत्तत्त्वज्ञानस्यापि तद्धेतुत्वात्तुल्यवदुभयोरपि कारणत्वात्,तेन विना तदनुत्पत्तेः । अत एव शुकस्य तत्त्वज्ञानमुत्पन्नमिति तस्य तद्ध्वंस उत्पन्नो नास्मदादीनाम् । तत्र दुःखं नोत्पन्नमस्ति तेन स ध्वंसो नास्मदादीनामिति चेत् , अनादौ संसारे तत् कुतो नोत्पन्नम् ? स्वकारणाभावादिति चेन्न । अन्वयव्यतिरेकानुविधायिनस्तत्त्वज्ञानादन्यस्यान्विष्यमाणस्याभावात् । मुक्तौ स ध्वंसोऽस्त्येव तस्मिन् सति मुक्तिरस्त्येवेति स मुक्त्युपपादकोत्पाद्य इति सर्ववाद्युपगतम् । मुक्तिः सा अन्या वा ? ननु ध्वंसार्थं दुःखमुपादेयं तदनुत्पाद्यध्वंसानुत्पादादिति चेत्, सत्यम्, पुरुषार्थहेतुत्वेन लोके दुःखतत्साधनयोरप्युपादानदर्शनात् अनागतकुम्भनाशार्थं मुद्गरादौ प्रवृत्तिदर्शनादनागतदुःखध्वंसार्थमपि प्रवृत्तिः । चरमदुःखध्वंसो न दुःखध्वंसत्वेनोद्देश्यः अयत्नसिद्धदुःखान्तरध्वंसवदपुरुषार्थत्वादिति चेन्न । समानाधिकरणदुःखप्रागभावासहवृत्तिदुःखध्वंसत्वेन तस्योद्देश्यत्वात् दुःखासंभिन्नसुखवत् , तस्य च पुरुषप्रयत्नसाध्यत्वमेवेत्युक्तम् । एतेन दुःखध्वंसत्वमेव मोक्षत्वम्, तत्तदात्मयावद्दुःखध्वंससमुन्मूलनदशायान्तु तथा व्यपदेशः प्रतिपुरुषं दुःखध्वंसस्तोमस्य व्यक्तिस्थानीयत्वात् तेजोऽभावे संवलितेऽन्धतमसपदप्रयोगवत्, यथा संवलित एव ह्या-



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



विति बुद्धिव्यपदेशौ प्रवृत्तिरपि संवलनार्थमित्यपास्तम् मिलितानामसाध्यत्वात् मेलकस्यानतिरिक्तत्वेऽतिप्रसङ्गात्, अतिरिक्तत्वे जन्यस्य ध्वंसावृत्तेः अजन्यस्य पुरुषार्थत्वाभावात् साध्यतया संवलने भोगावश्यम्भावात् । अन्धतमसादौ तथा संवलन एव प्रयोगात् अत एव संस्काराजनकभोगाविषयदुःखध्वंसः संस्काराजनकानुभवध्वंसो वा मुक्तिः। न चातिव्याप्तिः,जनकत्वस्याजनयत्यपि भावादिति निरस्तम्। अपुरुषार्थत्वात्

(प्रका०) असौ दुःखध्वंसः नतु प्रकृतः तस्यातीतादावभावेन विकल्पासम्भवादिति ध्येयम् । हेतावप्यतीतादिविकल्पदोषे सत्येवा *तदिति* । मिथ्याज्ञानेऽप्यतीतादिविकल्पसम्भवादाह *सुवास नेति* । तथा चानागतस्याभावे वर्त्तमानस्यायत्ननिवर्त्यत्वेपि तद्वास नैव निवर्त्यत इति भावः । ननु वासनापि मिथ्याज्ञानमुत्पाद्य प्रवृत्ति द्वारा मुक्तिविरोधिनी न स्वतः, तथा च मिथ्याज्ञानप्रागभावाभावे दसम्भवात्तत्सत्त्वेपि न क्षतिरिति तन्निवृत्त्यर्थं किं तत्त्वज्ञानेन । न तत्सत्त्वे अशेषविशेषगुणोच्छेदलक्षणो न मोक्ष इति वाच्यम् । चरम संस्कारवत्तस्यापि कालाद्विनाशसम्भवादिति चेत् । न । अन्वयव्यतिरे काभ्यां चरमदुःखं तद्ध्वंसं च प्रति तत्त्वज्ञानस्य हेतुत्वमित्यग्रे स्फुटत्वात् तत्त्वज्ञानं विना कायव्यूहाभावेऽनन्तकर्मक्षयानुपपत्तेश्च तदावश्यकत्वे विरोधितया तेनैव तद्वासना निवर्त्तत इत्याशयात् । तादृशदुःख ध्वंसस्तत्त्वज्ञानोत्पाद्य इति सर्वसंमतमित्याह *मुक्ताविति* । *दुःख ध्वंस एवेति* लाघवादित्यभिमानः। *मिलितानामिति* एकदा तावद्दुःख खानुत्पादेन तद्ध्वंसस्य तत्त्वज्ञानासाध्यत्वादित्यर्थः । ननु तन्मेलकमेव साध्यं स्यादित्यत आह *मेलकस्येति* । तस्य मेलकिदुःखध्वंसानतिरिक्तत्वे तावतामुक्तरीत्याऽसाध्यत्वे यत्किञ्चिद्दुःखध्वंसो मुक्तरित्यस्मदादिरपि मुक्तः स्यादित्यर्थः । चरमध्वंसघटितस्तोमस्य मुक्तित्वे लाघवात्स एव मुक्तिरित्यपि बोध्यम् । *संवलन एवेति* । तत्र मिलितानामसाध्यत्वेपि तत्पदवाच्यत्वे दोषाभावादिति भावः । जनकत्वस्य स्वरूपयोग्यत्वस्य । *अपुरुषार्थत्वादिति* । यद्यपि प्रथमपक्षे नायं दोषः स्तथापि तस्य संस्कारात्कालाद्वा विनाश इति वार्त्तिकदर्शनादसम्भवः स्वरूपयोग्यताविवक्षायां तु सुतरामिति दूषणे तात्पर्यम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



(चि०) अन्ये तु दुःखप्रागभावासहवृत्तिदुःखसाधनध्वंसो मुक्तिः । लोकेऽहिकण्टकादिनाशस्य वैदिके प्रायश्चित्तादौ पापनाशस्यानन्यगतिकतया दुःखसाधनध्वंसत्वेन पुरुषार्थत्वात् । अथाऽहिकण्टकादिपापं वा नाशयतां तेन तज्जन्यं दुःखं न भवतीति दुःखानुत्पादमुद्दिश्य प्रवृत्तेर्दुःखानुत्पाद एव प्रयोजनं न तु दुःखसाधनाभावः सुखदुःखाभावेतरत्वादिति चेन्न । दुःखानुत्पादस्य प्रागभावत्वेनानादितयाऽसाध्यत्वात् । न च तत्पालनंसाध्यम् । पालनं हि न तत्स्वरूपम् ,तस्यासाध्यत्वात् । नोत्तरसमयसम्बन्धः अभावे सम्बन्धिद्व्यातिरिक्तस्य तस्याप्रामाणिकत्वादनभ्युपगमाच्च । नापि सम्बन्धिद्वयस्वरूपं साध्यम् , प्रागभावस्याप्यसाध्यत्वात् समयतदुपाध्योश्च प्रयत्नं विनैव सिद्धेः । अथ दुःखे द्वेषाद्यथा तदभावे इच्छा तथा दुःखसाधने द्वेषात्तदभावेऽपीच्छा तथा तत्साधने प्रवृत्तिरिति चेन्न । यदिच्छया यत्साधने यस्य प्रवृत्तिस्तस्यैव तत्प्रयोजनत्वमिति दुःखसाधनाभावस्यैव प्रयोजनत्वात् । अथ चिकीर्षायोनिप्रयत्ने प्रयोजनज्ञानापेक्षा तेन विनोपाये चिकीर्षाविरहात,न तु द्वेषयोनिप्रयत्ने, अनिष्टसाधनताज्ञानादहिकण्टकादौ द्वेषो द्वेषाच्च तत्त्यागानुकूलो यत्न उत्पद्यते, अयमेव हि द्वेषस्वभावो यत् प्रतिबन्धकं विना स्वविनाश्यविषयनाशानुकूलं यत्नमुत्पादयति अन्यथा प्रयत्नद्वैविध्यानुपपत्तेः । अत एव फलं विनैवोत्कटक्रोधान्धानामात्मघाते प्रवृत्तिरिति चेन्न । प्रयोजनमनुद्दिश्य द्वेषमात्रादुदुःखैकफलके प्रेक्षावतां प्रयत्नानुत्पादात् क्रोधान्धानामपि तात्कालिकफलाभिमानोऽस्त्येव उत्कटरागान्धा-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



नामिव परदारादावपि प्रवृत्तेरिति । तन्न । दुःखं मे मा भूदित्युद्दिश्य प्रायश्चित्तादौ प्रवृत्तेः दुखानुत्पादस्यैव प्रयोजनत्वात्। न च प्रागभावस्यासाध्यत्वम्, दुःखकारणविघटनद्वारा तस्यापि कृतिसाध्यत्वात् । दुःखकारणसमवधानदशायां कृतौ सत्यां दुःखसाधननाशे सत्यग्रिमसमये प्रागभावस्वरूपमस्ति तेन विना नास्तीन्वयव्यतिरेकयोस्तत्र सत्त्वात् । घटेऽपि कृतौ सत्यामग्रिमक्षणे तत्सत्त्वं तया विना नेत्येव कृतिसाध्यत्वम्, न तु प्रागसतोऽग्रिमक्षणे सत्त्वमुत्पत्तिः गौरवात् कृतिं विना न यत् स्वरूपं तत्कृतिसाध्यं तत् प्रागभावस्वरूपन्तु न तथेति चेन्न। कृतिध्वंसेऽपि घटसत्त्वेनाग्रिमक्षणे इत्यावश्यकत्वात् । अत एव योगवत् क्षेमस्याप्यनागतानिष्टानुत्पादजनकस्य परीक्षकप्रवृत्तिविषयत्वमिति वक्ष्यते निषेधापूर्वप्रस्तावे ।

ननु प्रायश्चित्तनाश्यपापजन्यदुःखस्य प्रागभावो यद्यस्ति तदा दुःखमावश्यकं तस्य प्रतियोगिजनकत्वनियमात्, नास्ति चेत्तर्हि तदभावादेव दुःखानुत्पाद इत्युभयथापि प्रायश्चित्तमफलम्, तस्मादुःखसाधनध्वंसमुखेन प्रागभावस्यापि साध्यतेति तत्रैव कृतिसाध्यतापर्यवसानात् दुःखसाधनध्वंस एव पुरुषार्थो न तु दुःखानुत्पादार्थितयेति तत्र प्रागभावसत्त्वविचारो वायसदशनविचारवत् । अथ तदापि प्रागभावस्यासत्त्वे तदभावात् पापं न दुःखसाधनमिति न तन्नाशार्थं प्रवर्त्तते, तस्य सत्त्वे च पापमादायैव तस्य दुःखोत्पादकत्वनियमात् प्रायश्चित्ते सत्यपि गलेपादिकया पापावस्थानमिति न ततः पापनाश इति चेन्न । प्रागभावस्यासत्त्वेऽपि दुःखसा-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



धनजातीयनाशस्य पुरुषार्थत्वात् सत्त्वेऽपि पापान्तरमादा-
यापि तस्य दुःखजनकत्वसंभवात्, प्रायश्चित्तात् पापनाशः
स्यादेवेति प्रागभावसत्त्वासत्त्वसन्देहेऽपि प्रायश्चित्तादौ
प्रवृत्तिरप्रत्यूहैवेति ।

(प्रका०) *प्रयोजनत्वादिति* । मुख्यप्रयोजनत्वादित्यर्थः । तथाच दुःखसाधनध्वंसस्य स्वतः पुरुषार्थत्वाभावान्न मोक्षत्वमिति भावः । *कु-तो सत्यामिति* । एतच्च प्रपञ्चितं प्रत्यक्षप्रकाशे । *अग्रिमक्षण इति* । तच्च प्रागभावेपीति भावः ।

*नत्विति* । तथाच तस्य स्वतः पुरुषार्थत्वकल्पनात्स एव मोक्ष इति भावः । फलोपहितसाधननाशः पुरुषार्थत्वेनोक्त इति मन्वानो दर्शयति *अथेति* । तथाच तत्सत्त्वासत्त्वविचारो युक्त एवेति भावः ।

(चि०) उच्यते । तत्र दुःखप्रागभावोऽस्त्येव तस्यैव दुःखानुत्पादरूपत्वेन पुरुषार्थत्वात् । स च पापनाशद्वारा प्रायश्चित्तसाध्य इतिप्रागभावसत्त्वेऽपि न निष्फलं प्राय-श्चित्तम् । तेन प्रागभावेन दुःखमवश्यं जननीयमिति चेत् । सत्यम्, किन्तु पापान्तरमासाद्य । न चैवं प्रायश्चित्तमफलं, दुःखानुपादेन तस्य सफलत्वात् । न च दुःखानुत्पादस्या-ऽपि दुःखानुत्पादान्तरमेव फलं तच्च तत्र नास्तीत्यफ-लत्वम्, स्वरूपसत एव तस्य पुरुषार्थत्वात् अनवस्थाना-च्च । अतोऽनेन पापेन दुःखं मे मा भूदिति विद्यमानपा-पनाशार्थं प्रायश्चित्ते प्रवृत्तिः । एतेन चीर्णप्रायश्चित्ते दुः-खप्रागभावो नास्त्येव, अन्यथा तस्य प्रतियोगिनाश्यत्वे-नानिर्मोक्षप्रसङ्गात् । न च प्रायश्चित्तवैफल्यं, न वा भगव-तो दुःखमयकर्मोपदेशकत्वेनानाप्तत्वम् । तस्य पापध्वंसेनैव सफलत्वात्, प्रागभावानिश्चयेऽपि नरकसाधनपापनिश्चया-त्तन्नाशार्थं प्रवृत्तिरित्यपास्तम् । दुःखसाधननाशस्य स्वतो-ऽपुरुषार्थत्वात् । पापान्तरेण तत्प्रतियोगिजनने तन्नाशात्, तस्मात् दुःखं मे मा भूदित्युद्दिश्य तत्साधनध्वंसार्थं प्र-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



वृत्तिरिति दुःखानुत्पाद एव पुरुषार्थो न तु दुःखसाधनध्वंस इति स्थितम्। अपि च न तावत् दुःखमयसंसारबीजमिथ्याज्ञानस्य ध्वंसो मुक्तिः, तत्त्वज्ञानात्तन्नाशेऽपि शरीरधर्मादिसत्त्वदशायां मुक्तिप्रसङ्गात्। नापि शरीरेन्द्रियबुद्ध्यादितन्निदानधर्माधर्मध्वंसः, अचीर्णप्रायश्चित्तकर्मणां भोगैकनाश्यत्वेन तत्त्वज्ञानानाश्यत्वात्, भोगद्वारा तन्नाशस्य च पुरुषार्थत्वादिति।

(प्रका०) *किन्तु पापान्तरामिति*। नन्वेवं काशीमृतस्य कृतप्राणान्तिकादिप्रायश्चित्तस्य कथं मुक्तिः। न च तत्रापि पुनः पापान्तरोत्पत्तिः। काशीमरणेनोत्पन्नतत्त्वज्ञानस्य तस्य दोषाभावेन तदुत्पत्तेरसम्भवादिति चेत्।

अत्र वदन्ति। तत्र दुःखप्रागभावो नास्त्येव। फलसन्देहपर्यवसितत्सन्देहाच्च प्रायश्चित्ते प्रवृत्युपपत्तौ तत्र तस्याकिञ्चित्करत्वेऽपि काचिन्न क्षतिः। न च निष्फलत्वेन तद्बोधकवेदाप्रामाण्यं सति दुःखप्रागभावे तस्य तथा जनकत्वमिति वेदतात्पर्यात्, सति दोषे निषिद्धकर्मणः पापजनकत्ववत्, सति विघ्ने मङ्गलस्य तद्ध्वंसजनकत्ववच्चेति। न चिन्त्यम्। पापादिजनने दोषादेः सहकारित्वमिति निषिद्धकर्मादेः साङ्गत्वाभावान्निष्फलत्वेऽपि न तद्बोधकवेदाप्रामाण्यम्, इह तु साङ्गस्य प्रायश्चित्तस्य निष्फलत्वे तद्बोधकवेदाप्रामाण्यं स्यादेव न हि दुःखप्रागभावे फले दुःखप्रागभावस्यापि सहकारित्वं येन तदभावे प्रायश्चित्तस्य साङ्गत्वं न स्यादिति।

वयं तु ब्रूमः। तत्र दुःखप्रागभावो नास्त्येव काशीमरणस्यैव तत्र मानत्वात्। प्रवृत्तिश्च तद्भ्रमात्तत्सन्देहाद्वा। न चैवं तद्बोधकवेदाप्रामाण्यम्। यत्कामकर्त्तव्यतया हि वेदेन यद्बोध्यते साङ्गस्य तस्यावश्यं तत्फलजनकत्वमिति नियमः। तदिहापि पापध्वंसकामकर्त्तव्यतया प्रायश्चित्तस्य वेदेन बोधनात्तदनुत्पादेन परं तद्बोधकवेदाप्रामाण्यम्। न चात्र तदस्ति। तत्रापि प्रायश्चित्तेन पापस्य नाशितत्वात्। अत एव प्रायश्चित्ते पापध्वंसकामनैवाधिकारो न तु दुःखानुत्पादकामना, तस्यातत्फलत्वात्। न चैवं दुःखानुत्पादस्यैव प्रयोजनत्वादित्यग्रिमग्रन्थविरोधः। दुःखसाधनध्वंस एव स्वतः पुरुषार्थतयाऽपेक्षित इत्याक्षेपे तत्र दुःखानुत्पाद एव स्वतः पुरुषार्थः। तथाच तदर्थतया पापध्वंसस्तत्र गौणं प्रयोजनं न तु मुख्यमिति न स मोक्ष इति तदर्थः। तादिदमुक्तम्-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



'तस्यैव दुःखानुत्पादरूपत्वेन पुरुषार्थत्वादिति' । तथाच प्रायश्चित्तस्य पापध्वंसः फलं । तत्फलं च स्वतः पुरुषार्थो दुःखानुत्पादः । तदिदं वक्ष्यति । न च प्रायश्चित्तस्य दुरितोत्पत्तिनिमित्तकत्वं पापनाशफलश्रवणादिति । न च परमपुरुषार्थानिष्पत्तौ वेदबोधितं फलं जनयतोपि निष्फलत्वम् । तथासति विघ्नध्वंसं समाप्तिं वा जनितवतो मङ्गलस्य तत्साध्यस्वतःपुरुषार्थसुखाद्यनुत्पत्तौ निष्फलत्वापत्तेः । तस्माद्दुःखप्रागभावासत्त्वेपि न तद्बोधकवेदाप्रामाण्यमिति । अस्तु वा तत्र दुःखप्रागभावः । पूर्वजन्मोत्पन्नं पापान्तरमासाद्य कायव्यूहदशायां तेन दुःखाजनने मोक्षोपपत्तेः । न हि तज्जन्मकृतान्येव कर्माणि तदा भुज्यन्त इति नियमः । तस्माद्यदि तत्सत्त्वं तदा पापान्तरमावश्यकम्, अन्यथा तत्सत्त्वे मानाभाव एव । प्रवृत्तिस्तु पूर्वोक्तरीत्यैवेति । यत्तु तत्रापि दुःखप्रागभावोऽस्त्येव, तथा च तस्य न निष्फलत्वं प्रागभावस्य चानन्यगतिकतया अनियतदेशकल्पनादात्मान्तरे पापान्तरमासाद्य तेन दुःखोत्पादनम्। नचैवं दुःखप्रागभावसत्त्वे काशीमृतस्य कथं मुक्तिरिति वाच्यम्। स्वसमवेतदुःखजनकप्रागभावस्यैव मुक्तिविरोधित्वात् । तद्भर्मत्वमेव च मुक्तिलक्षणमिति । तन्न । प्रागभावस्य प्रतियोग्यसमानदेशत्वं प्रायश्चित्तप्रवृत्त्यन्यथानुपपत्त्या कल्प्यं मानान्तराद्वा ? नाद्यः । उक्तरीत्या तदन्यथोपपत्तेः । नान्त्यः । तदसिद्धेः । एतेन तत्र सन्नपि दुःखप्रागभावः पापसहकारिविरहान्न दुःखोत्पादकः । अत एव न मुक्तिविरोधीति कस्यचिन्मतं निरस्तम् । तादृशप्रागभावे मानाभावात् प्रतियोग्यनुपपत्तेश्चेति । *अफलमिति* । स्वतः पुरुषार्थप्रयोजकमित्यर्थः । *दुःखानुत्पादेनेति* । तावत्कालीनदुःखानुत्पादेनेत्यर्थः । *विद्यमानेति* । तथाच न निष्फलत्वशंकापीति भावः । *चीर्णेति* । कृतेत्यर्थः । क्वचित्कृतेति पाठः । अनिर्मोक्षप्रसङ्गमुद्धरति *पापान्तरेणेति* ॥

(चि०) अपरे तु दुःखात्यन्ताभावो मुक्तिः । यद्यपि परदुःखात्यन्ताभावः स्वतःसिद्ध एव दुःखात्यन्ताभावः स्वात्मन्यसम्भवी घटादावतिप्रसक्तोऽसाध्यश्च,तथापि दुःखसाधनध्वंस एव स्ववृत्तिदुःखस्यात्यन्ताभावसम्बन्धः स च साध्य एव । न चावश्यकत्वेन स एव मुक्तिः,तस्य स्वतोऽपुरुषार्थत्वेन दुःखाभावमुद्दिश्य तत्र प्रवृत्तेः "दुःखेनात्यन्तं विमुक्तश्चरतीति" अत्रात्यन्ताभावत्वेन मुक्तिश्रवणाच्च ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



यद्यपि दुःखसाधनध्वंसो न स्वतः पुरुषार्थः अत्यन्ताभावश्च न साध्यः, तथापि विशिष्टस्य पुरुषार्थत्वं, विशेषणसाध्यत्वेन विशिष्टसाध्यत्वञ्च । अहिकण्टकादिनाशस्यापि तत्तद्व्यक्तिसाध्यदुःखात्यन्ताभावमुद्दिश्य तत्सम्बन्धत्वेनैव साध्यतेति । तन्न । अधर्म्मादिदुःखसाधनध्वंसस्य न मुक्तिनिर्वाहकत्वमित्युक्तत्वात् । किञ्च नाऽनागतस्ववृत्तिदुःखस्यात्यन्ताभावसम्बन्धः साध्यः, मुक्तस्यानागतस्ववृत्तिदुःखानभ्युपगमात्, अभ्युपगमे वाऽमुक्तत्वापातात् अत्यन्ताभावसम्बन्धविरोधाच्च । नाप्युत्पन्नस्ववृत्तिदुःखस्य, तद्वत्तेस्तत्रात्यन्ताभावविरोधात् तदभावस्य स्वतःसिद्धत्वात् अतीतदुःखभावस्यानुद्देश्यत्वाच्च । नापि परकीयदुःखात्यन्ताभावसम्बन्धः, तस्य स्वतःसिद्धत्वात् । अपि च दुःखसाधनध्वंसस्य नात्यन्ताभावसम्बन्धत्वे मानम् । दुःखसाधनध्वंसादावस्य दुःखस्यात्यन्ताभाव इति बुद्धिव्यपदेशौ स्त इति चेन्न । तस्य समानाधिकरणदुःखाभावविषयत्वेनाप्युपपत्तावतिरिक्तसम्बन्धाविषयत्वात् । एतेन सर्व्वदुःखप्रागभावसंबन्धाभावो मुक्तिः, घटादेश्च न मुक्तत्वं दुःखसाधनध्वंसविशेषितैतद्योगिनो मुक्तपदार्थत्वात् तथैव व्यवहारात् योगरूढिभ्यां पङ्कजादिपदवाच्यत्ववदिति परास्तम् । प्रागभावसंसर्गाभावस्य स्वतोऽनुद्देश्यत्वात् प्रत्युतात्यन्ताभावस्यासाध्यत्वेन ध्वंसरूपत्वेन तस्य दुःखरूपतया हेयत्वात् ।

(प्र०का०) ननु विशिष्टं नार्थान्तरं किन्तु विशेषणात्मकमेव । तत्र विशेषणस्य स्वतःपुरुषार्थत्वाभावाद्विशेष्यस्यासाध्यत्वात्तदुभयसम्बन्धस्यासाध्यत्वात्तदुभयसम्बन्धस्यापि तदुभयात्मकत्वेनोक्तदोषतादवस्थ्यान्नोक्तपक्षः क्षोदसह इत्याशयेनाह-*अधर्म्मादीति* । तावदित्यादिनेति शेषः । *योगेति* । पङ्कत्वपङ्कजनिकर्तृत्वोभयविशिष्टे यथा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



पङ्कजपदप्रयोगो योगादिना तथोक्तोभयविशिष्टे रूढ्यैव मुक्तपदप्रयोग इत्यर्थः॥

(चि०) प्राभाकरास्तु आत्यन्तिकदुःखप्रागभावो मोक्षः। न च तस्यानादित्वेनापुरुषार्थत्वम्, कदाचित् कृत्यनपेक्षत्वेऽपि प्रतियोगिजनकाधर्म्मनाशमुखेन तस्य कृतिसाध्यत्वात्, कृत्यधीनतत्त्वज्ञानादधर्म्मनाशे सत्यग्रिमसमये दुःखप्रागभावस्वरूपं नास्ति। तथा च विनाऽधर्म्मेण दुःखाजननान्न तत्प्रागभावस्वरूपमस्तीति घटवत् कृतिसाध्यत्वात्। व्यवस्थापितश्च त्वया प्रागभावस्य कृतिसाध्यत्वमहिकण्टकादिनाशप्रायश्चित्तचेमार्थिप्रवृत्तिस्थले। न चैवं युगपदधर्म्मध्वंस एव मुक्तिः प्रागभावस्यानादितया विवक्षितविवेकेन तत्रैव कृतिसाध्यत्वपर्य्यवसानादिति वाच्यम्। अधर्म्मध्वंसस्य स्वतोऽपुरुषार्थत्वात्, दुःखानुत्पादहेतुत्वेनैव तस्य प्रयोजनता वाच्या, सा च कथमसाध्यत्वे प्रागभावस्य स्यादिति। अत एव 'दुःखजन्मप्रवृत्तिदोषे'त्यादि (गौ०१अ०१आ०२) सूत्रमपि सङ्गच्छते। अन्यथा मिथ्याज्ञानाद्यनुत्पादानां दुःखानुत्पादाहेतुत्वेनासङ्गतं स्यादित्यास्थिषत।

तदतिस्थवीयः। तथा ह्यस्तु प्रागभावस्य साध्यत्वं तथापि तस्य प्रतियोगिजनकत्वानियमात् मुक्तस्यापि दुःखोत्पादप्रसङ्गः। अधर्म्मशरीरादिसहकारिविरहान्न दुःखोत्पाद इति चेत्, तर्हि उत्तरावधिविधुरत्वेनानादेरत्यन्ताभावत्वापत्तौ प्रागभावत्वव्याकोपः। प्रतियोगिजनकनाश्यजातीयत्वेन तत्र प्रागभावत्वव्यपदेशो वस्तुतो नित्य एव स इति चेन्न। नित्यत्वेनात्यन्ताभावरूपतया प्रागभावान्यत्वेन नाशजातीयत्वाभावात् प्रतियोगिजनकत्वनाशमुखेन तस्यासाध्यत्वाच्च। अपि च मुक्तेः प्रागभावस्य समाना-



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



धिकरणं भावि दुःखं न प्रतियोगि, तस्याभावात्, भावे वाऽमुक्तत्वापातात । नापि समानाधिकरणमतीतं वर्त्तमानश्च, तत्प्रागभावस्य विनष्टत्वात् । नापि व्यधिकरणम्, अन्यवृत्तिदुःखस्यान्यत्रात्यन्ताभावेन प्रागभावाभावात् तस्य प्रतियोगिसमानदेशत्वात् । न च दुःखमात्रं प्रतियोगि, स्वपरावृत्तेर्दुःखमात्रस्याप्रामाणिकत्वात् तस्यात्यन्तासतो नित्यानिवृत्तत्वेन तन्निवृत्तये प्रेक्षावत्प्रवृत्त्यनुपपत्तेः। अहिकण्टकादिनाशप्रायश्चित्तादिसाध्यदुःखप्रागभावस्य कलञ्जभक्षणप्रागभावस्य च समानाधिकरणमेव भावि दुःखं भक्षणश्च प्रतियोगि ।

ननु दुःखाभावो न पुरुषार्थः सुखस्यापि हानेस्तुल्यायव्ययत्वात् । न च बहुतरदुःखानुविद्धतया सुखस्यापि प्रेक्षावद्धेयत्वम्, आवश्यकत्वेन दुःखस्यैव हेयत्वात् सुखस्य निरुपधीच्छाविषयत्वात्, अन्यथा दुःखाननुविद्धतया तथात्वेन पुरुषार्थत्वविरोधादिति चेत् । न, सुखमनुद्दिश्यापि दुःखभीरूणां दुःखहानार्थं प्रवृत्तिदर्शनात् दुःखाभावस्य स्वत एव पुरुषार्थत्वात् । नहि दुःखाभावदशायां सुखमस्तीत्युद्दिश्य दुःखाभावार्थं प्रवर्त्तते । वैपरीत्यस्यापि सम्भवे सुखस्याप्यपुरुषार्थत्वापत्तेः । अतो दुःखाभावदशायां सुखं नास्तीति ज्ञानं न दुःखाभावार्थिप्रवृत्तिप्रतिबन्धकम् । तस्मादविवेकिनः सुखमात्रलिप्सवो बहुतरदुःखानुविद्धमपि सुखमुद्दिश्य "शिरो मदीयं यदि यातु यात्विति" कृत्वा परदारादिष्वपि प्रवर्त्तमानाः "वरं वृन्दावनेऽरण्ये" इत्यादि वदन्तो नात्राधिकारिणः । ये च विवेकिनोऽस्मिन् संसारकान्तारे कियन्ति दुःखदुर्दिनानि कियती सुखखद्योतिकेति कुपितफणिफणामण्डलच्छायाप्रतिममिदमिति मन्यमा-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



नाः सुखमपि हातुमिच्छन्ति तेऽत्राधिकारिणः । न च भोगार्थिनामप्रवृत्तौ पुरुषार्थता हीयते, कस्यचिदप्रवृत्तावपि चिकित्सादेः पुरुषार्थत्वात् ॥

(प्रका०) *अत एवेति* । अनुत्पादस्य साध्यत्वादेवेत्यर्थः । *प्रतियोगीति* । प्रतियोगिजनकनाश्यः प्रागभावः तन्नाशस्य प्रतियोगिरूपत्वात्तज्जातीयत्वेनेत्यर्थः । यत्तु प्रतियोगिजनकत्वेन प्रतियोगिनाश्यत्वेनेत्यर्थ इति । तन्न । तन्नाश्यत्वं हि तज्जन्यनाशप्रतियोगित्वम् । न च प्रागभावनाशः प्रतियोगिजन्यः । *अभेदे तदनुपपत्तेरिति* । *प्रायश्चित्तसाध्य इति* । प्रायश्चित्तप्रयोज्य इत्यर्थः । कलञ्जः करण इति प्रसिद्धः पक्षिविशेष इत्याहुः । शुष्कमांसमित्यपरे । तथापि तुल्यायव्ययत्वं न समाहितमित्युपसंहरति *तस्मादिति* । तथा च विवेकिनं प्रति न तुल्यायव्ययत्वमिति भावः । *कस्यचिदिति* । अन्यथा मुमुक्षुप्रवृत्त्यभावे सुखमपि पुरुषार्थो न स्यादिति भावः ॥

(चि०) अथ,—

दुःखाभावोऽपि नावेद्यः पुरुषार्थतयेष्यते ।
न हि मूर्च्छाद्यवस्थार्थं प्रवृत्तो दृश्यते सुधीः ॥

पुरुषार्थत्वे सुखवज्ज्ञायमानत्वनियमात्, न च मुक्तिज्ञानं सम्भवतीति चेत् । नहि दुःखाभावं जानीयामित्युद्दिश्य प्रवृत्तिः, किन्तु दुःखं मे मा भूदित्युद्दिश्येत्यतो दुःखाभाव एव पुरुषार्थः । तस्य ज्ञानन्तु स्वकारणाधीनं, न तु पुरुषार्थतोपयोगि, सुखी स्यामित्युद्दिश्य प्रवर्त्तते, न तु सुखं जानीयामिति सुखमेव तथास्तु न तु तदवगमः तस्यावश्यकत्वेनान्यथासिद्धत्वात् गौरवाच्च । किञ्च बहुतरदुःखजर्जरकलेवरा दुःखाभावमुद्दिश्य मरणेऽपि प्रवर्त्तमाना दृश्यन्ते । न च मरणे तस्य ज्ञानमस्ति । न ते विवेकिन इति चेन्न । पुरुषार्थत्वे विवेकानुपयोगात् । किञ्च चरमदुःखानुभवेऽनागतदुःखध्वंसोऽपि विषयः, तथा चाग्रिमक्षणे तदुपरमः(१) तद्विषयकञ्च विनश्यदवस्थं ज्ञानमस्तीति

(१) तद्ध्वंस इति पाठान्तरम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



वर्त्तमानमप्यचिरमनुभूयते। ज्ञानसमयं मुक्तिलक्षणस्य सत्त्वात् ज्ञानं मुक्तिविरोधि । प्रमाणन्तु-दुःखत्वं देवदत्तदुःखत्वं वा स्वाश्रयासमानकालीनध्वंसप्रतियोगिवृत्ति कार्यमात्रवृत्तिधर्म्मत्वात् सन्ततित्वाद्वा एतत्प्रदीपवत्। सन्ततित्वञ्च नानाकालीनकार्य्यमात्रवृत्तिधर्म्मत्वम्। एवञ्च सुखत्वादावपि साध्यं, तेन समूलोच्छेदे मोक्षः। न चाप्रयोजकत्वम्, सन्तत्युच्छेदे मूलोच्छेदस्य प्रयोजकत्वात्। प्रकृते च मिथ्याज्ञानस्य संसारमूलस्य श्रवणादिक्रमेणोत्पन्नतत्त्वज्ञानान्निवृत्तिः सम्भवत्येव। "आत्मा ज्ञातव्यो न स पुनरावर्त्तत इति" श्रुतिस्तत्र प्रमाणम्। रात्रिसत्रन्यायेनार्थवादोपनीतापुनरावृत्तेरधिकारिविशेषणत्वात्। स आत्मज्ञो न पुनरावर्त्तते न पुनः शरीरी भवतीत्यर्थः। "आत्मा वा अरे श्रोतव्यो निदिध्यासितव्यः (साक्षात् कर्त्तव्यः)" इत्युपक्रम्य "दुःखेनात्यन्तं विमुक्तश्चरतीति" श्रुतिश्च मानम्।

(प्रका०) नन्वस्तु तज्ज्ञानमित्यत आह *नचेति*। शरीराद्यभावादिति भावः। *पुरुषार्थत्व इति*। निरुपाधिच्छाविषयत्वस्य तथाप्यनपायादिति भावः। *अनागतेति*। योगजधर्मबलादिति भावः। *मुक्तिलक्षणस्येति*। पूर्वोक्तस्येत्यर्थः। अशेषविशेषगुणोच्छित्तिस्तु न लक्षणं येन ज्ञानं मुक्तिविरोधि स्यादिति भावः। ननु देवदत्तदुःखत्वं न पक्षतावच्छेदकमुक्तहेतुद्वयस्य दुःखत्वे व्यभिचारात्प्रत्येकं मुक्तिरपि न सिद्ध्येदित्याशयेन सर्वमुक्तिं साधयन्नाह—*दुःखत्वमिति*। *स्वाश्रयेति*। स्वाश्रयत्वावच्छिन्नासमानकालीनेत्यर्थः। द्रव्यत्वादौ व्यभिचारादाह मात्रेति। यद्यपि ध्वंसत्वे व्यभिचारः स च भावकार्यविवक्षायां परिहर्तुं शक्यः, तथापि यथाश्रुतेऽपरितुष्यन्नाह—*सन्ततित्वाद्वेति*। नन्वत्रापि दोषतादवस्थ्यमत आह सन्ततित्वं चेति। नानाकालः पूर्वोत्तरकालः, ध्वंसे च नोत्तरकालस्तस्यानन्तत्वात्, तथा च ध्वंसप्रतियोगिमात्रवृत्तिधर्मत्वादित्यत्र तात्पर्यम्। *एवमिति*। न च ज्ञानत्वादेः पक्षत्वे कार्यमात्रवृत्तित्वमसिद्धमिति वाच्यम्। जन्यज्ञानत्वादेः पक्षत्वात्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



*सन्तत्युच्छेद इति* । एवं चोपाधिशङ्कापि प्रत्युक्ता । *रात्रीति* । यथा "य एता रात्रीरुपयन्ति तस्य पितरो घृतकुल्यां मधुकुल्यां वा क्षरन्ती"त्यत्रार्थवादोपनीतं फलं तथाऽत्रापीत्यर्थः । *पुनः शरीरीति* । यद्यपि तत्त्वज्ञानवतोऽपि भोगार्थं शरीरं तथापि दोषानुपक्तशरीराभावात्तद्वान्न भवतीत्यर्थः । तत्त्वज्ञानहेतुत्वसिद्ध्यर्थमाह *इत्युपक्रम्येति* ।

(चि०) आचार्यास्तु–"अशरीरं वावसन्तं प्रियाप्रिये न स्पृशतः" इति श्रुतिस्तत्र मानम् । वावसन्तमिति षड्लुकि । तेन संसारदशायां क्षणमात्रमशरीरत्वेन नान्यथासिद्धिः । ननु द्वन्द्वस्वरसेन मिलितसुखदुःखोभय निषेधः प्रतीयते स तु नित्यवत् प्राप्त एव एकैकनिषेधे च वाक्यभेदापत्तिः, न च मुक्तौ प्रमाणमिति चेन्न । छित्वेकेन रूपेणोपस्थितयोः प्रत्येकं निषेधान्वयेऽपि वाक्यभेदाभावात्, धवखदिरौ छिन्धीत्यत्र प्रत्येकं छिदान्वयव, न हि तत्र मिलितछिदा । अपि च न प्रियाप्रियरूपं किञ्चिदस्तीति मिलितनिषेधोप्येकैकान्वये प्रत्येकाभावे सभवेत् तत्र एकैकान्वयस्याशरीरे योग्यत्वात् प्रत्येकाभाव एव पर्य्यवस्यति । अत एव सर्व्वमुक्तिरपि, सदुःखसन्ततिपक्षीकरणे तत्सिद्धेः अन्यथा मुक्तिरपि न स्यात् तत्रैव व्यभिचारात् । यदि चोभयात्मान एव केचित्तदा तच्छङ्कया मोक्षार्थं न काश्चित्प्रवर्त्तेत । शमदमभोगानभिष्वङ्गादिमुक्तिचिह्नेन श्रुतिसिद्धेन सन्देहनिवृत्तिरिति चेन्न । संसारित्वेन मुक्तियोग्यत्वात् न तु तद्विशेषशमादिमत्त्वेन सामान्ये बाधके सत्येव योग्यतया विशेषनिष्ठत्वात् । किञ्च शमादयः श्रुत्या मुक्तौ सहकारितया बोधिताः न तु योग्यतया, तत्त्वेऽपि संसारित्वेन तेऽपि साधनीयाः, शमादिकमपि हि कार्य्यं तत्रापि संसारित्वेनैव योग्यता सामान्ये बाधकाभावात् ।

(प्रका०) *तेनेति* । न चैवमपि खण्डप्रलयकालमादायान्यथासि-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



द्धिरिति वाच्यम्। मुक्तिप्रकरणाम्नातत्वेन तत्परत्वादित्याहुः। ननु यङन्तत्वे वावसतमिति स्यात्। नाभ्यस्ताच्छतुरिति नुम्निषेधात्। तथाच वावेति संबोधनम्। अतः क्षणमात्राशरीरत्वेनैवान्यथासिद्धिरिति। न। छान्दसत्वेनोपपत्तेः। एतदस्वरसादेवाचार्यास्त्वित्युक्तमित्यन्ये। *स चेति*। एकसत्वेपि मिलितनिषेधसम्भवान्न मुक्तौ प्रमाणत्वमिति भावः। श्रुतेः प्रत्येकमुक्तिपरतयाप्युपपत्तेः सर्वमुक्तावुक्तानुमानमेव शरणमित्याह—*अत एवेति*। अतएवेत्यस्य श्रुतिपरामर्शभ्रमं वारयति। *सर्वेति*। दुःखत्वपक्षीकरण इत्यर्थः ॥

(चि०) न च नित्यसुखाभिव्यक्तिर्मुक्तिः। सा हि न नित्या, मुक्तशरीरिणोरविशेषापातात्। नोत्पाद्या, तद्धेतुशरीराद्यभावात्, ज्ञानमात्रे सुखमात्रे वा तद्धेतुत्वावधारणात्। न च संसारदशायां तद्धेतुः, सामान्ये बाधकाभावात्। अत एव सर्गादौ शरीरकल्पना। किञ्च तज्जनकं न तावदात्ममनोयोगः, तस्यादृष्टादिनिरपेक्षस्याजनकत्वात्। विषयमात्रापेक्षणे तु संसारिदशायामपि तदभिव्यक्तिप्रसङ्गः। नापि योगजो धर्म्मः सहकारी, तस्योत्पन्नभावत्वेन विनाशित्वेऽपवर्गनिवृत्त्यापत्तेः। न च तज्जन्याभिव्यक्तिरनन्ता तस्या अपि तत एव नाशात्। अथ तत्त्वज्ञानात् रूढवासनामित्थाज्ञाननाशे दोषाभावेन प्रवृत्त्याद्यभावाद्धर्माधर्म्मयोरनुत्पादे प्राचीनधर्म्माधर्म्मक्षयाद्दुःखसाधनशरीरादिनाश एव तत्र हेतुः अत एव तस्यानन्त्येनाभिव्यक्तिप्रवाहोऽप्यनन्त इति चेन्न। शरीरं विना तदनुत्पत्तेः तस्य तद्धेतुत्वे मानाभावाच्च। न च मोक्षार्थप्रवृत्तिरेव तत्र मानम्, दुःखहानार्थितया तदुपपत्तेः। न च नित्ये सुखे मानमस्ति। "नित्यं विज्ञानमानन्दं ब्रह्म" "आनन्दं ब्रह्मणो रूपं तच्च मोक्षे प्रतिष्ठितमित्यादि" श्रुतिर्मानमिति चेन्न। उपजननापाय(१)वतोर्ज्ञानसुखयोरहं जानाम्यहं सुखीति भिन्नत्वेना-

(१) उत्पत्त्यपायेति प्रकाशकृदभिमतः पाठः।

CC-0. Panini Kanya Maha Vidyalaya Collection. Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



नुभूयमानयोर्ब्रह्माभेदबोधने प्रत्यक्षबाधात् ।

अथ सुखस्य ब्रह्माभेदबोधनादेवायोग्यतयाऽनित्यं सुखं विहाय वाक्यार्थत्वेन नित्यसुखसिद्धिः स्वर्गवत् न तु नित्यसुखे सिद्धे तदभेदबोधनं येनान्योन्याश्रयः । यद्वा नित्यं सुखं बोधयित्वा तदभिन्नं ब्रह्म बोध्यते न च वाक्यभेदः वाक्यैकवाक्यत्वादिति चेन्न । आत्मनोऽनुभूयमानत्वेन तदभिन्नस्य नित्यसुखस्याप्यनुभवप्रसङ्गात् सुखमात्रस्य स्वगोचरसाक्षात्कारजनकत्वनियमात् तदननुभवे वाऽऽत्मनोऽप्यनुभवो न स्यात् । अथात्माभिन्नं नित्यसुखमनुभूयत एव सुखत्वं तु तत्र नानुभूयत इति चेन्न । सुखानुभवसामग्र्या एव सुखत्वानुभावकत्वात् तस्मादानन्दं ब्रह्मेति मत्वर्थीयाच्प्रत्ययान्तत्वेनानन्दवत्त्वं बोध्यं तेनाभेदः, अन्यथा नपुंसकलिङ्गत्वानुपपत्तेः ।

( प्रका० ) लीलावतीकारमतं निरस्यति । *नचेति* । नित्यसुखस्याभिव्यक्तिरित्यर्थः । सुखमात्रे वेति दृष्टान्तार्थमुक्तम् । अस्यैवासिद्धिमाशंक्याह *अत एवेति* । सुखमात्रस्य शरीरजन्यत्वादेवेत्यर्थः । *उत्पत्त्यपायेति* । इदानीमुत्पन्नं सुखमित्यनुभवबलादिति भावः । *अभिन्नत्वेनेति* । अभेदे तद्वत्तानुपपत्तेरिति भावः ।

बाधस्य विशेषविषयत्वेन सामान्यतो योग्यतासंशयसत्त्वादन्वयः स्यादित्याह—*अथेति* । *स्वर्गवदिति* । अन्यथाऽस्मदादिसुखस्य दुःखसम्भिन्नत्वनिश्चयाद्बाधापत्तेरिति भावः । उक्तयुक्त्या प्रथममपि नित्यसुखसिद्धिः सम्भवत्येवेति नान्योन्याश्रय इत्यरुचेराह *यद्वेति* । श्रुतिविरोधं निरस्यति *तस्मादिति* । *अन्यथेति* । यद्यपि छान्दसत्वेन लिङ्व्यत्ययः सम्भवी तथाप्युक्तयुक्त्या तयोर्भेदे तद्वत्त्वपरतैवेति भावः ॥

(चि०)एतेन ब्रह्माद्वैततत्त्वसाक्षात्कारादविद्यानिवृत्तौ विज्ञानसुखात्मकः केवल्यात्माऽपवर्गे वर्त्तत इति वेदान्तिमतमपास्तम् । स्वप्रकाशसुखात्मकब्रह्मणो नित्यत्वेन मु-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



क्तसंसारिणोरविशेषप्रसङ्गात् पुरुषप्रयत्नं विना तस्य सत्त्वादपुरुषार्थत्वाच्च । अविद्यानिवृत्तिः प्रयत्नसाध्येति चेत् । अविद्या यदि मिथ्याज्ञानमर्थान्तरं वा, उभयथापि सुखदुःखाभावतत्साधनेतरत्वेन तन्निवृत्तेरपुरुषार्थत्वात् ।

त्रिदण्डास्तु आनन्दात्मकपरमात्मनि जीवात्मलयो मुक्तिः । लयश्च लिङ्गशरीरापगमः । लिङ्गशरीरञ्चैकादशेन्द्रियाणि पञ्च महाभूतानि सूक्ष्ममात्रया सम्भूयावस्थितानि जीवात्मनि सुखदुःखावच्छेदकानीत्याहुः ।

तन्न । लिङ्गशरीरध्वंसस्य स्वतो दुःखसाधनाभावतयाऽपुरुषार्थत्वात् । न चोपाधिशरीरनाशे ह्यौपाधिकजीवनाशो लयः, स्वनाशस्यापुरुषार्थत्वात् ब्रह्मणो नित्यत्वेन तदभिन्नस्य नाशानुपपत्तेः भेदाभेदस्य विरोधेनाभावात् ।

नाप्यनुपप्लवा चित्तसन्ततिरपवर्गः आवश्यकत्वेनानुपप्लवस्य दुःखाभावस्य पुरुषार्थत्वे चित्तसन्ततेरपुरुषार्थत्वात् शरीरादिकारणं विना चित्तसन्ततेरनुत्पादाच्च । न हि चित्तमात्रं तत्सामग्री, शरीरादिवैयर्थ्यापत्तेः । नापि दुःखत्वेनात्महानमेव मुक्तिः, सुखदुःखाभावेतरत्वेनापुरुषार्थत्वात् ज्ञानरूपात्महानस्यायत्नसिद्धेरतिरिक्तहानस्याशक्यत्वात् ।

यत्तु योगर्द्धिसाध्यनिरतिशयानन्दमयीं जीवन्मुक्तिमुद्दिश्य प्रवृत्तेः कारणवशादात्यन्तिकदुःखाभावरूपां मुक्तिमासादयतीति मतम् । तन्न । परममुक्तेरपुरुषार्थतापत्तेः विरक्तस्य मोक्षेऽधिकारात् सुखोद्देशेनाप्रवृत्तेश्च ॥

( प्रका० ) एकदण्डिमतं निरस्यति *एतेनेति* । *तत्साधनेति* यद्यपि मिथ्याज्ञाननिवृत्तिस्तत्त्वज्ञानव्यापारतया दुःखाभावसाधनमेव, तथापि दुःखाभावस्य मोक्षत्वेनानभ्युपगमान्मुमुक्षूणां तदर्थतया प्रवृत्तिस्तन्मते न स्यादित्याशयः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



ननु लयः संयोगो विनाशो वा विभुत्वनित्यत्वाभ्यामसम्भवतीति व्याचष्टे *लयश्चेति*। तथाच जीवात्मलय इत्यस्य जीवात्मसम्बन्धिलिङ्गशरीरध्वंस इत्यर्थः। लिङ्गशरीरमेव किमित्यत आह—*लिङ्गेति*। चक्षुरादीनि ज्ञानेन्द्रियाणि षट्, वाक्पाणिपादपायूपस्थात्मकानि पञ्च कर्मेन्द्रियाणीत्येकादशेन्द्रियाणीति। *सूक्ष्मेति*। किञ्चित्तन्मात्रवा शरीरभावेनावस्थितानीत्यर्थः।

उक्तव्याख्यायामानन्दमयपरमात्मनीत्यलग्नकमेवेति दोषे सत्येवाह *लिङ्गेति*। *दुःखसाधनेति*। अहिकण्टकादिध्वंसस्यानागतदुःखप्रागभावप्रयोजकतया प्रयोजनत्वम्। न च दुःखप्रागभावो मुक्तस्येति न तस्य प्रवृत्त्यङ्गत्वमिति भावः।

मुक्तेः—परममुक्तेः। इष्टापत्तिमाशंक्याह *विरक्तस्येति*। स च दुःखाभावमुद्दिश्य प्रवर्त्तते न सुखोद्देशेनेति तस्य स एव पुरुषार्थ इति भावः॥

(चि०) मोक्षे च सर्वाश्रमिणामधिकारः आश्रमचतुष्टयमुपक्रम्य "स ब्रह्मसंस्थोऽमृतत्वमेतीति" श्रुतेः, सङ्कोचे(१) कारणाभावात्, आकाङ्क्षाया अविशेषेणानन्तर्यस्याप्रयोजकत्वात्। कथन्तर्हि "मोक्षाश्रमश्चतुर्थो वै योभिक्षोः परिकीर्त्तितः" इति प्रव्रज्यां मोक्षाश्रममाहुः, गृहस्थस्य च पुत्रदारादिसङ्गो दुर्वार इत्यसाधारण्येन तथोपदेशात् "तत्त्वज्ञाननिष्ठो गृहस्थोऽपि हि मुच्यत" इत्यागमाच्च। एवं स्थिते मोक्षमुपक्रम्य "आत्मा वा अरे श्रोतव्यो मन्तव्यो निदिध्यासितव्यः (साक्षात् कर्त्तव्यः)" इति श्रुतिः, श्रुतिभ्यश्च शरीरादिभिन्नमात्मानमवधार्य शास्त्रेण पदार्थान् विविच्य तद्बोधितोपपत्तिभिस्तस्य स्थिरीकरणरूपं मननं विदधाति। न च शब्दोपपत्तिजन्यतत्त्वज्ञानात् साक्षात्कारिसंसारबीजसवासनमिथ्याज्ञाननिवृत्तिः, दिङ्मोहादौ तथानुपलब्धेः। अतः श्रुति-

(१) मानाभावादिति पाठान्तरम्।
(२) संशयकस्यात पाठान्तरम्।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



स्मृत्युदितविधिना चिरनिरन्तरादरसेवितनिदिध्यासन-
जन्ययोगजधर्मादात्मतत्त्वसाक्षात्कारं संसारबीजस-
वासनमिथ्याज्ञानोन्मूलनसमर्थमासाद्य दोषाभावात् प्र-
वृत्त्यादेरभावेऽनागतधर्माधर्मानुत्पादेऽनादिभवसञ्चितक-
र्मणां भोगेन क्षयादपवृज्यते। उपदेशमात्राच्छरीरभि-
न्नात्मावगमेऽप्यन्यपरत्वशङ्क्या सङ्कास्मूकस्य नाऽश्रद्धा-
मलक्षालनमिति मननमावश्यकम्। तथा च "मन्तव्यश्चोप-
पत्तिभिरिति" श्रुतिरेवोपपत्तिबोधकस्य शास्त्रस्यापव-
र्गहेतुत्वं बोधयति मननस्य तदेकसाध्यत्वात्। एवञ्च
शमदमब्रह्मचर्याद्युपबृंहितयावन्नित्यनैमित्तिकसन्ध्योपा-
सनादिकर्मसहितात्तत्त्वज्ञानान्मुक्तिः।

(प्रका०) प्रसङ्गादाह *मोक्षे चेति*। ननु "ब्रह्मचारी गृहस्थश्च वान-
प्रस्थो यतिस्तथे"त्युपक्रम्य "स ब्रह्मसंस्थो अमृतत्वमेतीति" श्रुत्या
यतेरेवाधिकारबोधनम्, अव्यवहितानन्तर्येण तस्यैव तत्पदेन परामृ-
शादित्यत आह *आकाङ्क्षाया इति*। आनन्तर्यस्य-अव्यवहितानन्त-
र्यस्य। बाधकं विना सङ्कोचानुपपत्तेरिति भावः। *कथमिति*।
तथाच एतद्बलादेव सङ्कोच इति भावः। नन्वेतदेव कथमित्यत आह
*तत्त्वज्ञानेति*। एवंस्थिते मननं विदधातीत्यन्वयः। गृहस्थादिरपीति
शेषः। *इतिश्रुतिरिति*। इत्यादिश्रुतिरित्यर्थः। शरीराद्भिन्नमित्युपल-
क्षणम्। इष्टसाधनीभूतमननसाधनं चेत्यपि द्रष्टव्यम्। इतरभिन्नत्वानुमि-
तौ प्रतियोगिज्ञानद्वारा शास्त्रोपयोगं दर्शयति *शास्त्रेणेति*। उपपत्ति-
बोधाद्वापि तदुपयोगमाह-*तथाचेति*। ज्ञानकर्मसमुच्चयवाद्याक्षिपति
*एवञ्चेति*। ज्ञानहेतुत्वाभ्युपगमे तथैव कर्मणोपि हेतुत्वमिति तुल्य-
वदुभयप्राधान्यमित्यर्थः। केचित्तु एवञ्च तत्त्वज्ञानमात्रं न प्रयोजकं
किन्तु प्राधान्येन कर्मणोऽपि तथात्वमित्यत आह *एवञ्चेति*। तथाच
सिद्धान्तग्रन्थ एवायम् ततस्तटस्थपूर्वपक्षे भ्रमकृते ज्ञानमात्रतन्त्रत्वपरे
परद्वारा निरस्ते सिद्धान्तावतार इत्याहुः॥

(चि०) स्यादेतत् ज्ञानकर्मणोर्न समप्राधान्येन स-
मुच्चयः कर्मणां स्ववाक्यात् फलान्तरार्थत्वेन श्रुतत्वा-
न्मोक्षार्थकल्पनाविरोधात् तत्त्वज्ञानस्य कर्मनैरपेक्षेण

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



मुक्तिहेतुत्वप्रतीतेश्च । नाप्यङ्गाङ्गिभावेन, तथा हि न कर्म सन्निपत्योपकारकम्, तत्त्वज्ञानशरीरानिर्वाहकत्वात् । नापि प्रयाजादिवदारादुपकारकम्, स्ववाक्यत एव कर्मणां प्रयोजनलाभेन फलवत्सन्निधावफलत्वाभावात् । उपपत्तिविरुद्धश्च ज्ञानकर्मसमुच्चयः काम्यनिषिद्धयोस्त्यागात्(१)। नाप्यसङ्कल्पितफलवत्काम्यकर्मसमुच्चयः, चतुर्थाश्रमविधिविरोधात् । अत एव न यावन्नित्यनैमित्तिकसमुच्चयोऽपि । नापि यत्याश्रमविहितेन कर्मणा, तत्त्वज्ञाने सति गृहस्थस्यापि मुक्तेः,—

न्यायागतधनस्तत्त्वज्ञाननिष्ठोऽतिथिप्रियः ।
श्राद्धकृत् सत्यवादी च गृहस्थोऽपि हि मुच्यते ॥

इति स्मृतेः ।

नचाऽननुगतमपि साधनम्, स्वर्गवदपवर्गे प्रकारभेदाभावात् । न चापवर्गार्थिकर्त्तव्यतया विहितानि कर्माणि, येन तत्समुच्चयः स्यात् । "संन्यस्य सर्वकर्माणीति" स्मृतेः "सर्वकर्मसंन्यासो ज्ञानमात्राच्च मोक्ष इति ।

मैवम् । स्वस्वाश्रमविहितेन कर्मणा ज्ञानस्य समप्राधान्येन समुच्चयात् ज्ञानकर्मणोस्तुल्यत्वेन मुक्त्यर्थत्वाभिधानात् । तथा च भगवद्गीता—

स्वे स्वे कर्मण्यभिरतः संसिद्धिं लभते नरः ।
स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः ॥

श्रीविष्णुपुराणे—

तस्मात् तत्प्राप्तये यत्नः कर्त्तव्यः पण्डितैर्नरैः ।
तत्प्राप्तिहेतुर्विज्ञानं कर्म चोक्तं महामते ! ॥

हारीतः—

उभाभ्यामेव पक्षाभ्यां यथा खे पक्षिणां गतिः ।

(१) रभावादिति पाठान्तरम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



तथैव ज्ञानकर्मभ्यां प्राप्यते ब्रह्म शाश्वतम् ॥

श्रुतिश्च-"सत्येन लभ्यस्तपसा ह्येष आत्मा सम्यग् ज्ञानेन ब्रह्मचर्येणेति"। एतन्मूलकमेव—

परिज्ञानात् भवेन्मुक्तिरेतदालस्यलक्षणम् ।
कायक्लेशभयाच्चैव कर्म नेच्छन्ति पण्डिताः ॥

ज्ञानं प्रधानं न तु कर्महीनं कर्म प्रधानं न तु बुद्धिहीनम् ।
तस्मात्तयोरेव भवेत् प्रसिद्धिर्न त्वेकपक्षो विहगः प्रयाति॥

न च फलान्तरार्थत्वेन श्रुतस्य कर्मणः फलान्तरार्थत्वमनुपपन्नम्, तथा वाक्यस्वरसात् ज्ञानतुल्यताप्रतीतेः॥ तस्मात्फलजनकत्वेऽपि कर्मणां शब्द एव मानमेवमन्यत्रापि। अथ वा(१) आरादुपकारितया अङ्गाङ्गिभावेन समुच्चयः, स च प्रयाजादिवत् अपूर्वद्वारैव । यत्तु जड़भरतोपाख्याने—

न पपाठ गुरुप्रोक्तां कृतोपनयनः श्रुतिम् ।
न ददर्श च कर्माणि शास्त्राणि जगृहे न च ॥

तद् योगिधर्मसङ्गत्यागार्थं जातिस्मरत्वेन न शिक्षितानीत्येवं परं वा। तदुक्तं "जज्ञे जातिस्मरो द्विजः सर्वविज्ञानसम्पन्नः सर्वशास्त्रार्थतत्त्ववित्" इति।

(प्रका०) संनिपत्योपकारित्वं यदि तत्त्वज्ञानसहकारितया मुक्तिहेतुत्वं तदा नाङ्गाङ्गिभावः, किन्तु समप्राधान्यमेव तच्च दूषितमेवेति प्रधानीभूतशरीरनिष्पादकत्वमेव तद्वाच्यम्, एवंसत्याह *तत्त्वज्ञानेति*। *नापीति*। असङ्कल्पितफलमभिलाषाविषयफलं, काम्यं कामनापूर्वकं कृतं नित्यश्राद्धादि तत्समुच्चय इत्यर्थः। *चतुर्थेति*। तस्य काम्यमात्रस्यैव निषेधादित्यर्थः।

*द्वयोरेवेति*। ज्ञाने कर्मणि च सतीत्यर्थः। प्रसिद्धिः-प्रकृष्टा सिद्धिः मुक्तिरित्यर्थः। *भवतु वेति*। न च फलान्तरार्थत्वेनाङ्गत्वानुपपत्तिः न ह्यतिरिक्तफलत्वेनैवाङ्गत्वक्षतिः, किन्तु प्रधानातिरिक्तमुख्योद्देश्य

(१) भवतु वेति पाठान्तरं प्रकाशकृन्मतम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



फलवत्त्वेन, अन्यथा विघ्नध्वंसफलकमङ्गलस्य ग्रन्थाङ्गत्वं न स्यादिति भावः । *जातिस्मरत्वेनेति* । तत्सर्वं पूर्वकृतमेव कर्म स्मृत्वा न शिक्षितवानित्यर्थः ।

( चि० ) अत्र केचित् । अनुत्पन्नतत्त्वज्ञानस्य ज्ञानार्थिनस्तत्प्रतिबन्धकाधर्मनिवृत्तिद्वारा प्रायश्चित्तवदारादुपकारकं कर्म, सन्निपत्योपकारकं तु तत्त्वज्ञानम् । उत्पन्नतत्त्वज्ञानस्य तु अन्तरालब्धवृष्टेः कारीरीसमाप्तिवदारब्धाश्रमपरिपालनं लोकसङ्ग्रहार्थम् । यदपि लोकसंग्रहो न प्रयोजनं सुखदुःखाभावतत्साधनेतरत्वात्, तथाप्यकरणे लोकानां विगानान्निन्द्यत्वेन यज्ज्ञानं तत्परिहारार्थं तत्कर्मसाध्यदुःखोत्पादनेनाधर्मक्षयार्थश्चेति । तन्न । तत्त्वज्ञानं प्रत्यङ्गत्वपक्षे कर्मणामपूर्वद्वारा जनकत्वं दुरितध्वंसकल्पनातो लघुत्वात्, तस्माद् यानि कर्माण्युपनीतमात्रकर्त्तव्यत्वेन विहितानि सन्ध्योपासनादीनि तानि मोक्षार्थिभिरवश्यं कार्य्याणि, तत्परित्यागस्य प्रत्यवायहेतुत्वेनाशास्त्रीयत्वात् सङ्कोचे मानाभावात् । निषिद्धानि काम्यानि च बन्धहेतुत्वात् मुक्तिपरिपन्थीनीति त्यज्यन्ते । धनमूलानि च धनत्यागादेव त्यज्यन्ते । सोऽयं "संन्यस्य सर्वकर्माणि" इत्यस्यार्थः । अयमेव हि संन्यासपदार्थः, तथा च गीता—

काम्यानां कर्मणां न्यासं संन्यासं कवयो विदुः।
नियतस्य तु संन्यासः कर्मणो नोपपद्यते ।
मोहात्तस्य परित्यागस्तामसः परिकीर्त्तितः ॥ इति ॥

तत्त्वज्ञानं धर्मद्वारा मुक्तिसाधनं विहितत्वेन धर्मजनकत्वनियमादिति धर्मस्यैव प्राधान्यम् । स च धर्मो मुक्त्यैव फलेन नाश्यते इति केचित् । तन्न । मिथ्या-

Digitized by Arya Samaj Foundation Chennai and eGangotri



ज्ञाननिवृत्त्या दृष्टद्वारेणौपपत्तावदृष्टकल्पनानवकाशात्, अन्यथा भेषजादिष्वपि तथा स्यात्। एवञ्च तत्रैव विहितत्वस्य व्यभिचारः।

अत्र वदन्ति। संसारकारणोच्छेदक्रमेण कार्य्योच्छेदान्मोक्षः। एवञ्च तत्त्वज्ञानमात्रादेव मिथ्याज्ञानोच्छेदादपवर्गः तत्र न तस्य कर्मसहकारित्वम्, मिथ्याज्ञानोन्मूलने कर्म्मविनाकृतस्यैव तस्य दिङ्मोहादौ हेतुत्वावधारणात्। कर्मणामपवर्गहेतुताश्रुतिश्च तत्त्वज्ञानद्वाराप्युपपद्यते साक्षात्तस्याश्रुतेः। तत्त्वज्ञानवतश्चाधिकारे नित्याकरणेऽपि दोषाभावेन प्रत्यवायाभावोपपत्तेः, अन्यथा भोगार्थं विहितनिषिद्धाचरणेन धर्माधर्मोत्पत्तौ मोक्षाभावप्रसङ्गः।

(प्रका०) आचार्यमतमाह *अत्रेति*। *संनिपत्येति*। कर्मापेक्षया सन्निधायोपकारकमित्यर्थः। 'ननु जनेनावमतो योगी'त्यादिना तस्य तत्त्याज्यमित्यरुचेराह *तत्कर्मसाध्येति*। *अपूर्वद्वारेति*। प्रायश्चित्ते तु पापनाशफलश्रुतेस्तथात्वमिति भावः। समुच्चयवादी परमतं दूषयित्वा स्वमतमुपसंहरति *तस्मादिति*।

*अत्रेति*। नैयायिका इति शेषः। मात्रपदव्यवच्छेद्यं कर्ममात्रमित्याह *तत्रेति*। मिथ्याज्ञानोच्छेदे इत्यर्थः। तस्य-तत्त्वज्ञानस्य। *कर्मणामिति* "तं विद्याकर्मणी समारभेते, विद्या चैव तपश्चेत्यादि" श्रुतेश्चेत्यर्थः। यद्यपि तत्त्वज्ञानहेतुत्वमप्यदृष्टद्वारा, तथाच तद्द्वारा मुक्तिहेतुत्वमेवास्तु ज्ञानं प्रत्यपि हेतुत्वकल्पने गौरवात्,तथापि "तमेतं ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसा नाशकेनेत्यादि" श्रुत्या वेदनं प्रत्यपि यज्ञादेर्हेतुत्वसिद्धेः प्रामाणिकं गौरवमिति भावः। विपरीतान्न श्रुतिरित्याह *साक्षात्वस्येति*। दोषाभावेनेत्युपलक्षणं प्रागभावाभावेनेत्यपि द्रष्टव्यम्, अन्यथा प्रतियोग्युत्पत्तेरावश्यकत्वात्॥

(चि०) ननु तत्तत्तीर्थमहादानस्नानकाशीमरणादिकर्मणां तत्त्वज्ञाननैरपेक्ष्येण मुक्तिहेतुत्वं श्रूयते तत्कथं तत्त्वज्ञानमेव तद्धेतुः। न च तेषां तत्त्वज्ञानमेव व्या-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



पारः, अनुपदं तत्त्वज्ञानानुत्पादाददृष्टद्वारा तद्धेतुत्वं वाच्यम् तथा चापवर्गकारणमेवादृष्टं कल्प्यतां लाघवात् । न च तत्त्वज्ञानप्रतिबन्धकाधर्मनाश एव तेषां व्यापारः, प्रतिबन्धकदुरितध्वंसतोऽपूर्वस्य लघुत्वात् । अथ तत्तत्कर्मणामननुगमात् कथं मुक्तिरनुगता दुःखध्वंसे प्रकाराभावादिति चेन्न । गुणनाशे समवाय्यसमवायिनाशविरोधिगुणानां नाशकत्वदर्शनात् । तत्तन्नाशाविशेषे तु तत्तद्धेतुरिति चेत्, तर्हि तत्तद्दुःखध्वंसे तत्तत्कर्मणामपि तथात्वमस्तु, तवापि तत्त्वज्ञाने तत्प्रतिबन्धकदुरितध्वंसे चाननुगतानामेव तत्तत्कर्मणां जनकत्वं, मुमुक्षुमुद्दिश्य विहितत्वादनुगतमस्तीति चेत् ।

न । ज्ञानकर्मणोर्निरपेक्षसाधनताश्रवणाद् व्रीहियवबदविकल्प एव । निरपेक्षैकसाधनावरुद्धेऽपरसाधनान्वयो न विकल्पं विना सम्भवति आकाङ्क्षाविरहादिति न्यायात् । साहित्यबोधकं विनैकं प्रत्यनेकस्य हेतुता यत्र शब्देन बोध्यते तत्र विकल्पेनान्वयो यथा व्रीहियवयोरिति व्युत्पत्तेर्वा ।

(प्रका०) *नन्विति* । तथाच तृणारणिन्यायेन मोक्षविशेषे ज्ञानकर्मणोर्हेतुत्वमिति भावः । *लाघवादिति* । उभयहेतुकल्पने गौरवादिति भावः ।

संप्रदायमतेन समाधत्ते *ज्ञानकर्मणोरिति* । ननु नैरपेक्ष्यमपि न श्रूयत इत्यरुचेराह *साहित्यबोधकमिति* । "क्षौमे वसाना"वित्यादौ यत्कर्त्तव्यं तदनया सहेत्यादिसाहित्यबोधकमेवास्तीति भावः ॥

(चि०) वस्तुतस्तु दृढभूमिसवासनामिथ्याज्ञानोन्मूलनं विना न मोक्ष इत्युभयासिद्धम्, तादृशमिथ्याज्ञाननाशे चान्वयव्यतिरेकाभ्यां तत्त्वज्ञानकारणमवधारितमतो न तेन विना स इति तत्रापि तत्त्वज्ञानमावश्यकम् । यद्यपि मिथ्याज्ञाननाशे विरोधिगुणमात्रस्यैव तद्धेतुत्वम्, त-

CC-0. In Public Domain. Gurukul Kangri Coll

Digitized by Arya Samaj Foundation Chennai and eGangotri



थापि मिथ्याज्ञानप्रागभावासहवृत्तिमिथ्याज्ञानध्वंसस्य तदेकसाध्यत्वम् "आत्मा ज्ञातव्यः न स पुनरावर्त्तते" इत्यादिश्रुतेर्मोक्षं प्रति तत्त्वज्ञानस्य हेतुत्वावधारणात्। "तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयनायेति" श्रुत्या तत्त्वज्ञानं विना न मोक्षः किन्तु तस्मिन् सत्येवेति प्रतिपादनाच्च। अन्यथा स्वर्गादौ न शरीरादयः कल्प्येरन्, कर्म्मणां तत्त्वज्ञानद्वारापि मुक्तिजनकत्वसम्भवात्, प्रमाणवतो गौरवञ्च न दोषाय। कर्मणां तत्त्वज्ञानविशेष एव जनकत्वमतो न तत्राननुगमो दोषाय। वाराणसीमरणस्य तत्त्वज्ञानफलजनकत्वमागमादेवावगम्यते। तत्त्वज्ञानाददत्तफलान्येव कर्माणि प्रायश्चित्तादिव विनश्यन्ति अनन्यथासिद्धशब्दबलात्। न च प्रायश्चित्तस्य दुरितोत्पत्तिनिमित्तकत्वं, पापनाशफलश्रवणात्। अतएव न ब्रह्महत्यादीनां प्रायश्चित्तदुःखमेव फलम्, नरकफलश्रुतिविरोधात् प्रायश्चित्तविधिवैयर्थ्याच्च दुःखैकफलत्वेन तत्राप्रवृत्तेः। नापि कर्मान्तराधिकार एव फलम् महापातकातिरिक्तेऽनधिकाराभावात्। अन्यथा यत्किञ्चित्पापवतोऽकृतप्रायश्चित्तत्वेनानधिकारापत्तेः, प्राणान्तिके तदभावाच्च। श्रूयते हि—

भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः।
क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परात्मनि॥

स्मृतिश्च—

ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरुतेऽर्जुन!। इति॥

"नाभुक्तं क्षीयते कर्म्म" इत्यत्र च प्रायश्चित्तादिस्मृतितः सङ्कोचस्यावश्यकत्वेन शब्दबोधितनाशकानाश्यपरत्वं लाघवात् न तु तत्तदन्यकर्मपरत्वं गौरवात् पा-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



पपुण्यक्षयहेतूनां बहुतरत्वात् ज्ञानस्य नाशकत्वं शब्दबोध्यमित्युक्तम् ।

(प्रका०) ननु "नान्यः पन्था विद्यतेऽयनाये"त्यादिश्रुतिः प्रकृते साहित्यबोधिकैवेति न विकल्प इत्यरुचेराह *वस्तुतस्त्विति* । यद्यपि बाधकं विना सामान्यपरत्वमेव तथाप्युक्तश्रुतेर्विशेषपरत्वेनाप्युपपत्तेर्निःसन्दिग्धं प्रमाणमाह *तमेवेति* । तं विदित्वैवेत्यर्थः । तदेवाह *नान्य इति* अन्यस्तत्त्वज्ञाननिरपेक्षः । *अन्यथेति* । तथाच यथा सुखत्वावच्छेदेन तद्धेतुत्वकल्पनात्तत्र शरीरकल्पनं तथा मुक्तित्वावच्छेदेन लाघवात्तद्धेतुत्वकल्पनात्सर्वत्र तज्ज्ञानकल्पनापीति भावः । नन्वेवं कर्महेतुत्वबोधकश्रुतेः का गतिरित्यत आह *कर्मणामिति* । एवं पूर्वोक्तगौरवं निरस्यति *प्रमाणेति* । तवापीत्यादिप्रतिबन्दिमुद्धरति *तत्त्वदिति* । तृणारणिमणिन्यायादिति भावः । नन्वनादिकर्मराशेः क्षयानुपपत्तौ न मोक्ष इत्याशंक्य परमतं दूषयितुमुपन्यस्यति *तत्त्वज्ञानादिति* दृष्टान्तासिद्धिमाशङ्क्य निराकरोति *नन्वेति* ननु निषिद्धकर्मणां नरकफलकत्वाभावात्तदुपपादकतया पापस्यैवाभावात्कुतः प्रायश्चित्तस्य तन्नाशकत्वं ततः पुनरपि दृष्टान्तासिद्धिरित्यत आह *अत एवेति* । वक्ष्यमाणहेतोरित्यर्थः । *प्रायश्चित्तेति* । नन्वेतदेव कुत इत्यत आह—*दुःखेति* । *प्राणान्तिक इति* तत्र कर्मान्तराभावेन तदधिकारार्थितयाऽप्रवृत्तेरित्यर्थः । ननु शब्दबलादित्यसिद्धं तादृशशब्दाभावादित्यत आह *ऊयते इति* हृदयग्रन्थिः-मिथ्याज्ञानवासना, कर्म-अदृष्टं, तन्निबन्धनं-दोषः कर्माणि अदृष्टानीत्यर्थः । *शब्देति* । यदि च भोगोपि शब्दबोधितस्तदा तद्भिन्नत्वं नाशके विशेषणं बोद्धव्यम् ॥

(चि०) अथ भस्मसातपदस्य लाक्षणिकत्वेन यथा वह्नेः परम्परया भस्म तथा ज्ञानात् कर्मक्षय इत्यर्थः । तथा च "भोक्तुं क्षीयते कर्मेति" स्मृतिरुत्सर्गतो भोगेनैव क्षयमाह, अनन्यथासिद्धप्रायश्चित्तविधिना सा बाध्यते । ज्ञाननाश्यत्वञ्च(१) भोगद्वारापि सम्भवतीत्यबाधे सम्भवति न बाधकल्पना नेति चेन्न। कर्मणो भोगनाश्यत्वे ज्ञानस्यानाशकत्वात् । न हि भोगस्तत्त्वज्ञान-

(१) ज्ञानस्य नाशकत्वञ्चेति पाठान्तरम् ।

Digitized by Arya Samaj Foundation Chennai and eGangotri



व्यापारः, तथाऽश्रवणात् तेन विनापि कर्मण एव तदुपपत्तेश्चाकर्मणो भोगनाश्यत्वे तत्त्वज्ञानानुपयोगात्। यत्तु मामुक्तमिति स्मृतिविरोधेन क्षीयन्त इत्यादिश्रुतेरन्यथावर्णनम्। तन्न। स्मृतेः प्रत्यक्षवेदबाधितत्वेन तद्विरुद्धार्थकवेदाननुमापकत्वात्। वामदेवसौभरिप्रभृतीनां कायव्यूहश्रवणात्तत्त्वज्ञानेन कायव्यूहमुत्पाद्य भोगद्वारा कर्मक्षय इति चेन्न। तपःप्रभावादेव तत्त्वज्ञानानुत्पादेऽपि कायव्यूहसम्भवात्। भोगजननार्थश्च कर्मभिरवश्यं तत्तत्कायनिष्पादनमिति न तत्र तत्त्वज्ञानोपयोगः, यौगपद्यञ्च कायानां तज्जनककर्म्मस्वभावात् तपःप्रभावादू(१) वा। न च ज्ञानं भोगद्वारा कर्म्मनाशकमित्युक्तम्।

एतेनागमयोः परस्परविरोधादनिर्णये विमतिपदं कर्म्म भोगनाश्यं प्रायश्चित्ताद्यनाश्यत्वे सति कर्म्मत्वात् भुक्तभुज्यमानकर्म्मवदिति अनुमानान्निर्णय इत्यपास्तम्।

ज्ञानस्य प्रायश्चित्ततुल्यत्वेनाप्रयोजकत्वात् श्रुतिबाधितत्वाच्च। शब्दबोधितनाशकानाश्यत्वस्योपाधित्वाच्च अकृतप्रधानेन कृतप्रधानेन चाङ्गापूर्वेण व्यभिचाराच्च, तस्य प्रधानयागादिनाश्यत्वात्। न च तस्यापि यागस्येव स्वर्गफलकत्वमिति तन्नाश्यत्वमेव अधिकृताधिकारेपि स्वर्गकामस्याधिकारात् अन्यथा निष्फलेऽप्रवृत्तेरिति वाच्यम्। स्वर्गफलत्वेऽङ्गत्वविरोधात्। प्रवृत्तिश्च फलवद्यागान्विततया,(२) तदुक्तम्—"यागे रागादङ्गे वैधीति"।

ननु "तावदेवास्य चिरं यावन्न विमोक्ष्येऽथ सम्पत्स्यते कैवल्येनेति" श्रुतेस्तावदेवास्योत्पन्नतत्त्वज्ञान-

(१) स्वभावाद्वेति पाठान्तरम्। (२) द्यागार्थितयेति पाठान्तरम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



ण चिरं विलम्बो यावन्नोत्पन्नकर्मणो विमोक्षः, अथ संपत्स्यते कैवल्येनेति' अत्र भोगेन क्षपयित्वेति शेषः । न च शेषे मानाभावः, सत्यपि विज्ञाने कर्म्मावस्थाने क्लृप्तसामर्थ्यस्य भोगस्यैव नाशकत्वेनाक्षेपादिति चेन्न । तत्त्वज्ञाने सति तत्त्वज्ञानदशायां न मोक्षः किन्तु तदग्रिमक्षण इत्यर्थत्वेनाप्युपपत्तेः । यत्तु अकृतप्रधानाङ्गापूर्वाभिप्रायमेतद्–'ज्ञानाग्निः सर्वकर्माणी'त्यादि, तेषां कार्य्याणां नाशकान्तराभावादिति । तन्न । प्रधानार्थतया क्लृप्तानां तदभावे तत्सामग्र्यसिद्धेः तत्सत्त्वेऽपि सर्व्वकर्म्मपदस्य कर्म्मान्तरापरिग्राहकस्य सङ्कोचे मानाभावात् । यदपि भस्मसात्करणादिना फलाजनकत्वमुच्यते तत्त्वज्ञानात् कृतमपि विहितं कर्म न फलायेति, तथा च श्रुतिः "तद्यथा पुष्करपलाशे नापः श्लिष्यन्ते" इत्यादि । तदपि न । न हि भस्मसात्करणं क्षयश्रुत्युत्पत्तिरुच्यते, न च लक्षणा, मुख्ये बाधकाभावादिति । उच्यते । कर्मणो भोगनाश्यत्वेऽपि ज्ञानस्य कर्म्मनाशकत्वं भोगस्य तत्त्वज्ञानव्यापारत्वात् । न च भोगमात्रस्यैव कर्म्मनाशे सामर्थ्यात्तत्त्वज्ञानव्यभिचारः, कर्मप्रागभावासहवृत्तिकर्म्मनाशे युगपत्कर्मभोगे वाऽव्यभिचारात् । अत एवानुमानेनागमबाधाप्रयोजकत्वेन च श्रुतिवाक्यशेषे मानाभावः । उत्पन्नतत्त्वज्ञानस्यापवर्गविलम्बोपपादनार्थमुक्तरीत्या भोगस्यैवाक्षेपादिति । तदस्यापवर्गस्य परमपुरुषार्थस्य श्रुतिसिद्धकारणमनुमानं विविक्तमिति ॥

इति श्रीमहामहोपाध्याय गङ्गेशविरचिते तत्त्वचिन्तामणावनुमानाख्यद्वितीयखण्डे ईश्वरानुमानम् ॥

समाप्तश्च द्वितीयमनुमानखण्डम् ।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



(प्रका०) कीर्त्तनादिनापि तन्नाशादाह *उत्सर्गत इति*। *प्रायश्चित्तेति*। प्रायश्चित्तादिविधिनेत्यर्थः। *तप इति* तथाच तत्त्वज्ञानवतः कायव्यूहोऽसिद्ध एव तस्य ज्ञानेनैव कर्मक्षयादिति भावः। *तप इति*। पूर्वं कायव्यूहहेतुत्वमुक्तमिदानीं तद्योगपद्यमुक्तमित्यपौनरुक्त्यम् *विमतिपदमिति*। एतच्च प्रायश्चित्तनाश्यकर्मभोगे बाधासिद्धिवारणार्थम्। *ज्ञानस्येति*। तथाच ज्ञानानाश्यत्वमपि भोगनाश्यत्वे तन्त्रम्, अन्यथा कर्मत्वमात्रस्यैव तन्त्रतायां प्रायश्चित्तादिरपि तन्नाशको न स्यादिति भावः।

ननु कृतप्रधाने कथं व्यभिचारः। तत्र भोगसंभवेन तन्नाश्यत्वसंभवादित्यत आह *तस्येति*। याग आदिर्यस्य तदपूर्वं, तथाच प्रधानापूर्वनाश्यत्वादित्यर्थः। तस्य यागशरीरनिष्पादकतया तन्नाश्यत्वमेवेत्यप्याहुः। *अधिकृतेति*। अधिकृतस्याधिकारो यत्र तदधिकृताधिकारकमङ्गं तत्रेत्यर्थः। यागार्थितया-प्रधानापूर्वार्थितयेत्यर्थः। श्रुतिं योजयति *तावदेवेति*। *प्रधानेति* यद्यप्येवं तत्र प्रागुक्तव्यभिचारोद्भावनमयुक्तं तथाप्येतदनुशयादेव तत्र व्यभिचारान्तरोद्भावनमिति ध्येयम्। यद्वा नहि प्रयोजनसापेक्षा सामग्री कार्यं जनयति तथाच यत्र सामग्री तदुत्पत्तिसंभवात्, एतदनुशयादेवाह *यत्सत्त्वेपीति*। *क्षयश्चेति*। क्षीयन्ते चास्य कर्माणीत्यत्रेत्यर्थः। *कर्मण इति* तथाच नाभुक्तमित्यादिश्रुतिरुत्सर्गतो भोगेन क्षयमाह, ज्ञानस्य कर्मनाशकत्वं भोगद्वाराप्युपपद्यत इति न तत्र तद्बाध इति भावः। अत्र पूर्वोक्तदूषणमाशंक्य निराकरोति *नचेति*। अन्वयव्यतिरेकाभ्यां दुःखध्वंसविशेष इव तद्धेतुत्वमिति भावः। वस्तुतोऽनियमः यत्कर्मजदुःखप्रागभावोऽस्ति तस्य भोगेनैव नाशः तत्र प्रागभावस्यादृष्टसहकारेण प्रतियोगिजनकत्वनियमात्। अन्यथा तन्नाशकाभावे तस्यात्यन्ताभावत्वापत्तेः। यत्कर्मजदुःखप्रागभावो नास्ति तत्र चानन्यगत्या.....

स्यैव तत्त्वज्ञानान्नाश इति युक्तमुत्पश्यामः। अनुमाने-विमतिपदमित्यत्र *उत्पन्नेति* क्षणमात्रस्य विलम्बपदवाच्यत्वाभावादिति भावः। तथाप्येकश्रुतिरप्यनन्यथासिद्धा तत्र प्रमाणमेवेति तात्पर्यम्। अतएव शास्त्रमपि तत्त्वज्ञानपूर्वकमुपपद्यते तदा दुखःक्षण एव मोक्षापत्तौ तदसंभवादिति॥

इति श्रीमहामहोपाध्यायश्रीरुचिदत्तविरचितोऽनुमानप्रकाशः समाप्तः॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

Digitized by Arya Samaj Foundation Chennai and eGangotri

# काशीसंस्कृतसीरीज़-पुस्तकमाला ।

ॐ काशी—संस्कृतग्रन्थमाला विभागशः प्रकाशिता भवति । एतस्यां प्राचीनाः नवीनाश्च दुर्लभाः सुलभाश्च अत्युपयुक्ताः संस्कृतग्रन्थाः काशिकराजकीयसंस्कृतपाठशालीयैः पण्डितैरन्यैरपि विद्वद्भिः संशोधिताः क्रमेण संमुद्रिता भवन्ति । अस्यां प्रकाश्यमाणानां ग्रन्थानां मूल्यं सूचीपत्रे प्रकाशितं वर्तते । परंतु एतस्या नियमेनाऽविच्छिन्नतया निश्चितग्राहकमहाशयानां प्रतिमुद्राशतकं पञ्चविंशतिमुद्राः ( कमिशन ) परावर्तिता भवेयुः मार्गव्ययश्च न पृथक् दातव्यो भवेत् ।

| तत्र मुद्रितग्रन्थनामानि । | मूल्यम् । |
|---|---|
| १ नलपाकः नलविरचितः । संपूर्णः ( पाकशास्त्रम् १ ) | रु० १—८ |
| २ संक्षेपशारीरकम् । रामतीर्थस्वामिकृतान्वयार्थबोधिनीटीकासहितम् । ( वेदान्तं १ ) | रु० ८—० |
| ३ वैशेषिकदर्शनम् । पं० श्रीदुण्ढिराजशास्त्रिकृतविवरणोपेताभ्यां प्रशस्तपादभाष्योपस्काराभ्यां समन्वितम् (वैशेषिकं १) | रु०२—८ |
| ४ श्रीसूक्तम् । विद्यारण्यपृथ्वीधरश्रीकण्ठाचार्यकृतभाष्यत्रयेण टिप्पण्या च समलङ्कृतम् । ( वैदिकं १ ) | रु० ०—६ |
| ५ लघुशब्देन्दुशेखरः ( भैरवी ) चन्द्रकलाटीकासहितः-प्रथम भाग अव्ययीभावः । | रु० ५—० |
| ५ लघुशब्देन्दुशेखरः ( भैरवी ) चन्द्रकलाटीकासहितः तत्पुरुषादिसमाप्तिपर्यन्तः । द्वितीय भाग ( व्याकरणं १ ) | रु० ८—० |
| ६ कारिकावली मुक्ता० दिन० राम० शब्दखण्डसहिता तथा "गुणनिरूपणदिनकरीय" महामहोपाध्याय पं० श्रीलक्ष्मणशास्त्रिकृतव्याख्यासहिता । ( न्यायं १ ) | रु० ६—० |
| ७ पञ्चीकरणम् । वार्तिकाभरणालङ्कृतवार्तिकटीकया-तत्त्वचन्द्रिकासमवेतविवरणेन च समन्वितम् । ( वेदान्तं २ ) | रु० ०—८ |
| ८ अलङ्कारप्रदीपः । पण्डितवरविश्वेश्वरपाण्डेयनिर्मितः । | रु० ०—८ |
| ९ अनङ्गरङ्गः महाकविकल्याणमल्लविरचितः । (कामशास्त्रं १) | रु० ०—१२ |
| १० जातकपारिजातः । श्रीवैद्यनाथशर्मणा विरचितः । (ज्यो० १) | रु० २—० |
| ११ पारस्करगृह्यसूत्रम् । कात्यायनसूत्रीयश्राद्ध-शौच-स्नान-भोजन-कल्पसहितम् । ( कर्मकाण्डम् १ ) | रु० ०—८ |
| १२ पुरुषसूक्तम् । सायणभाष्य-महीधरभाष्य-मंगलभाष्य-निम्बार्कमतभाष्यचतुष्टयसहितम् । ( वैदिकं २ ) | रु० १—४ |
| १३ श्रीमत्सनत्सुजातीयम्—श्रीमच्छङ्करभगवत्पादविरचितभाष्येण नीलकण्ठीव्याख्यया च संवलितम् । ( वेदान्तं ३ ) | रु० १—४ |

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



१४ कुमारसंभवंमहाकाव्यम् । महाकवि-श्रीकालिदासवि० । सञ्जीवनी-शिशुहितैषिणी-टीकाद्वयोपेतम् सम्पूर्णम् । (काव्यं २) रु० १—८

१५ श्रुतबोधश्छन्दोग्रन्थः । आनन्दवर्द्धिनीतात्पर्यप्रकाशाख्यसंस्कृत-भाषाटीकासहितः । ( छंदः १ ) रु० ०—६

१६ कारिकावली । मुक्तावली-न्यायचन्द्रिकाटीकाद्वयसहिता सटिप्पणा । ( न्यायं २ ) रु० १—०

१७ पारस्करगृह्यसूत्रम् । काण्डद्वये हरिहर-गदाधर० तृतीयकाण्डे हरिहर-जयराम-प्रणीतभाष्येण समलङ्कृतम् । हरिहरभाष्यसहितस्नानत्रिकाण्डिकासूत्र—गदाधरभाष्यसहितश्राद्धनवकाण्डिकासूत्रैः यमलजननशान्ति-पृष्टोदिवि-शौच-भोजन—कामदेवकृतभाष्यसहितोत्सर्गपरिशिष्टसूत्रैः परिष्कृतं-टिप्पण्यादिभिः सहितं च । ( कर्मकाण्डं २ ) रु० ३—०

१८ संक्षेपशारीरकम्-मधूसूदनीटीकासहितम् संपूर्णं (वेदान्तं४) रु० ८—०

१९ लघुजूटिका-अर्थात् अभिनवा परिभाषेन्दुशेखरपरिष्कृतिर्निमितिः । ( व्याकरणं २ ) रु० ०—८

२० कातीयेष्टिदीपकः । ( दर्शपौर्णमासपद्धतिः ) महामहोपाध्याय-पं० श्रीनित्यानन्दपन्तपर्वतीयविरचितः । ( कर्मकाण्डं ) रु० १—०

२१ सप्तपाठि-श्रीशिवमाहिम्नस्तोत्रम् श्रीगन्धर्वराज पुष्पदन्ताचार्य-विरचितम् । हरिहरपक्षीय-मधुसूदनीटीकया ( संस्कृतटीका-संस्कृतपद्यानुवाद-भाषाटीका-भाषापद्यानुवाद-भाषा बिम्ब ) पञ्चमुखीनाम्न्या टीकया-शक्तिमहिम्नस्तोत्रेण च समन्वितम् । ( स्तोत्रवि० १ ) रु० १—०

२२ बौद्धाऽऽचार्यश्रीधर्मकीर्तिप्रणीतः सटीकन्यायबिन्दुः—भाषाटीकासहितः ( बौद्धन्याय वि० १ ) रु० १—८

२३ सपरिष्कृत-दर्पणसहितवैयाकरणभूषणसारः (व्याकरणं ३) रु० ४—०

२४ न्यायवार्त्तिकतात्पर्य्यटीका श्रीवाचस्पतिमिश्रविरचिता । सम्पूर्ण ( न्यायविभाग ३ ) रु० ६—०

२५ मीमांसान्यायप्रकाशः (आपदेवीयः) श्रीचिन्नस्वामिशास्त्रिकृतया सारविवेचिन्या व्याख्यया सहितः ( मीमांसा १ ) रु० २—०

२६ पौरोहित्यकर्मसारः ( टिप्पणीसमलंकृतः ) प्रथमो भागः श्रीरमाकान्तशर्मणा संगृहीतः । ( कर्मकाण्डवि० ३ ) रु० ०—४

२७ लघुशब्देन्दुशेखरः म० म० श्रीनागेशभट्टविरचितः । अव्ययीभावान्तो भागः, म०म० पण्डित श्रीनित्यानन्दपन्त-पर्वतीयः कृतशेखरदीपकाख्येन टिप्पणेन समुज्ज्वलितः । (व्या०४) रु० ४—०

२८ रघुवंशमहाकाव्यम् । महाकविश्रीकालिदासविरचितम् पञ्चसर्गात्मकम् । म० म० श्रीमल्लिनाथसूरिकृतसञ्जीविनीटीकया पं० श्रीकनकलालठक्कुरकृलार्थप्रकाशिकाटीकया च समलङ्कृतम् । ( काव्यवि० ३ ) रु० ०—१२

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



कामसूत्रम्। श्रीवात्स्यायनमुनिप्रणीतं बहुयत्नरासादितया पूर्णया जयमङ्गलरचितया टीकया समेतम्। बहुखण्डितपाठान् परिपूर्य,सूत्राङ्कांश्च संयोज्य, परिष्कृत्य संशोधितम्। (काम०२) रु० ८—०

न्यायकुसुमाञ्जलीः। न्याया चार्यपदाङ्कितश्रीमदुदयनाचार्यविरचितः। महामहो पाध्यायरुचिदत्तकृतमकरन्दोल्लासितमहामहोपाध्याय वर्द्धमनोपाध्यायप्रणितप्रकाशसाहतः (न्यायं४) रु० ६—०

परिभाषेन्दुशेखरः। म० म० श्रीनागेशभट्टरचितः। म० म० भैरवमिश्रविरचितया भैरवीत्यपराख्यया परिभाषाविवृत्या-तत्त्वप्रकाशिकया टीकया च सहितः। (व्याकरणं ४) रु० ३—०

अर्थसंग्रहः। पूर्वमीमांसासारसंग्रहरूपः। श्रीलौगाक्षिभास्करविरचितः। श्रीमत्परमहंसपरिव्राजकाचार्यश्रीरामेश्वरशिवयोगिभिक्षविरचितमीमांसार्थकौमुद्याख्यव्याख्यासहितः।(मीमां०२) रु०१—०

न्यायवार्त्तिकम् न्यायदर्शनवात्स्यायनाभाष्योपबृंहणम्। परमर्षि भारद्वाजोद्योतकरविरचितम्। महर्षि-गोतमादिचरितसम्वलितबृहत्भूमिकासहितम्। (न्यायं) रु० ६—०

शुक्लयजुर्वेदसंहिता। वाजसनेयिमाध्यन्दिनशाखीया। श्रीमदुव्वटाचार्यविरचितमन्त्रभाष्येण श्रीमन्महीधराचार्यविरचितवेददीपेन च सहिता। (भाग १-२-३-४) (वैदिकं ३) रु० ८—०

शुक्लयजुर्वेदकाण्वसंहिता। श्रीसायणाचार्यविरचितभाष्यसहिता। १ अध्यायादारभ्य २० अध्यायपर्यन्ता। (वैदिकं ४) रु० ६—०

सिद्धान्तलेशसंग्रहः। श्रीमदप्पयदीक्षितविरचितः। श्रीमत्परमहंसपरिव्राजकाचार्यकृष्णानन्दतीर्थविरचितया कृष्णालङ्कारास्यया व्याख्यया समलंकृतः। (वेदान्तं ४) रु० ६—०

काशिका। श्रीपाणिनिमुनिविरचितव्याकरणसूत्राणां वृत्तिः विद्वद्वर-वामन-जयादित्यविनिर्मिता। (व्याकरणं ५) रु० ६—०

प्राकृतप्रकाशः। भामहकृतः। श्रीमद्वररुचिप्रणीतप्राकृतसूत्रसहितः। टिप्पण्या च संयोजितः। (व्याकरणं ६) रु० १—४

जीवन्मुक्तिविवेकः श्रीमद्विद्यारण्यस्वामिविरचितः। भाषानुवादसमेतः। (वेदान्तं ५) रु० २—०

नारदीयसंहिता। ब्रह्मणोपदिष्टो नारदमहामुनिप्रोक्तो ज्यौतिषग्रन्थः। (ज्योतिषं २) रु० ०—६

मेदनीकोशः-मेदिनीकारविरचितः। (कोशं १) रु० १—८

मीमांसादर्शनम्। श्रीशबरस्वामिविरचितभाष्यसहितम्। (भाग१—२) (मीमांसा ३) रु० १०—०

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



४३ न्यादर्शनम् । श्रीगोतममुनीप्रणीतम् । श्रीवात्स्यायनमुनीप्रणीत
भाष्यसहितम् । श्रीविश्वनाथन्यायपञ्चाननभट्टाचार्यविरचि
तन्यायसूत्रवृत्त्यनुगतम् । टिप्पण्यादिसहितम् (न्यायं ६) रु
४४ दानमयूखः । विद्वद्वरश्रीनीलकण्ठभट्टविरचितः । (धर्मशास्त्रं १) रु०
४५ कालमाधवः । विद्वद्वरश्रीमाधवाचार्यविरचितः । (धर्मशास्त्रं २) रु०
४६ भास्वती । श्रीमच्छतानन्दविरचिता । श्रीमातृप्रसाद ( दैवज्ञ
पण) पाण्डेयेन कृताभ्यां छात्रबोधिनीनाम संस्कृतसोदाहर
भाषाटीकाभ्यां सहिता । (ज्योतिषं ३) रु०
४७ फक्किकाप्रकाशः । उपाध्यायोपाह्ववैयाकरणकेसरीविरुदाङ्कितमैथि
लेन्द्रदत्तशर्मविरचितः । पं० सीताराम शर्मकृतटिप्पण्या
विभूषितः । (व्याकरणं ७) रु०
४८ मिताक्षरा । श्रीगौडपादाचार्यकृतमाण्डूक्यकारिकाव्याख्या--श्रीम
त्परमहंसपरिव्राजकाचार्यस्वयंप्रकाशानन्दसरस्वतीस्वामि
कृता । शंकरानन्दकृतमाण्डूक्योपनिषद्दीपिका च (वेदा०६) रु
४९ काव्यप्रकाशः । श्रीमम्मटाचार्यविरचितः । पं० श्रीहरिशङ्करशर्म
मैथिलेन संगृहीतया नागेश्वरीटीकयाऽलङ्कृतः (काव्य०४) रु०
५० अधिकरणकौमुदी । श्रीदेवनाथठक्कुरकृता । (मीमां० ४) रु०
५१ रघुवंशमहाकाव्यम् । महाकविश्रीकालिदासविरचितम् महामहो
पाध्याय श्रीमल्लिनाथकृतसञ्जीविनीटीकयोपेतम् पं० श्रीकृष्ण
कलालठक्कुरेण विरचितया भावबोधिनी टिप्पण्या सम
लङ्कृतम् संपूर्णम् । रु०
५२ काथबोधः । साजनीकृत टीकोपेतः । दत्तात्रेय सम्प्रदायाऽनुगतः । रु०
५३ रसचन्द्रिका । पर्वतीय-पण्डितप्रवर-श्रीविश्वेश्वरपाण्डे
निर्मिता (काव्य० ६) रु०
५४ अलङ्कारमुक्तावली । पर्वतीय-विद्वद्वर-श्रीविश्वेश्वर पाण्डेय-
निर्मिता— ( काव्य वि० ७ ) रु०

पत्रादिप्रेषणस्थानम्

जयकृष्णदास--हरिदासगुप्त
चौखम्बा संस्कृत सीरीज आफीस
विद्याविलास प्रेस, गोपालमंदिर के उत्तर
बनारस सिटी ।

पुस्तकालय
गुरुकुल कांगड़ी
Entered in Database
Signature with Date
CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Digitized by Arya Samaj Foundation Chennai and eGangotri

STOCK VERIFY
2020
G.K.V. L

PAYMENT PROCESSED
vide Bill No 47 dated 28-5-14
ANIS BOOK BINDER

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar